संस्कृत विश्वविद्यालय ग्रन्थमाला का 135वाँ पुष्प

# ध्वनिसिद्धान्तमूलम्

प्रधानसम्पादकः
प्रो. मुरलीमनोहरपाठकः
कुलपतिः

सम्पादकः
प्रो. शिवशङ्करमिश्रः
शोधविभागाध्यक्षः

लेखकः
डॉ. अनमोलशर्मा

शोध-प्रकाशनविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
नवदेहली-16

संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 135 पुष्प

# ध्वनिसिद्धान्तमूलम्

प्रधान-सम्पादकः
**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः

सम्पादकः
**प्रो. शिवशङ्करमिश्रः**
शोधविभागाध्यक्षः

लेखकः
**डॉ. अनमोलशर्मा**

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**नई दिल्ली-110016**

प्रकाशकः

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

बी–4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–110016

© प्रकाशकाधीनः

प्रकाशनवर्षम् : 2024

ISBN : 978-81-972035-4-1

मूल्यम् : ₹ 550.00

मुद्रकः

**डी.वी. प्रिन्टर्स**

97–यू.बी., जवाहरनगरम्, देहली–110007

# मङ्गलाचरणम्



भवानीशङ्करौ वन्दे श्रद्धाविश्वासरूपिणौ।
याभ्यां विना न पश्यन्ति सिद्धाः स्वान्तःस्थमीश्वरम्॥

# प्ररोचना

परमानन्दसन्दोहजनकस्य काव्यस्य मनोरञ्जकत्वं लोकोपकारित्वञ्च आपामरसंवेद्यम्, काव्यानन्दादेव रणरणकत्वरिताः सहृदयाः पौनःपुन्येन पठितापठितकाव्यानां पठने पाठने च बद्धादरा जायन्ते । लक्ष्यलक्षणभेदाभ्यां संविभक्तस्य एतस्य कविकर्मणो निरवच्छिन्नपरम्परा अद्यापि पुष्टिमश्नुते । सारस्वतसाधनायां मग्नमनस आचार्या विविधग्रन्थप्रणयनादिभिः स्वकीयशेमुष्या विश्वमङ्गलं कामायमाना अनिशं यतमाना दृश्यन्ते तथा अनल्पं काव्यजातं चक्रिरे, तेषां मतवर्त्म आसाद्य अद्यापि प्रतीयमानानुप्राणितकाव्यनिर्माण-निपुणप्रतिभाभाजो नैके धीधनाः कञ्चिदपूर्वं विधातुं प्रपद्यन्ते।

तेष्वन्यतमो वर्तते तरुणविद्वान् डॉ.अनमोलशर्मा, तेन सलोचनं ध्वन्यालोकं काव्यप्रकाशं रसगङ्गाधरं साहित्यदर्पणञ्चावलम्ब्य ध्वनिसिद्धान्त-मूलमिति ग्रन्थो व्यलेखि। विविधदर्शनसिद्धान्तानां ध्वनिस्थापने कथं योगदानमस्तीति साधुतया अमुना युवविदुषा प्रादर्शि । साम्प्रतं विरलानामेव युवविदुषां लक्षणग्रन्थे साधीयसी प्रवृत्तिर्दृश्यते। अतः डॉ.अनमोलशर्मा अभिनन्दनीयो वर्तते। अनेन ग्रन्थेन नूनं ध्वनिसिद्धान्तस्य सरलीकरणं भविष्यति तथा अध्येतर्णिां विदग्धानाञ्च कृतिरियं सुखकरी लाभकरी यशस्करी भवितेति मन्ये वदामि च-

**ज्ञापयन्ती ध्वनेर्मर्म मोदयन्ती च धीधनान्।**
**अनमोलकृतिर्ह्येषा लोकेऽस्मिन्ननु भासताम्॥**

**-प्रो. मुरलीमनोहरपाठकः**
कुलपतिः
श्री.ला.ब.शा.रा.सं.वि.वि.नवदेहली 110016

# सम्पादकीयम्

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य प्रकाशनमालाया ध्वनिसिद्धान्तमूलमिति ग्रन्थरत्नं मतिमतां पाठकवृन्दानां करकमलेषु सम्प्रापयन्नहममन्दं हर्षमनुभवामि । सारस्वतसाधनायां संलग्नमनसो विपश्चितोऽजस्रं स्वशेमुष्या भारतीयवाङ्मयं समृद्धतरं प्रकुर्वाणाः सर्वत्रैवावलोक्यन्ते। अस्यां परम्परायां श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य सारस्वतमवदानं तावत् विश्वविश्रुतमस्ति, विश्वविद्यालयस्यास्य विविधै र्विद्वत्तल्लजैर्ग्रन्थप्रणयनादिभिः शास्त्रभाण्डागारमभारि ।

साहित्यशास्त्रस्य लोके किमपि विलक्षणं स्थानं लोकोपकारित्वञ्चास्ति। आदिकाव्यात् समारभ्य वर्तमानकालं यावत् काव्यधारा अनारतं प्रवहन्ती दृश्यते यतोहि लक्ष्यलक्षणग्रन्थाभ्यां समुपबृंहितस्य साहित्यशास्त्रस्य अध्ययनाध्यापनयोः सुदृढा परम्परा भारतवर्षे वर्तते । अस्यामेव परम्परायां "डॉ.अनमोलशर्मा" सोत्साहं सारस्वतं कार्यजातं कुर्वन्नस्ति, अनेन युवविदुषा ध्वनिसिद्धान्तमूलमिति ग्रन्थो व्यलेखि। पञ्चाध्यायात्मकेऽस्मिन् ग्रन्थे प्रथमाध्याये ध्वनिकृतां श्रीआनन्दवर्धनाचार्याणां तथैव लोचनकृतां श्रीअभिनवगुप्तपादाचार्याणां व्यक्तित्वकृतित्वयोः परिचयस्तथा अन्तरङ्गबहिरङ्गप्रमाणाभ्यां ध्वन्यालोकस्य एककर्तृकत्वं सोपपत्तिकं निरुपितम्, द्वितीयाध्याये ध्वनिस्थापने व्याकरणशास्त्रस्य, तृतीयाध्याये ध्वनिस्थापने काश्मीरशैवदर्शनस्य, चतुर्थाध्याये ध्वनिस्थापने सांख्ययोगदर्शनयोः, पञ्चमाध्याये च पूर्वोत्तरमीमांसादर्शनयोर्योगदानं विविधैः प्रामाणिकैस्तर्कैः साधुतया प्रतिभावता डॉ.अनमोलशर्मणा प्रादर्शि।

ध्वन्यालोकग्रन्थस्य गभीरता तावत् सर्वविदिता, अतस्तामपनेतुमना डॉ. अनमोलशर्मा सलोचनं ध्वन्यालोकं काव्यप्रकाशं साहित्यदर्पणं रसगङ्गाधरञ्च सम्यक् परिशील्य ध्वनिस्थापने कथं शास्त्रान्तराणामवदानं वर्तत इति सरलतया रुचिरतया च प्रादर्शयत् । इतोऽपि अग्रे बहून् ग्रन्थान् स लिखतु तथा विश्वविद्यालयस्यास्य सर्वविधकल्याणाय यततामिति कामये।

**-प्रो.शिवशङ्करमिश्रः**
शोधविभागाध्यक्षः
श्री.ला.ब.शा.रा.सं.वि.वि.नवदेहली।

# उपोद्घातः

सृष्टेः प्रारम्भत एव आत्मतत्त्वान्वेषणे रणरणकत्वरिता जनाः स्थूलतातः सूक्ष्मतां प्रतियान्तीति मानवीयशेमुष्याः स्वभावः, तन्नात्र महदाश्चर्यं यत् काव्यशास्त्रेऽपि परिपाटीयं परिपालिता।

तत्र किं काव्यमित्यपेक्षायां भामह आह 'शब्दार्थौ सहितौ काव्यम्' भामहस्योक्तीयं निशम्य ध्वनिकारेण चिन्तितं यदि शब्दार्थशरीरं काव्यं तर्हि केनचिदात्मना तदनुप्राणकेन भाव्यमेव। शब्दस्य सर्वजनसंवेद्यधर्मत्वात् अत एव स्थूलत्वात् न तदात्मता, यदि सामान्यार्थ एव काव्यात्मा, तर्हि लौकिकवैदिक-वाक्येषु तस्य सत्त्वात् तेषामपि काव्यात्मापत्तिः। अतः ताभ्यां विलक्षणो ललनालावण्यसन्निभः[1] प्रतीयमानार्थ एव काव्यात्मा, तदुक्तम् - **काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः।**[2] इति

इत्थं काव्यात्मनिश्चायके ग्रन्थेऽस्मिन् (ध्वन्यालोके) काव्यात्मभूतस्य ध्वनेः प्रपञ्चपुरस्सरं निरूपणम्। ध्वनिनिरूपणे प्रायशः सर्वेषां दर्शनानां प्रयोगदर्शनात् 'क्लिष्टतमोऽयं ग्रन्थः' इति सर्वैरनुभूयते, तत्रापि लोचनस्य दुर्ज्ञेयतामनुभूय लोचनमनुन्मील्यैव ध्वन्यालोकपठनेन न ध्वनिकारस्य सूक्ष्मेक्षिकया प्रकाशितानां रहस्यानां समुद्घाटनम्। ततश्च ग्रन्थान्तरग्रन्थि-ग्रथितध्वनिस्वरूपस्य विमोचनं (प्रकाशनम्) मे प्रधानोद्देश्यम्।

'सकलशास्त्रसारं साहित्यम्' इति विदुषां भणितिं निशम्य, स्वप्रवृत्त्यनुकूलानि तत्त्वानि चोपलभ्य 'ध्वनिस्थापने व्याकरणदर्शन-शास्त्रयोरवदानम्' इति शीर्षकमनुसृत्य शोधप्रबन्धेऽस्मिन् मे प्रवृत्तिः।

---

1 प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।। ध्व. लो. का. 4 प्रथमोद्योतः

2 का. 1 ध्व. लो. प्रथमोद्योतः

**प्रकृताध्ययनस्यावश्यकता**

- ध्वनिस्थापने येषां येषां दर्शनानामवदानं तेषां परिचयपुर:सरं पठनेन सरलतया ध्वनिस्थापनाया विशेषज्ञानं भविष्यति।
- कथं तेषां दर्शनसिद्धान्तानां समन्वयो ध्वनिस्थापने वर्तत इत्यस्य ज्ञानं भविष्यति।
- प्रकृतशोधकार्यातिरिक्तस्थलेषु स्वतो दर्शनान्तरतत्त्वानामन्वेषणस्य प्रतिभाविकास: शोधकार्येणानेन भविष्यति।
- काव्यशास्त्रस्य दर्शनशास्त्रस्य 'किं साम्यं को वा विशेष:' इति ज्ञातं भविष्यति।

**शोधस्वरूपम्**

- **उपोद्घात:**
- **प्रथमोऽध्याय:**
  * ध्वनिकारस्य व्यक्तित्वकृतित्वयो: परिचय:।
  * लोचनकारस्य व्यक्तित्वकृतित्वयो: परिचय:।
- **द्वितीयोऽध्याय:**
  * ध्वनिस्थापने व्याकरणशास्त्रस्यावदानम्।
- **तृतीयोऽध्याय:**
  * ध्वनिस्थापने काश्मीरशैवदर्शनस्यावदानम्।
- **चतुर्थोऽध्याय:**
  * ध्वनिस्थापने सांख्ययोगदर्शनयोरवदानम्।
- **पञ्चमोऽध्याय:**
  * ध्वनिस्थापने पूर्वोत्तरमीमांसादर्शनयोरवदानम्।
- **उपसंहार:**
- **परिशिष्टम्**
  * सहायकग्रन्थसूची

'ध्वनिस्थापने व्याकरणदर्शनशास्त्रयोरवदानम्' इति विषयमधिकृत्य प्रो. हरिनारायणतिवारीवर्याणां मार्गदर्शने शोधप्रबन्धोऽयं मया विरचित:।

पञ्चाध्यायात्मके शोधप्रबन्धेऽस्मिन् प्रथमेऽध्याये आनन्दवर्धनाचार्यस्य व्यक्तित्व-कृतित्वयोः परिचयः प्रस्तुतः तथैव अभिनवगुप्तपादाचार्यस्यापि व्यक्तित्वकृतित्वयोः परिचयः प्रदत्तः। द्वितीयाध्यायात् पञ्चमाध्यायपर्यन्तं व्याकरण-शैवदर्शन-सांख्य-योग-पूर्वोत्तरमीमांसानां सारगर्भितपरिचयपुरस्सरं ध्वनिस्थाने तेषामवदानं यावच्छक्यं प्रदर्शितम्।

अधुनाऽहं शोधप्रबन्धस्थान् अध्यायान् यथाक्रमं तत्तदध्याये समागतान् विषयांश्च साररूपेण प्रस्तौमि।

**प्रथमोऽध्यायः**

आनन्दवर्धनाचार्यस्य परिचयप्रदानावसरे बहिरङ्गान्तरङ्गप्रमाणाभ्यां तस्य कालनिर्धारणं विहितं यत् नवमशताब्द्या मध्यकाले (850 ई.) काश्मीरनरेशस्य 'अवन्तिवर्मणः' सभारत्नेष्वन्यतमः स आसीत् तदुक्तं कल्हेण राजतरङ्गिण्याम् -

**मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः।**
**प्रथां रत्नाकरश्चागात्साम्राज्येऽवन्तिवर्मणः॥**[1]

पितुर्नाम 'नोण' आसीत्, स्वयं तेनैव देवीशतके भणितं यत् -

**देव्या स्वप्नोद्गमादिष्टदेवीशतकसंज्ञया।**
**देशितोऽनुपमामाधादतो नोणसुतो नुतिम्॥**[2]

तदनु बाह्याभ्यन्तरप्रमाणाभ्यां 'ग्रन्थोऽयं न भिन्नकर्तृकः प्रत्युत एककर्तृकः' इति निश्चयीकृतः। तत्र भेदस्य मूलं लोचनव्याख्यानमेव, तथाहि कारिकाणां व्याख्याने 'कारिकाकारः' 'मूलग्रन्थकृत्' इति कुत्रचिल्लिखितः कुत्रचित् वृत्तीनां व्याख्याने 'वृत्तिकारः' 'ग्रन्थकृत्' इति विलिखितः, ततश्च लोचनकारस्य शब्दानिमान् समवलोक्य विवेचकेषु भ्रान्तिरजनि यत् कारिकाकारतो वृत्तिकारो भिन्नः।

वस्तुतो ग्रन्थोऽयं न भिन्नकर्तृकः, तथाहि प्रथमोद्योते वृत्तौ ध्वनेर्भेदद्वयं दृश्यते, न तु कारिकायां, तदुक्तं ध्वनिकृता वृत्तौ -

---

1 राजतरङ्गिणी 5/34

2 देवीशतकम् श्लो. 101

'अस्ति ध्वनिः, स चासावविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविधः सामान्येन।'[1]

अत्र प्रथमोद्योते वृत्तौ ध्वनेर्भेदद्वयमुक्त्वा द्वितीयोद्योते कारिकायां प्रथमध्वनिभेदस्य (अविवक्षितवाच्यध्वनेः) अवान्तरभेदद्वयं सः करोति यत्–

**अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम्।**
**अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम्।।**[2]

यदि भिन्नकर्तृकोऽयं ग्रन्थः तर्हि कथं कारिकाकारो ध्वनेर्मूलभेदद्वय–मनुक्त्वा तस्यावान्तरभेदद्वयं प्रकाशयति, कथं वा सहसैव अविवक्षितवाच्यस्य भेदद्वय– प्रतिपादनप्रकरणस्य सङ्गतिः? ततश्च एककर्तृकत्वमस्य ग्रन्थस्य सुस्फुटम्। तथैव बहुभिः प्रकरणैर्ध्वन्यालोकस्याभिन्नकर्तृकत्वं सयुक्तिकं सविस्तरमत्र प्रतिपादितम्।

तदनु ध्वनिकारस्य कृतीनां सारगर्भितः परिचयः प्रदत्तः। तत्र षट् कृतयस्तस्य –

(1) ध्वन्यालोकः (2) देवीशतकम् (3) विषमबाणलीला (4) अर्जुनचरितं महाकाव्यम् (5) तत्त्वालोकः (6) धर्मोत्तमा विवृतिः प्रमाणविनिश्चयविवृतिः।

**( 1 ) ध्वन्यालोकः**

चतुर्षु उद्योतेषु विभक्तोऽयं ग्रन्थः। ध्वनिप्रस्थानस्य प्रथमोऽयं ग्रन्थः।

**( 2 ) देवीशतकम्**

पद्यशतकेन भगवत्याः स्तुतिरत्र विहिता। यमकश्लेषचित्रबन्धादीनां चमत्कारोऽप्यत्र दृश्यते। तदुक्तं तेनैव –

**येनानन्दकथायां त्रिदशानन्दे च लालिता वाणी।**
**तेन सुदुष्करमेतत् स्तोत्रं देव्याः कृतं भक्त्या।।**

**( 3 ) विषमबाणलीला**

ध्वन्यालोके महाकाव्यस्यास्योल्लेखो दृश्यते, प्राप्तिस्तु न भवति।

1 का. 13 वृत्तौ ध्वन्यालोकः प्रथमोद्योतः
2 का. 1 द्वितीयोद्योतः

स्वयं ध्वनिकृतोक्तं यत् – यथा च ममैव विषमबाणलीलायाम् –

**ताला जाअन्ति गुणा जाला दे सहिअएहिं घेप्पन्ति।**
**रइकिरणानुग्गहि आइँ होन्ति कमलाइँ कमलाइँ॥**[1]

यथा वा ममैव विषमबाणलीलायामसुरपराक्रमणे कामदेवस्य –

**तं ताण सिरिसहोअररअणाहरणम्मि हिअअमेक्करसम्।**
**बिम्बाहरे पिआणंणिवेसिअं कुसुमबाणेन॥**[2]

तृतीयोद्योते तु विशेषरूपेण महाकाव्यस्यास्य समुल्लेखः।[3]

**( 4 ) अर्जुनचरितं महाकाव्यम्**

अस्यापि समुल्लेखो ध्वन्यालोक एव दृश्यते, तद्यथा – 'विपक्षविषये हि भयातिशयवर्णने नायकस्य नयपराक्रमादिसम्पत् सुतरामुद्योतिता भवति। एच्च मदीयेऽर्जुनचरितेऽर्जुनस्य पातालावतरणप्रसङ्गे वैशद्येन प्रदर्शितम्।[4]

**( 5 ) तत्त्वालोकः**

अद्वैतसिद्धान्तसम्बद्धोऽयं ग्रन्थः। तदुक्तं व्यञ्जनास्थापनावसरे लोचनकृता–

'येऽप्यविभक्तं स्फोटं वाक्यं तदर्थं चाहुः, तैरप्यविद्यापदपतितैः सर्वेयमनुसरणीया प्रक्रिया, तदुत्तीर्णत्वे तु सर्वं परमेश्वराद्वयं ब्रह्मेत्यस्मच्छा–स्त्रकारेण न न विदितं तत्त्वालोकग्रन्थं विरचयतेत्यास्ताम्।'[5]

**( 6 ) धर्मोत्तमा विवृतिः / प्रमाणविनिश्चयविवृतिः**

बौद्धाचार्यधर्मोत्तरेण 'प्रमाणविनिश्चयटीका' प्रणिता, ध्वनिकृता तदुपरि 'प्रमाणविनिश्चयविवृतिः' इत्याख्या वृत्तिर्लिखिता। अनिर्वचनीयतावादीनां[6] खण्डनावसरे ध्वनिकृता लिखितम्–

---

1 का. 1 वृत्तौ ध्वन्यालोकः, द्वितीयोद्योतः
2 का. 27 वृत्तौ ध्वन्यालोकः द्वितीयोद्योतः
3 का. 15 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः
4 का. 25 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः
5 का. 4 व्याख्याने लोचने प्रथमोद्योतः
6 केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयम्। का. 1 प्रथमोद्योतः

'यत्तु अनिर्देश्यत्वं सर्वलक्षणविषयं बौद्धानां प्रसिद्धं तत्तन्मतपरीक्षायां ग्रन्थान्तरे निरूपयिष्यामः।'[1]

अत्र लोचनकृतोक्तम् –

'ग्रन्थान्तर इति विनिश्चयटीकायां धर्मोत्तर्यां या विवृतिरमुना ग्रन्थकृता कृता तत्रैव तद् व्याख्यातम्'।[2]

तदनु लोचनकारस्य सविस्तरं परिचयः प्रदत्तः तस्य कालनिर्धारणं च दशमशताब्द्या मध्यत एकादशशताब्द्याः प्रारम्भपर्यन्तं (950 ई. – 1025 ई.) विहितम्। बाल्यकाल एव तस्य माता स्वर्गस्था जाता, तदुक्तं 'माता व्ययूयुजदमुं किल बाल्य एव'[3] इति तथापि मातुर्वियोगमपि भाविजीवनस्य कृते कल्याणरूप-मेवाङ्गीकृतवान् तदुक्तं तेनैव 'देवो हि भाविपरिकर्मणि संस्करोति'[4] इति। मातुर्वियोगे पिता तस्य संन्यासी बभूव, तदुक्तं 'तारूण्यसागरतरङ्गभरानपोह्य वैराग्यपोतमधिरूह्य दृढं हठेन'[5] इति, झटिति स्वर्गस्थश्च जातः। इत्थं पित्रोर्वियोगेन यः खलु साहित्यसान्द्ररसोपभोगपर आसीत् तस्य शैवागमानां पठने प्रवृत्तिर्जाता, तदुक्तम् –

**साहित्यसान्द्ररसभोगपरो महेशभक्त्या स्वयंग्रहणदुर्मदया गृहीतः।**
**स तन्मयीभूय न लोकवर्तनीमजीगणत् कामपि केवलं पुनः॥**[6]

इत्थं सम्पूर्णजीवने शिवभक्तिसंलग्नस्सन् कठोरां ब्रह्मचर्यचर्यां चरन् शास्त्राणि च विरचयन् चरमे वयसि काश्मीरे श्रीनगरगुलमर्गयोर्मध्ये 'मगम' इति स्थानस्य समीपे 'भैरव-गुफा' इत्यत्र प्रविश्य न जातु ततो निर्जगाम। एवं हि श्रूयते यत् काश्मीरीया ब्राह्मणा अद्यापि 'अभिनवगुप्तस्य मूर्तिं निर्माय पूजयन्ति, तन्नाम्ना व्रतञ्च कुर्वन्ति।

चत्वारिंशदधिकाः कृतयो तस्य वर्तन्ते। तत्र ध्वन्यालोकस्य 'लोचनटीका' तथा नाट्यशास्त्रस्य 'अभिनवभारती' साहित्यवाङ्मयस्य भाष्यत्वेनाभिमता।

---

1 का. 47 वृत्तौ तृतीयोद्योतः
2 का. 47 वृत्तौ तृतीयोद्योतः व्याख्याने लोचने
3 काव्यप्रकाशभूमिका, आचार्यविश्वेश्वरः
4 तत्रैव
5 तत्रैव
6 काव्यप्रकाशभूमिका, आचार्यविश्वेश्वरः

**द्वितीयोऽध्यायः**

काव्यशास्त्रे सर्वादौ ध्वनिपदस्य प्रयोगो[1], ध्वनितत्त्वस्य मीमांसा च[2] आनन्दवर्धनाचार्येण ध्वन्यालोके विहिता। यद्यपि काव्यजीवातुभूतस्य व्यङ्ग्यस्य सत्ता महाकवीनां भारतीषु पूर्वत एव आसीत्[3] तथापि तल्लक्षणकर्तुमशक्नुवतां सोऽर्थो भर्तृसुखमतद्वित्सु कुमारीष्विव गिरामगोचरप्रायमासीत्।

राजानकानन्दवर्धनाचार्येण स्वसूक्ष्मेक्षिकया व्याकरणशास्त्रे ध्वनिस्फोटयोः सम्यक् स्वरूपमवधार्य काव्यशास्त्रेऽपि व्यञ्जकत्वसाम्याद् ध्वनिव्यवहारः कृतः। तदुक्तम् –

'प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः।'[4]

तृतीयोद्योते व्यञ्जनास्थापनावसरे पुनः तदेव ब्रवीति यत् – 'परिनिश्चित- निरपभ्रंशशब्दब्रह्मणां विपश्चितां मतमाश्रित्य प्रवृत्तोऽयं ध्वनिव्यवहारः।'[5]

वैयाकरणास्तावत् स्फोटाभिव्यञ्जकस्य कृते 'ध्वनिः' इति पदं प्रयुञ्जते, तदुक्तं नागेशेन – 'येन वायुसंयोगेन स्थानप्रयत्नसहकृतेन स्फोटोऽभिव्यज्यते सो वैयाकरणैर्ध्वनिः कथ्यते।'[6]

ध्वनतीति ध्वनिः इति व्युत्पत्त्या श्रोत्रग्राह्या वर्णाः स्फोटाभिव्यञ्जका ध्वनिपदवाच्याः तेषां मते।

साहित्यिकाः ततोऽप्यधिकं विस्तृतरूपेण ध्वनिव्यवहारं कुर्वन्ति। ध्वनि-लक्षणं कुर्वता आनन्दवर्धनाचार्येणोक्तं यत् –

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**

1 काव्यस्यात्मा ध्वनिरिति बुधै............. का. 1 प्रथमोद्योतः
2 यत्रार्थः शब्दो वा तमर्थमु .......... का. 13 तत्रैव
3 सरस्वती स्वादु तदर्थवस्तु निष्यन्दमाना महतां कवीनाम्। का. 6 तत्रैव
4 का. 13 वृत्तौ तत्रैव
5 का. 33 वृत्तौ तृतीयोद्योतः
6 स्फोटनिरूपणे परमलघुमञ्जूषायां नागेशः

**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥**[1]

लोचनकारस्तु ध्वनिशब्दस्य पञ्चार्थेषु योजनं करोति (1) ध्वनतीति ध्वनिः (वाचकः) (2) ध्वनतीति ध्वनिः (वाच्यः) (3) ध्वन्यत इति ध्वनिः (व्यङ्ग्यार्थः) (4) ध्वननं ध्वनिः (व्यापारः) (5) ध्वन्यतेऽस्मिन्निति ध्वनिः (काव्यम्)

तदुक्तं लोचनकारेण –

'वाच्योऽपि ध्वनिः, वाचकोऽपि शब्दो ध्वनिः, द्वयोरपि व्यञ्जकत्वं ध्वनतीति कृत्वा। सम्मिश्र्यते विभावानुभावसंवलनयेति व्यङ्ग्योऽपि ध्वनिः, ध्वन्यत इति कृत्वा। शब्दनं शब्दः शब्दव्यापारः, न चासावभिधादिरूपः अपि त्वात्मभूतः सोऽपि ध्वननं ध्वनिः। काव्यमिति व्यपदेश्यश्च योऽर्थः सोऽपि ध्वनिः, उक्तप्रकारध्वनिचतुष्टयमयत्वात्। अत एव साधारणहेतुमाह – व्यञ्जकत्व-साम्यादिति। व्यङ्ग्यव्यञ्जकभावः सर्वेषु पक्षेषु सामान्यरूपः साधारण इत्यर्थः।[2]

सुप्तिङ्वचनसम्बन्धादीनां व्यञ्जकता व्याकरणज्ञानाधीनं, ध्वनिकृता मुक्तकण्ठेन तेषां सुबादीनां व्यञ्जकता स्वीकृता –

**सुप्तिङ्वचनसम्बन्धैस्तथा कारकशक्तिभिः।**
**कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित्॥**[3]

एतदतिरिक्तमपि व्याकरणावदानं दृश्यते, तत्राभिधामूलायां ध्वनौ संयोगादिभिश्चतुर्दशकारणैः प्राकरणिकार्थनियन्त्रणं स्वीकृत्य अप्राकरणिकार्थ-बोधाय व्यञ्जना स्वीकृता।[4] संयोगादीनां नियन्त्रणमपि परमवैयाकरणेन भर्तृहरिणा प्रतिपादितं यत् –

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**
**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥**

---

1 का. 13 प्रथमोद्योतः

2 का. 13 व्याख्याने लोचने

3 का. 16 ध्वन्यालोकः तृतीयोद्योतः

4 अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम्॥ काव्यप्रकाश का. 19 द्वितीयोल्लासः

**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।**
**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥**

तदित्थं सविस्तरं व्याकरणावदानमध्यायेऽस्मिन् प्रदर्शितम्।

**तृतीयोऽध्यायः**

आनन्दवर्धनस्तावत् परमशैवदार्शनिको बभूव तथा तृतीयोद्योते या व्यञ्जनास्थापना तेन कृता तस्या मूलं काश्मीरशैवदर्शनमेव, तथाहि वाच्यव्यङ्ग्ययो-र्घटप्रदीपन्यायस्वीकारे तेनोक्तम् -

'तस्माद् घटप्रदीपन्यायस्तयोः। यथैव हि प्रदीपद्वारेण घटप्रतीतावुत्पन्नायां न प्रदीपप्रकाशो निवर्तते तद्वद् व्यङ्ग्यप्रतीतौ वाच्यावभासः।'[1]

व्यञ्जकस्य च स्वरूपं निरूपयता तेनोक्तम् -

**'स्वरूपं प्रकाशयन्नेव परावभासको व्यञ्जक इत्युच्यते।'**[2]

काश्मीरशैवदर्शनेऽपि परमशिवः स्वयं प्रकाशयन् क्षितिपर्यन्तानि षट्त्रिंशत्तत्त्वानि प्रकाशयति, तदुक्तम् -

**आत्मैव सर्वभावेषु स्फुरन् निर्वृतचिद्विभुः।**
**अनिरूद्धेच्छाप्रसरः प्रसरद्दृक्क्रियः शिवः॥**[3]

यथा सर्वेषां तेषां पदार्थानां प्रकाशने शिवत्वं दूरं न भवति तथैव व्यङ्ग्यप्रतीतिकालेऽपि वाच्यज्ञानं दूरं न भवति, तदुक्तम् -

'न हि व्यङ्ग्ये प्रतीयमाने वाच्यबुद्धिर्दूरी भवति। वाच्यावभासा-विनाभावेन तस्य प्रकाशनात्।'[4]

काश्मीरशैवदर्शने परमशिवस्य रूपद्वयं, तत्राद्यं विश्वोत्तीर्णरूपं द्वितीयं विश्वमयरूपम्। प्रथमे विश्वोत्तीर्णरूपे यद्यपि समस्तमपि प्रपञ्चं तत्रैव मयूराण्डरसन्यायेन स्थितं तथापि तस्य प्रपञ्चस्य भानं न परमेश्वरस्य, द्वितीयं विश्वमयरूपं तत्रैव समस्तप्रपञ्चजातस्योत्पत्तिः। स्वक्रीडार्थं परमेश्वरः

---

1 का. 33 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः
2 तत्रैव
3 शिवदृष्टिः प्रथमाह्निके श्लो. 2
4 का. 33 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः

प्रपञ्चमुद्भावयति। यथा गजतुरगादिं विना कदाचित् सर्वैश्वर्यसम्पन्नोऽपि नृपो विहारार्थं पदाभ्यामेव गच्छति तथैव स्वानन्दातिरेकात् क्रीडार्थं परमेश्वरो जगदादिप्रपञ्चमुद्भावयति। तदुक्तं शिवदृष्टिग्रन्थे –

**क्रीडया दुःखवेद्यानि कर्मकारीणि तत्फलैः।**
**सम्भत्स्यमानानि तथा नरकार्णवगह्वरे॥**
**निवासीनि शरीराणि गृह्णाति परमेश्वरः।**
**यथा नृपः सार्वभौमः प्रभावामोदभावितः॥**
**क्रीडन् करोति पादातधर्मांस्तद्धर्मधर्मतः।**
**तथा प्रभुः प्रमोदात्मा क्रीडयत्येवं तथा तथा॥**[1]

विश्वोत्तीर्णरूपं परित्यज्य मायामवलम्ब्य यदा परमेश्वरो विश्वमयरूपे पदार्थान् समुद्भावयति तदा स्वयमपि तेषु पदार्थेषु प्रकाशते, तदुक्तं शिवदृष्ट्याम्–

**इत्थं शिवो बोधमयः स एव परनिर्वृतिः।**
**सैव चोन्मुखतां याति सेच्छाज्ञानक्रियात्मताम्॥**[2]
**सैव शाक्तशरीरादिनारकान्तं हि भूतता।**
**प्रसूयते स्वचिद्रूपप्रमुखं पार्थिवान्तकम्।**
**पदार्थत्वेन भगवान् सर्वत्रैव तदात्मता॥**[3]

एतदतिरिक्तमपि बहुत्र शैवदर्शनं ध्वन्यालोके दृश्यते। यथा प्रथमोद्योते ध्वनिकृतोक्तम् –

**सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।**
**यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः॥**[4]

अत्र प्रत्यभिज्ञापदस्य 'तत्तेदन्तावगाहिनी प्रतीतिः प्रत्यभिज्ञा' इत्येतावन्मात्रं न तात्पर्यम्। प्रत्युत ज्ञातस्यापि विशेषतो निरूपणमनुसन्धानात्मकमत्र प्रत्यभिज्ञानं तदुक्तं लोचनकृता–
प्रत्यभिज्ञेयशब्देनेदमाह–

1 शिवदृष्टिः प्रथमाह्निकम् श्लो. 36–38
2 शिवदृष्टिः प्रथमाह्निकम् श्लो. 39
3 शिवदृष्टिः प्रथमाह्निकम् श्लो. 40
4 का. 8 ध्वन्यालोकः प्रथमोद्योतः

**काव्यं तु जातु जायेत कस्यचित्प्रतिभावतः।**

इति नयेन यद्यपि स्वयमस्यैतत्परिस्फुरति, तथापीदमित्थमिति विशेषतो निरूप्यमाणं सहस्रशाखी भवति। यथोक्तमस्मत्परमगुरुभिः श्रीमदुत्पलपादैः-

**तैस्तैरप्युपयाचितैरूपनतस्तन्व्याः स्थितोऽप्यन्तिके**
**कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं यथा।**
**लोकस्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो**
**नैवालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता।।** इति

'तेन ज्ञातस्यापि विशेषतो निरूपणमनुसन्धानात्मकमत्र प्रत्यभिज्ञानं न तु तदेवेदमित्येतावन्मात्रम्।'[1]

प्रत्यभिज्ञापदस्य बहुविशेषोऽर्थः शैवदर्शने, प्रत्यभिज्ञापदमादाय बहूनि शैवशास्त्राणि प्रणितानि, यथा - ईश्वरप्रत्यभिज्ञा (उत्पलाचार्यस्य) ईश्वरप्रत्य-भिज्ञाविवृतिविमर्शिनी (अभिनवगुप्तस्य) प्रत्यभिज्ञाहृदयम् (क्षेमराजस्य)।

मोक्षवर्णने प्रत्यभिज्ञापदस्य प्रयोगः शैवदर्शने, तथा हि चिन्तामर्णियदा स्वरूपतो न ज्ञायते तदा तत्प्राप्तावपि न सः स्वप्रभावं दर्शयितुमलं तथैव परमेश्वरश्च स्वरूपतो यावन्न ज्ञायते सोऽपि निजवैभवाय नालं परं यदा चिन्तामणित्वेन चिन्तामणेर्ज्ञानं तदा बहुविधं चमत्काराय सः प्रभवति तथैव स्वाभिन्नोऽपि परमेश्वरो यस्मिन् काले स्वरूपतो ज्ञायते सोऽपि बहुचमत्काराय प्रभवति, तदुक्तं शिवदृष्ट्याम् -

**चिन्तामणिरविज्ञातो भवेच्चिन्तामणिः स्फुटम्।**
**तथापि कार्यभोगार्थं स ज्ञातः केन वार्यते।।**[2]

तथा च -

**तस्माच्छिवेऽप्यविज्ञाते ज्ञाते वा शिव एव ते।**
**सर्वमेवात एवैतद्भावनाकरणाच्च्युतम्।।**[3]
**विज्ञातं जायते पुंसां यद्यप्येवमवस्थितम्।**

---

1 का. 8 ध्वन्यालोकः प्रथमोद्योतः लोचने

2 शिवदृष्टिः सप्तमाह्निकम् श्लो. 4

3 तत्रैव श्लो. 8

**तथापि चित्रकर्मार्थमुपायो वाच्य आदरात्।।**[1]

इत्थमध्यायेऽस्मिन् सयुक्तिकं सप्रमाणं काश्मीरशैवदर्शनावदानं ध्वनि-स्थापने प्रतिपादितम्।

**चतुर्थोऽध्यायः**

सांख्ययोगदर्शनयोरवदानं ध्वनिस्थापने प्रकृताध्याये प्रदर्शितम्। सांख्यानां सत्कार्यवादस्य सिद्धान्तो व्यङ्ग्यर्थास्य सत्तायां दृश्यते। तथा हि व्यङ्ग्यार्थस्वरूपं बोधयन् ध्वनिकारो ब्रवीति –

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।**[2]

अत्र 'विभाति' इति पदेन तदर्थस्य सत्तायां तद्भानमेव प्रमाणत्वेनाभ्युपगतं ध्वनिकारेण, अत्र लोचनकारो ब्रवीति –

'यदेवंविधमस्ति तद्भाति, न ह्यत्यन्तासतो भानमुपपन्नम्, रजताद्यपि नात्यन्तमसद्भाति। अनेन सत्त्वप्रयुक्तं तावद्भानमिति भानात्सत्त्वमवगम्यते। तेन यद् भाति तदस्ति तथेत्युक्तं भवति।'[3]

सत्कार्यवादस्य स्वरूपं प्रतिध्वनितं भवत्यत्र लोचनव्याख्याने, तथा हि सांख्याचार्याः, सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्कार्यतस्तदुपलब्धेः'[4] इति ब्रूवन्ति। अर्थात् प्रधानादीनां सूक्ष्मत्वात् प्रतीतिर्न भवति तथापि महदादिकार्यतः तदुपलब्धिः अर्थात् तेषां प्रधानादीनां सत्तावगम्यते इति सत्कार्यवादसिद्धान्तः तथैव व्यङ्ग्यार्थोऽपि सुसूक्ष्मः, तदुक्तम् –

'तस्य हि ध्वनेः स्वरूपं सकलसत्कविकाव्योपनिषद्भूतम् अतिरमणीयम् अणीयसीभिरपि चिरन्तनकाव्यलक्षणविधायिनां बुद्धिभिरनुन्मी-लितपूर्वम्'।[5]

सूक्ष्मोऽपि प्रतीयमानार्थो झटिति सचेतसां तत्त्वार्थदर्शिन्यां बुद्धौ

1 शिवदृष्टिः सप्तमाह्निकम् श्लो. 9
2 का. 4 ध्वन्यालोकः प्रथमोद्योतः
3 तत्रैव लोचने
4 का. 8 सांख्यकारिका
5 का. 1 वृत्तौ प्रथमोद्योतः

प्रकाशते, तदुक्तम्–

**तद्वत् सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम्।**
**बुद्धौ तत्त्वार्थदर्शिन्यां झटित्येवावभासते।।**[1]

अत्र 'सचेतसां बुद्धौ तदवभासते' इत्युक्तं, ततश्च सचेतसां हृदयेषु विलक्षणानन्दात्मककार्यात् तदुपलब्धिः (व्यङ्ग्योपलब्धिः) ध्वनिवादिनः स्वीकुर्वन्ति, तदुक्तं विश्वनाथेन –

**'सचेतसामनुभवः प्रमाणं तत्र केवलम्'।**[2]

पण्डितराजजगन्नाथोऽपि ब्रवीति –

**'न ह्यनुभवसिद्धोऽर्थो बालेनाप्यपह्नोतुं शक्यते'।**[3]

इत्थं सत्कार्यवादस्य सिद्धान्तो दृश्यतेऽत्र, लोचनकारस्तु वक्ति 'यदेवंविधमस्ति तद्भाति, न ह्यत्यन्तासतो भानमुपपन्नम्' इत्यत्र पुनः सत्कार्यवादो दृश्यते, सांख्येऽपि 'असतः सत्ता नाङ्गीकृता' तदुक्तम् –

**असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।**
**शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।।**[4]

श्रीमद्भगवद्गीतायां चोक्तम् –

**नासतो विद्यते भावो नाभावो विद्यते सतः।**
**उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः।।**[5]

इत्थं सयुक्तिकं सप्रमाणं सविस्तरं सांख्यदर्शनावदानमध्यायेऽस्मिन् प्रदर्शितम्।

तदनु योगदर्शनस्यावदानं ध्वनिस्थापने प्रदर्शितम्। योगिनां चित्तवृत्तिनिरोधो[6] यथा समाधिकाले भवति तथैव सचेतसामपि बाह्यचित्तवृत्तिनिरोधो रसास्वादावस्थायां भवति। तदुक्तम् –

---

1 का. 12 प्रथमोद्योतः
2 का. 4 साहित्यदर्पणः, तृतीयपरिच्छेदः
3 पर्यायोक्तनिरूपणे, रसगङ्गाधरः द्वितीयमाननम्
4 का. 9 सांख्यकारिका
5 श्रीमद्भगवद्गीता 16/2
6 योगश्चित्तवृत्तिनिरोधः,तदा द्रष्टुः स्वरूपेऽवस्थानम्। योगसूत्रम् 2,3

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।**
**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥**[1]

योगिनां यथा स्वस्वरूपानन्दाकाराखण्डचित्तवृत्तिः समाधौ तथैव सचेतसामपि रसविषयिणी, तदुक्तं पण्डितराजेन –

'विभावादिचर्वणामहिम्ना सहृदयस्य निजहृदयतावशोन्मिषितेन तत्तत्स्थाय्युपहितस्वस्वरूपानन्दाकारा समाधाविव योगिनश्चित्तवशत्तिरूपजायते, तन्मयीभवनमिति यावत्।'[2]

योगिनां यथा अक्लिष्टाः चित्तवृत्तयस्तान् समाधौ प्रेरयन्ति, साहित्यिकान् तथैव प्राग्विनिविष्टरत्यादिसंस्कारा रसचर्वणायां प्रेरयन्ति। सर्वेऽपि रसाः चित्तवृत्तिरूपा एव, तदुक्तं लोचने–

'औचित्येन प्रवृत्तौ चित्तवृत्तेरास्वाद्यत्वे स्थायिन्या रसो, व्यभिचारिण्या भावः, अनौचित्येन तदाभासः'।[3]

पण्डितराजस्तु 'चित्तवृत्तिपदेन' रसादीनां निरूपणं कृतवान्, ध्वनिकारेण रसादीनां निरूपणं नो विहितं कारणं तस्योद्देश्यन्तु निर्भ्रान्तशब्देषु ध्वनितत्त्वस्य विवेचनं, ध्वनिसम्प्रदायस्य प्रतिष्ठापनञ्च आसीत्। तदुत्तरवर्तिनो ध्वनिवादिनः स्वमुक्तकण्ठेन चित्तवृत्तिरूपता रसस्याङ्गीकुर्वन्ति, तच्च वितत्याध्यायेऽस्मिन् वर्णितम्। चित्तवृत्तीनाञ्च निरूपणं प्राधान्येन योगदर्शन एव, तदतिरिक्तं योगिनां सचेतसाञ्च तुल्यता सविस्तरमत्र प्रदर्शिता। इत्थं योगशास्त्रस्यावदानं ध्वनिस्थापने प्रदर्शितम्। तदित्थं सांख्ययोगयोरवदानं ध्वनिस्थापनेऽध्यायेऽस्मिन् प्रदर्शितम्।

**पञ्चमोऽध्यायः**

मीमांसादर्शनस्यावदानं प्रकृताध्याये ध्वनिस्थापने प्रदर्शितम्। सूचीकटाहन्यायेन स्वल्पविषयत्वात् उत्तरमीमांसादर्शनस्यावदानमत्र पूर्वं प्रदर्शितम्। पूर्वेऽध्याये सूचितमेव ध्वनिकारेण रसादीनां निरूपणं नो कृतं,

---

1 का. 2 साहित्यदर्पणः तृतीयपरिच्छेदः

2 रसनिरूपणं रसगङ्गाधरः प्रथमाननम्

3 का. 4 व्याख्याने लोचने

तस्य प्रयोजनं ध्वनिस्वरूपकथनमेव। 'काव्यस्यात्मा ध्वनिरिति'[1] प्रतिज्ञाय सम्पूर्णग्रन्थे तन्निर्वाहकुर्वन्नेवासौ लक्ष्यते ग्रन्थान्ते स्वयं वदति यत् –

**काव्याख्येऽखिलसौख्यधाम्नि विबुधोद्याने ध्वनिर्दर्शितः।**
**सोऽयं कल्पतरुपमानमहिमा भोग्योऽस्तु भव्यात्मनाम्।।**[2]

तदुत्तरवर्तिनो ध्वनिवादिनो मम्मटादयो रसस्य ब्रह्मास्वादसहोदरत्वेन स्वरूपं मन्वते तथैव प्रतिपादयन्ति च। तत्र मम्मटो लिखति –

**'ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी**
**शृङ्गरादिको रसः।'**[3]

विश्वनाथो लिखति –

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।**
**वेद्योन्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः।।**
**अलौकिकचमत्कारप्राणः कैश्चित् प्रमातृभिः।**
**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः।।**[4]

विना वेदान्तशास्त्रं (उत्तरमीमांसारूपं) ब्रह्मज्ञानं नैव, विना ब्रह्मज्ञानं रसज्ञानं नैव, तेन पूर्वमत्र वेदान्तानुमतं ब्रह्मस्वरूपं प्रतिपाद्य रूचिराभिर्युक्तिभिः तदवदानं ध्वनिस्थापने प्रदर्शितम्।

पण्डितराजजगन्नाथस्तु विशेषतो 'रसो वै सः' 'रस ह्येवायं लब्ध्वानन्दी भवति' इति श्रुतिमनुसृत्य रसस्वरूपं निरूपयति। स्वकथने जगन्नाथः प्रमाणमपि दर्शयति, सः कथयति यदि ब्रह्मानन्दे –

**सुखमात्यन्तिकं यत् तद् बुद्धिग्राह्यमतीन्द्रियम्।**
**वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः।।**[5]

1 का. 1 ध्वन्यालोकः प्रथमोद्योतः
2 चतुर्थोद्योतान्ते ध्वन्यालोकः
3 रसनिरूपणं काव्यप्रकाशः
4 का. 2,3 साहित्यदर्पणः तृतीयपरिच्छेदः
5 श्रीमद्भगवद्गीता 21/6

इत्यादिगीतावचनं प्रमाणं तर्हि 'रसो वै सः' 'रस ह्येवायं लब्ध्वानन्दी भवति' इत्यादिश्रुतिः, सकलसहृदयप्रत्यक्षं चेति प्रमाणद्वयम्।

इत्थं सर्वेऽपि ध्वनिकारोत्तरवर्तिनो मम्मटादयो ब्रह्मास्वादसहोदरत्वेन रसस्वरूपं वर्णयन्ति, विना वेदान्तज्ञानं न ब्रह्मस्वरूपज्ञानं, विना ब्रह्मस्वरूपज्ञानं रसज्ञानं न, विना रसज्ञानं काव्यात्मनो ज्ञानं न,कारणं 'काव्यात्मा रस एव' तदुक्तं स्वयं ध्वनिकृता–

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥**[1]

तदित्थं वेदान्तावदानं ध्वनिस्थापने वर्तते, तच्च विविच्यात्राध्याये प्रदर्शितम्।

तदनु पूर्वमीमांसावदानं ध्वनिस्थापने प्रदर्शितम्। वैदिकवाक्य–विवेचनात्मके मीमांसाशास्त्रे सर्वत्र ईश्वरोक्तानां शब्दानां निर्भ्रान्तार्थानां बोधनाय अभिधाव्यापारः प्राधान्येन, तदङ्गत्वेन लक्षणाव्यापारश्च स्वीकृतः। ततश्च व्यञ्जनां ते नाभ्युपगच्छन्ति, व्यञ्जनानिषेधार्थं 'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः' तथा 'यत्परः शब्दः स शब्दार्थः' इति सिद्धान्तं स्वीकृत्य व्यञ्जनायाः खण्डनं कुर्वन्ति ततश्च ध्वनिकारस्य समक्षं तेषां खण्डनं कर्तव्यमासीत्। ततश्च सयुक्तिकैः प्रमाणैः तेषां खण्डनं व्यञ्जनास्थापनावसरे ध्वनिकृता विहितं तेषां खण्डनेनैव नितरां व्यञ्जनास्थापना भवति, व्यञ्जनास्वरूपमवगम्यते च, ततश्च पूर्वपक्षरूपेण पूर्वमीमांसावदानं ध्वनिस्थापने वर्तते।

पदार्थवाक्यार्थन्यायेन व्यङ्ग्यस्यान्तर्भावो वाच्येऽर्थे मीमांसकाः कुर्वन्ति, तत्र मीमांसकाः कथयन्ति शब्दोच्चारणेन यस्मिन्नर्थे तात्पर्यं स एव तात्पर्यार्थो वाक्यार्थो वा तथा यस्यार्थस्य मध्ये प्रतीतिः सा तात्पर्यार्थप्रतीतेरूपायमात्रं यथा 'निःशेषच्युतप्रभृतिपद्ये .........' शब्दोच्चारणं 'तदन्तिकमेव रन्तुं गतासि' इति बोधाय कृतं ततश्च स एव तत्र वाच्यार्थः तथा यस्यार्थस्य मध्ये प्रतीतिः 'वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्' इति रूपस्य,

---

1 का. 5 ध्वन्यालोकः प्रथमोद्योतः

सा प्रतीतिः तत्प्रतीतौ तात्पर्यार्थप्रतीतौ साधनमात्रम्, यथा पदार्थप्रतीतिर्वाक्यार्थ-प्रतीतौ साधनं तथैव, तदुक्तम् -

प्रागुक्तयुक्तिभिर्वाच्यव्यतिरिक्तस्य वस्तुनः सिद्धि कृता, स त्वर्थो व्यङ्ग्यतयैव कस्माद् व्यपदिश्यते? यत्र च प्राधान्येनावस्थानं तत्र वाच्यतयैवासौ व्यपदेष्टुं युक्तः। तत्परत्वाद् वाक्यस्य। अतश्च तत्प्रकाशिनो वाक्यस्य वाचकत्वमेव व्यापारः, किन्तस्य व्यापारान्तरकल्पनया? तस्मात् तात्पर्यविषयो योऽर्थः स तावन्मुख्यतया वाच्यः। या त्वन्तरा तथाविधे विषये वाच्यार्थन्तरप्रतीतिः सा तत्प्रतीतेरूपायमात्रम्, पदार्थप्रतीतिरिव वाक्यार्थप्रतीतेः।'[1]

कुमारिलभट्टेन श्लोकवार्तिके वाक्याधिकरणे कथितम् -

**वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।**
**पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्।।**[2]

अर्थात् पाके काष्ठानां ज्वाला यथा नान्तरीयकं भवति तथैव वाक्यार्थबोधे पदानामर्थप्रतिपादनमपि। ज्वालारूपमवान्तरव्यापारं विना यथा न पाकः तद्वत् पदार्थज्ञानरूपमवान्तरव्यापारं विना न वाक्यार्थबोधः। यथा - 'निःशेषच्युत........' इत्यादिपद्ये 'तदन्तिकमेव रन्तुं गतासि' इति वाक्यार्थस्य बोधे 'वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्' इत्यस्यावान्तरव्यापारत्वं, कारणं 'गतासि' इति विधिरूपार्थबोधनाय तत्र 'निःशेषच्युतः' इत्यादिशब्दोच्चारणं तथा 'यत्परः शब्दः स शब्दार्थः' इति सिद्धान्तः। इत्थं पदार्थवाक्यार्थन्यायो वाच्यव्यङ्ग्योः तैः (मीमांसकैः) स्वीकृत्य व्यञ्जनापलापो विहितः। तदुक्तं लोचनकारेण -

**वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।**
**पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्।।**

इति शब्दावगतैः पदार्थैस्तात्पर्येण योऽर्थ उत्थाप्यते स एव वाक्यार्थः, स एव च वाच्यः।[3]

---

1 का. 33 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः

2 श्लोकवार्तिके वाक्याधिकरणे

3 का. 33 व्याख्याने लोचने

अस्य खण्डने ध्वनिकारो वक्ति यत् 'पदार्थवाक्यार्थन्यायो वाच्यव्यङ्ग्ययोर्न भवति कारणं वाक्यार्थबोधे पदार्थस्य पृथक्तया भानं नास्ति व्यङ्ग्यबोधे तु वाच्यार्थस्याप्यवभासो भवति, तदुक्तम् – 'न हि व्यङ्ग्ये प्रतीयमाने वाच्यबुद्धिर्दूरी भवति, वाच्यावभासाविनाभावेन तस्य प्रकाशनात्'।[1] तथा घटप्रदीपन्यायो वाच्यव्यङ्ग्ययोः स्वीकृतः, तदुक्तम् –

'तस्माद् घटप्रदीपन्यायस्तयोः, यथैव हि प्रदीपद्वारेण घटप्रतीतावुत्पन्नायां न प्रदीपप्रकाशो निवर्तते तद्वद् व्यङ्ग्यप्रतीतौ वाच्यावभासः'।[2]

तदित्थं पूर्वमीमांसकानां 'यत्परः शब्दः स शब्दार्थः' प्रभृतिसिद्धान्तान् समवलम्ब्य तेषां खण्डनपुरस्सरं ध्वनिस्थापना ध्वनिकृता कृता, तेन पूर्वमीमांसायाश्चावदानं ध्वनिस्थापने वर्तते।

तदित्थं पूर्वोत्तरमीमांसावदानं ध्वनिस्थापने प्रकृताध्याये सविस्तरं प्रदर्शितम्।

◈ ◈ ◈

---

1 का. 33 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः

2 तत्रैव

# सङ्केताक्षरसूची

| | | |
|---|---|---|
| अ. | – | अध्यायः |
| का. | – | कारिका |
| का. प्र. | – | काव्यप्रकाशः |
| च. उ. | – | चतुर्थोद्योतः |
| तृ. उ. | – | तृतीयोद्योतः |
| तृ. प. | – | तृतीयपरिच्छेदः |
| तै. उ. | – | तैत्तिरीयोपनिषद् |
| द. प. | – | दशमपरिच्छेदः |
| द्वि. उ. | – | द्वितीयोद्योतः |
| द्वि. प. | – | द्वितीयपरिच्छेदः |
| ध्व. लो. | – | ध्वन्यालोकः |
| ना. शा. | – | नाट्यशास्त्रम् |
| प. | – | परिच्छेदः |
| पा. सू. | – | पाणिनिसूत्रम् |
| प्र. उ. | – | प्रथमोद्योतः |
| ब्र. का. | – | ब्रह्मकाण्डम् |
| मी. न्या. प्र. | – | मीमांसान्यायप्रकाशः |
| यो. सू. | – | योगसूत्रम् |
| वा. प. | – | वाक्यपदीयम् |
| व्या. लो. | – | व्याख्याने लोचने |
| श्लो. | – | श्लोकः |
| शि. दृ. | – | शिवदृष्टिः |
| सा. द. | – | साहित्यदर्पणः |
| सां. का. | – | सांख्यकारिका |
| सू. | – | सूत्रम् |

# विषयानुक्रमणिका


| विषयाः | पृष्ठाङ्काः |
|---|---|
| मङ्गलाचरणम् | |
| ♦ उपोद्घातः | i-xviii |
| ♦ सङ्केताक्षरसूची | |
| ♦ **प्रथमोऽध्यायः** | **1-22** |
| * ध्वनिकारस्य व्यक्तित्वकृतित्वयोः परिचयः | |
| * लोचनकारस्य व्यक्तित्वकृतित्वयोः परिचयः | |
| ♦ **द्वितीयोऽध्यायः** | **23-82** |
| * ध्वनिस्थापने व्याकरणशास्त्रस्यावदानम् | |
| ♦ **तृतीयोऽध्यायः** | **83-107** |
| * ध्वनिस्थापने काश्मीरशैवदर्शनस्यावदानम् | |
| ♦ **चतुर्थोऽध्यायः** | **108-132** |
| * ध्वनिस्थापने सांख्ययोगदर्शनयोरवदानम् | |
| ♦ **पञ्चमोऽध्यायः** | **133-152** |
| * ध्वनिस्थापने पूर्वोत्तरमीमांसादर्शनयोरवदानम् | |
| ♦ **उपसंहारः** | **153-158** |
| ♦ **परिशिष्टम्** | |
| * सन्दर्भग्रन्थसूची | **159-160** |

# प्रथमोऽध्यायः

**ध्वनिकारस्य व्यक्तित्वकृतित्वयोः परिचयः**

अथ सहृदयचक्रवर्तिनः परमदार्शनिकस्य प्रतीयमानानुप्राणित-काव्यनिर्माणनिपुणप्रतिभावतो ध्वनिसम्प्रदायस्य प्रवर्तकस्य आनन्दवर्धनाचार्यस्य विषये किं लिखामीति भ्रमति मे मनो, यतो हि एकत्र यो वाल्मीकिव्यासादिवत् उत्तर- कालीनेभ्यः साहित्यिकेभ्यः स्वसरस्वत्याः विलसने नर्तने वा रङ्गमर्पयति अपरत्र गुणालङ्कार[1]रीत्यादिभिः काव्यशरीरोपासकान् चार्वाककल्पान् भामह-दण्डी-वामन-प्रभृतीन् शङ्कराचार्य इव काव्यात्मतत्त्वव्याख्यानेन पराजयति।

आनन्दवर्धनस्य पितुर्नाम 'नोण' आसीत् स्वयं तेनैव देवीशतके प्रतिपादितमिदम्-

**देव्या स्वप्नोद्गमादिष्टदेवीशतकसञ्ज्ञया।**
**देशितोऽनुपमामाधादतो नोणसुतो नुतिम्।।[2]**

काश्मीरनरेशस्य 'अवन्तिवर्मणः' सभारत्नेष्वन्यतम आनन्दवर्धन आसीत्, तदुक्तं कल्हेण राजतरङ्गिण्याम् -

**मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः।**
**प्रथां रत्नाकरश्चागात्साम्राज्येऽवन्तिवर्मणः।।[3]**

अवन्तिवर्मणः शासनकालः 855ई. तः 883 ई. पर्यन्तमासीत्, अनेन स्पष्टं ज्ञायते यत् आनन्दवर्धनस्य कालः नवमशताब्द्यः मध्यकाल आसीत् (850 ई.)। एतत्तु बहिरङ्गप्रमाणम्। अन्तरङ्गप्रमाणं पश्यामस्तर्हि

---

1 काव्यं ग्राह्यमलङ्कारात्। रीतिरात्मा काव्यस्य।

2 देवीशतके 101 तमे पद्ये

3 राजतरङ्गिणी 5/34

ज्ञायते यत् ग्रन्थेऽस्मिन् (ध्वन्यालोके) वामनाचार्यस्य कीर्तनं वर्तते, वामनश्च स्वग्रन्थे (काव्यालङ्कारसूत्रे) शिशुपालवधम्, उत्तररामचरितम्, कादम्बरीप्रभृतीनामुदाहरणं प्रदर्शयामास। अनेन ज्ञायते यत् वामनस्य काल अष्टमशताब्द्यः पश्चिमार्द्धः नवमशताब्द्यः पूर्वार्धो वा आसीत् तथा लोचनेन ज्ञायते यत् नवमशताब्द्यः समाप्तौ भट्टनायको हृदयदर्पणे (स्वग्रन्थे) ध्वन्यालोकस्य खण्डनमकरोत्। तदित्थं ज्ञायते यत् आनन्दवर्धनस्य कालः वामन (नवमशताब्द्यः पूर्वार्धः) भट्टनायकयोः (नवमशताब्द्याः पश्चिमार्धः) मध्येऽस्ति। अस्मिन्नेव समये अवन्तिवर्मणः शासनमपि आसीत्, तस्य सभारत्नश्च आनन्दवर्धन आसीत्। तदित्थं आनन्दवर्धनस्य समयः नवमशताब्द्यः मध्यकाल आसीत् (850ई.)।

शास्त्रान्तराणामिव ध्वन्यालोकोऽपि त्रिषु विभागेषु निबद्धः, ते च कारिकावृत्तिनिदर्शनरूपाः। परं काव्यालोचकेषु महान् मतभेदोऽस्ति यदयं ग्रन्थो भिन्नकर्तृको वा एककर्तृको वा। तत्र भेदस्य मूलं लोचनव्याख्यानं, तत्र लोचनकारः कुत्रचित् कारिकाणां व्याख्याने 'कारिकाकारः' मूलकृत् वा लिलेख, वृत्तीनाञ्च व्याख्याने 'वृत्तिकारः' ग्रन्थकृत् वा लिलेख। ततश्च लोचनकारस्य शब्दानिमान् समवलोक्य विवेचकेषु भ्रान्तिरजनि यत् कारिकाकारो (मूलग्रन्थकारः) भिन्नो वृत्तिकारश्च भिन्नः। तत्र भेदवादीनां मते 'आनन्दवर्धनः' वृत्तिकारः सहृदयश्च कारिकाकारः। ततश्च लोचनकारेण बहुत्र ध्वन्यालोकस्य पर्यायत्वेन 'सहृदयालोकः' इति शब्दः प्रयुक्तः। यथा चतुर्णामुद्योतानां समाप्तौ 'इति श्रीमहामाहेश्वराचार्य-वर्याभिनवगुप्तोन्मीलिते सहृदयालोकलोचने ध्वनिसङ्केते प्रथम उद्योतः'। इति। तथैव द्वितीय-तृतीय-चतुर्थोद्योतेषु।

महामहोपाध्यायः श्री पी. वी. काणे स्वग्रन्थे History of Sanskrit Poetics (तृतीयसंस्करणे पृ. सं. 165) तानि स्थलानि विशेषतो दर्शयति येषु लोचने कारिकाकारवृत्तिकारयोः पृथक्-पृथगुल्लेखः। तद्यथा -

1. अत एव मूलकारिका साक्षात्तन्निराकरणार्था न श्रूयते। वृत्तिकृत्तु निराकृतमपि प्रमेयशय्यापूरणाय कण्ठेन तत्पक्षमनूद्य निराकरोति येऽपीत्यादिना। उक्त्या नीत्या 'यत्रार्थः शब्दो वा' इति सामान्यलक्षणं

प्रतिपादितम्। वक्ष्यमाणया तु नीत्या विशेषलक्षणं भविष्यति 'अर्थान्तरे सङ्क्रमितम्' इत्यादिना। तत्र प्रथमोद्योते ध्वनेः सामान्यलक्षणमेव कारिकाकारेण कृतम्। द्वितीयोद्योते कारिकाकारोऽवान्तरविभागं विशेषलक्षणं च विदधदनुवादमुखेन मूलविभागं द्विविधं सूचितवान्। तदाशयानुसारेण तु वृत्तिकृदत्रैवोद्योते मूलविभागमवोचत् 'स च द्विविधः' इति।[1]

2. वृत्तिकारः सङ्गतिमुद्द्योतस्य कुर्वाण उपक्रमते एवमित्यादि। 'प्रकाशितः' इति। मया वृत्तिकारेण सतेति भावः। न चैतन्मयोत्सूत्रमुक्तम्, अपितु कारिकाकाराभिप्रायेणेत्याह 'तत्रेति'। भवति मूलतो द्विभेदत्वं कारिकाकारस्यापि सम्मतमेवेति भावः।[2]

3. उक्तमेव ध्वनिस्वरूपं तदाभासविवेकहेतुतया कारिकाकारोऽनु-वदतीत्यभिप्रायेण वश्त्तिकृदुपस्कारं ददाति 'यत' इति।[3]

4. एतत्तावत्त्रिभेदत्वं न कारिकाकारेण कृतम्। वृत्तिकारेण तु दर्शितम्। न चेदानीं वृत्तिकारो भेदप्रकटनं करोति। ततश्चेदं कृतमिदं क्रियत इति कर्तृभेदे का सङ्गतिः?[4]

5. कारिकाकारेण पूर्वं व्यतिरेक उक्तः। न च सर्वथा न कर्तव्योऽपि तु बीभत्सादौ कर्तव्य एवेति पश्चादन्वयः। वृत्तिकारेण त्वन्वयपूर्वको व्यतिरेक इति शैलीमनुसर्तुमन्वयः पूर्वमुपात्तः।[5]

6. प्रतिपादितमेवैषामालम्बनम् इति वृत्तिकारोक्तस्य व्याख्याने लोचनकारो व्याचष्टे 'प्रतिपादितमेवेति अस्मन्मूलग्रन्थकृतेत्यर्थः'।[6]

7. 'एवमादौ च विषये यथौचित्यात्यागस्तथा दर्शितमेवाग्रे' इति वृत्तिका-रोक्तस्य व्याख्याने लोचनकारो व्याचष्टे ''दर्शितमेवेति कारिकाकारेणेति

---

1 कारिका 19 व्याख्याने लोचने प्रथमोद्योते

2 द्वितीयोद्योतस्य प्रारम्भ एव कृते वृत्तेर्व्याख्याने लोचने।

3 का. 33 व्याख्याने लोचने द्वि. उ.

4 का. 1 व्या. लो. तृ. उ.

5 का. 3-4 व्या. लो. तृ. उ.

6 का. 5 व्या. लो. तृ. उ.

भूतप्रत्ययः। वक्ष्यते च 'अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्'' इत्यादि।[1]

8. यद्यप्यर्थानन्त्यमात्रे हेतुर्वृत्तिकारेणोक्तः तथापि कारिकाकारेण नोक्त इति भावः।[2]

तदित्थं बहुभिर्लोचनांशैस्तथा बाह्याभ्यान्तरसाक्ष्यैः श्री पी. वी. काणेप्रभृतयो भिन्नकर्तृकत्वं ध्वन्यालोकस्य साधयन्ति।

परं डॉ. सातकरो मुकर्जी (भूतपूर्वसंस्कृतविभागाध्यक्षः कलकत्ता-विश्वविद्यालयः) प्रभृतयो विद्वांसः सयुक्तिकं भिन्नकर्तृत्ववादीनां मतं निरस्य 'अभिन्नकर्तृकत्वं ध्वन्यालोकस्य' स्थिरीकुर्वन्ति। तदयमत्र तेषां (अभिन्नकर्तृत्ववादीनां)। युक्तिसन्दोहः।

1. प्रथमोद्योते वृत्तौ ध्वनेर्भेदद्वयं दृश्यते न तु कारिकायां तथा द्वितीयोद्योते प्रथमकारिकायां प्रथमध्वनिभेदस्य (अविवक्षितवाच्यध्वनेः) अवान्तरभेदद्वयं कारिकाकारः करोति।[3] तदुक्तम् -

**अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम्।**
**अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम्।।**[4]

यद्युभयोः कर्तारौ भिन्नौ तर्हि कथं कारिकाकारो ध्वनेर्मूलभेदद्वयमनुक्त्वा तस्यावान्तरभेदद्वयं प्रकाशयति कथं वा सहसैव (अकस्मात्) अविवक्षित-वाच्यध्वने र्भेदद्वयप्रकरणस्य सङ्गतिः। ततश्च अभिन्नकर्तृकत्वं सुस्पष्टम्।

2. तृतीयोद्योते प्रथमकारिकायाः समाप्तौ लोचनकारो लिखति 'एवं कारिकां व्याख्याय तदसङ्गृहीतमलक्ष्यक्रमव्यङ्ग्यं प्रपञ्चयितुमाह 'यस्त्विति'[5]। तथैव चित्रकाव्यस्य वर्णनप्रसङ्गे एकचत्वारिंशत्तमायाः कारिकायाः प्रारम्भे लोचनकारो लिखति 'एवं व्यङ्ग्यस्वरूपं निरूप्य सर्वथा यत्तच्छून्यं तत्र का वार्तेति निरूपयितुमाह - 'प्रधानेत्यादिना' कारिकाद्वयेन।[6]

---

1 का. 5 व्या. लो. तृ. उ.

2 का. 4 भूमिकाव्याख्याने लोचने चतुर्थोद्योतः

3 अस्ति ध्वनिः स चासावविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविधः सामान्येन। का. 13 वृत्तौ प्र. उ.

4 द्वि. उ. का. 1

5 तृ. उ. का. 2 व्या. लो.

6 तृ. उ. का. 41-42 व्या. लो.

तदत्र क्रमेण 'व्याख्याय' एवं 'निरूप्य' इत्याभ्यां शब्दाभ्यां कारिकाकारवृत्तिकारयोः एकत्वं सुस्पष्टमेव।[1] कारणं येन पुरुषेण कारिकायाः व्याख्यानङ्कृतं तेनैव सम्प्रति असङ्गृहीतालक्ष्यक्रमव्यङ्ग्यस्य प्रपञ्चः क्रियते। 'यस्त्वलक्ष्यक्रमव्यङ्ग्यः' इत्युक्त्वा 'यत्र व्यङ्ग्यमेव नास्ति तत्र का व्यवस्था' इत्यस्य निरूपणं कुर्वन् स एवाह 'प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते।' इत्यादिना।

स्वयं लोचनकृता नाट्यशास्त्रव्याख्याने गदितम् -

'स्वशब्दानभिधेयत्वं हि रसादीनां ध्वनिकारादिभिर्दर्शितम्। तच्च मदीयादेव तद् विवरणात् सहृदयालोकलोचनादवधारणीयमिह तु यथावसरं वक्ष्यत एव।'[2] तथैवाग्रे -

'एतमेवार्थं सम्यगानन्दवर्धनाचार्योऽपि विविच्य न्यरूपयत्।' 'ध्वन्यात्मभूते'[3] इत्युक्त्वा क्रमेण 'विवक्षा तत्परत्वेन'[4] इत्यादिना ग्रन्थसन्दर्भेण सोदाहरणेन। तच्चास्माभिः सहृदयालोकलोचने तद्विवरणे विस्तरतो व्याख्यातमिति।[5]

प्रथमे व्याख्याने वृत्तिकारत्वेन ध्वनिकारस्योल्लेखः कारणं स्वशब्दानभिधेयत्वं रसस्य विस्तरतो वृत्तौ प्रतिपादितं प्रथमोद्योते।[6]

द्वितीये व्याख्याने कारिकाकारत्वेन आनन्दवर्धनस्योल्लेखः। तदित्थं लोचनकारस्य व्याख्यानेनापि अभिन्नकर्तृकत्वं ध्वन्यालोकस्य सुस्पष्टमेव।

**प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।**
**काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥**[7]

---

1 समानकर्तृकयोः पूर्वकाले। पा. सू. 3/4/21। समानकर्ता ययोः धात्वर्थयोस्तत्र पूर्वकाले धात्वर्थे वर्तमानाद् धातोः क्त्वा प्रत्ययो भवति। काशिकावृत्तिः।

2 ना. शा. अ. 7

3 ध्व. उ. 2 का. 17

4 तत्रैव का. 18

5 ना. शा. अ. 16

6 तृतीयस्तु रसादिलक्षणः प्रभेदो वाच्यसामर्थ्याक्षिप्तः प्रकाशते न तु साक्षाच्छब्दव्यापारविषय इति वाच्याद्विभिन्न एव। का. 4 वृत्तौ प्र. उ.

7 द्वि. उ. का. 5

अत्र 'मे मतिः' इत्यस्य व्याख्याने वृत्तौ स्पष्टं लिखितं यत् 'इति मामकीनः पक्षः' यद्युभयोः कर्तारौ भिन्नौ स्यातां तर्हि 'इति कारिकाकारस्य पक्षः' इत्यादि व्याख्यानं विहितं स्यात् न च तद्दृश्यते। ततश्च नास्ति कर्तृभेदः।

लोचनकारस्य समकालीनो महिमभट्टोऽपि स्वग्रन्थे (व्यक्तिविवेके) अभिन्नकर्तृकत्वं ध्वन्यालोकस्य मनुते तथैव खण्डयति च। तत्र 'यत्रार्थः शब्दो वा....'[1] इत्यस्य व्याख्याने वृत्तौ लिखितं 'अर्थो वाच्यविशेषः' इति। अत्र कुन्तको लिखति 'अर्थो वाच्यविशेष इति स्वयं विवृतत्वाच्च' इत्थं कुन्तकोऽपि कर्तृभेदं न मनुते। अन्येऽपि परवर्तिनः साहित्यदर्पणकारप्रभृतयः कर्तृभेदं न मन्वते।

ग्रन्थसमाप्तौ स्वयं ध्वनिप्रतिष्ठापकेन 'आनन्दवर्धनेन' स्पष्टं निर्दिष्टं यत्–

**इति काव्यार्थविवेको योऽयं चेतश्चमत्कृतिविधायी।**
**सूरिभिरनुसृतसारैरस्मदुपज्ञो न विस्मार्य्यः॥**

अयं काव्यार्थविवेक अस्मदुपज्ञ अत्र 'अस्मदुपज्ञः' शब्देन नितरां सर्वासां विमतीनां निराकरणं भवति कारणं न जातु तादृशाः पराकाष्ठामधि रूढाः सरस्वत्युपासका मिथ्यां वदन्ति। तथैवाग्रे कथितम्–

**इत्यक्लिष्टरसाश्रयोचितगुणालङ्कारशोभाभृतो**
**यस्माद्वस्तु समीहितं सुकृतिभिः सर्वं समासाद्यते।**
**काव्याख्येऽखिलसौख्यधाम्नि विबुधोद्याने ध्वनिर्दर्शितः**
**सोऽयं कल्पतरुपमानमहिमा भोग्योऽस्तु भव्यात्मनाम्॥**[2]

लोचनकारोऽत्र व्याचष्टे 'इतीति कारिकातद्वृत्तिनिरूपण-प्रकारेणेत्यर्थः'। लोचनकारो ब्रूते कारिका तद्वृत्तिनिर्माणेन च ध्वनिर्दर्शितः (आनन्दवर्धनाचार्येण)। अनेन ज्ञायते लोचनकारस्यापि मते आनन्दवर्धन एव कारिकातद्वृत्तेश्च रचयिता। तथा अन्तिमे श्लोके आनन्दवर्धनेनोक्तम्–

---
1 का. 13 ध्व. लो. प्र. उ.

2 चतुर्थोद्योतसमाप्तौ

**सत्काव्यतत्त्वनयवर्त्मचिरप्रसुप्त**
**कल्पं मनस्सु परिपक्वधियां यदासीत्।**
**तद्व्याकरोत्सहृदयोदयलाभहेतो**
**रानन्दवर्धन इति प्रथिताभिधानः॥**[1]

आनन्दवर्धन इति प्रथितं विश्रुतम् अभिधानं नाम यस्य स सहृदयानामुदयलाभहेतोः परिपक्वधियां मनस्सु चिरात् प्रसुप्तप्रायं यत् सत्काव्यतत्त्वस्य नयवर्त्म आसीत् तद् वर्त्म व्याकृत्य प्रादर्शयत्। ध्वनिकारेण प्रारम्भे या प्रतिज्ञा कृता 'सहृदयमनः प्रीतये तत्स्वरूपं ब्रूमः'[2] तस्या निर्वाहो ग्रन्थसमाप्तौ विहितः 'तद् व्याकरोत्सहृदयोदयलाभहेतोः' इत्यादिना। अनेनापि एककर्तृकत्वं ध्वन्यालोकस्य सुतरां सिद्धम्।

यद्यपि भिन्नाभिन्नकर्तृत्ववादीनां स्वस्वपक्षसिद्धये बह्वयो युक्त्यः तथापि साहित्यपरम्परा किम्वा आचार्यपरम्परा एककर्तृकत्वं ध्वन्यालोकस्य मनुते। भिन्नकर्तृत्ववादीनामाधारो लोचनव्याख्यानमेव यत्र कारिकाकारस्य कृते 'कारिकाकारः' इत्यादिपदेन व्यपदेशः तदतिरिक्तं न किमपि तेषां प्रमाणम्। वस्तुतो ग्रन्थस्य सङ्गतिं कुर्वन्नेव लोचनकृत् कारिकाकारः, मूलग्रन्थकृद्, वश्त्तिकारः, ग्रन्थकृद् वा लिलेख। आचार्याणां परम्परा वर्तते यत् ते पूर्वं सूत्ररूपेण 'कारिकां' व्याख्यानरूपेण च 'वृत्तिं' कृत्वा उदाहरणं प्रयच्छन्ति। काव्यप्रकाश–साहित्यदर्पण–रसगङ्गाधरादिषु परिपाटीयं दृश्यते, ध्वन्यालोकेऽपि तथैव वर्तते। किम्बहुना परवर्तिनः समेऽपि मम्मटकुन्तकविश्वनाथ–जगन्नाथप्रभृतयः साहित्यिका ध्वनिकारत्वेन आनन्दवर्धनस्य निर्देशं कुर्वन्ति। स्वयं लोचनकारस्तथा आनन्दवर्धनोऽपि ब्रवीति, अनेन एककर्तृकत्वं ध्वन्यालोकस्य स्पष्टमेव।

**ध्वनिकारस्य कृतयः**

आनन्दवर्धनेन प्रायशः सर्वाणि शास्त्राणि अधिगतानि, तत्र व्याकरणस्य सर्वप्रधानता मुक्तकण्ठेन ध्वन्योलोके समुद्घोषिता यत् –

'प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात्सर्वविद्यानाम्'।[3]

1 चतुर्थोद्योतसमाप्तौ

2 का. 1 प्रथमोद्योतः

3 का. 13 इत्यत्र सूरिभि कथितः इत्यस्य व्याख्याने प्रथमोद्योतः

तत्र ध्वनिकारस्य षट् कृतयः सन्ति, तद्यथा – (1) ध्वन्यालोकः (2) देवीशतकम् (3) विषमबाणलीला (4) अर्जुनचरितं महाकाव्यम् (5) तत्त्वालोकः (6) धर्मोत्तमा विवृतिः / प्रमाणविनिश्चयविवृतिः।

एषु 'विषमबाणलीला' तथा 'अर्जुनचरितं महाकाव्यम् इत्यनयोः प्राप्तिर्न भवति, तथापि ध्वन्यालोके तयोर्निर्देशः स्वयं ध्वनिकृता कृतः। सम्प्रति संक्षेपेण तासां कृतीनां परिचयः प्रस्तूयते।

**ध्वन्यालोकः**

अथ साहित्यशास्त्राकाशसूर्यमणेर्ध्वन्यालोकस्य विषये किं लिखामीति भ्रमति मे चेतः कारणं ग्रन्थोऽयं पूर्वप्रचलितान् साहित्यसम्प्रदायान् व्यवस्थीकृत्य सकलसत्कविकाव्योपनिषद्भूतम्, अतिरमणीयम्, अणीयसीभिरपि चिरन्तनकाव्यलक्षणविधायिनां बुद्धिभिरनुन्मीलितपूर्वं ध्वनेः स्वरूपं प्रकाशयति। काव्यात्मभूतं रसं च पूर्वग्रन्थग्रन्थिभिर्मोचयित्वा तस्य वास्तविकं परिचयं कारयति तथा गुणालङ्काररीत्यादीनां सम्यक् सम्बन्धो रसेन सह स्थापयति। तद्यथा –

**तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।**
**अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत्।।**[1]

ग्रन्थेऽस्मिन् गुणालङ्कारादीनां बाह्यावयवता प्रख्याप्य व्यङ्ग्यस्य आत्मरूपता स्थिरीकृता, तदुक्तम्–

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।।**[2]

ग्रन्थोऽयं चतुर्षु उद्योतेषु विभक्तः, तत्र प्रथमोद्योते ध्वनिकृता प्रतिज्ञा कृता 'सहृदयमनः प्रीतये ध्वनिस्वरूपं ब्रूमः'[3] तदनु विस्तरतो विमतीनां (ध्वनिविषयकाणां) निरसनपुरस्सरं तत्स्वरूपं निरूपयता लावण्यमिव व्यङ्ग्यार्थो विबोधितः[4] तद्यथा लावण्यम् अङ्गसंस्थानेनाभिव्यक्तं सद् तद्भिन्नं

---

1 6/2 द्वितीयोद्योतः

2 5/1 प्रथमोद्योतः

3 काव्यस्यात्मा .... का. 1 प्रथमोद्योतः

4 प्रतीयमानं .... का. 4 प्रथमोद्योतः

तथैव व्यङ्ग्यार्थोऽपि वाच्येनाभिव्यक्तः सन् वाच्यविभिन्नः। अस्मिन्नेव क्रमे वाच्यतो व्यङ्ग्यस्य स्वरूपभेदो[1] विषयभेदश्च[2] प्रदर्शितः। तस्य सत्ता च महाकवीनां वाणीषु वर्तते, तथा कविप्रतिभया तस्य अविनाभावसम्बन्धो बोधितः –

**सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।**
**अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्।।**[3]

काव्यार्थतत्त्वज्ञानां केवलं तस्य वेदनं न तु शब्दार्थशासनज्ञानां[4] तथा स व्यङ्ग्यार्थोऽस्ति तद्व्यञ्जकश्च कश्चन एव शब्दो न शब्दमात्रम्।[5] तेन तावेव शब्दार्थौ महाकवेः प्रत्यभिज्ञेयौ कारणं 'व्यङ्ग्यव्यञ्जकाभ्यामेव सुप्रयुक्ताभ्यां महाकवित्वलाभो महाकवीनाम्।[6] तत्सत्तां प्रतिपाद्य तत्स्वरूपं कथयति यत् –

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।**[7]

अर्थात् यस्मिन् काव्ये वाच्यार्थः स्वात्मानं वाचकश्च स्वाभिधेयं गौणीकृत्य तं पूर्वप्रकान्तं व्यङ्ग्यार्थं प्रकाशयति सः काव्यविशेषः सूरिभि-वैयाकरणमतानुसारिभिः काव्यतत्त्वार्थदर्शिभिर्ध्वनिः कथितः। ध्वनिपदस्य प्रयोगे ध्वनिकारेण (आनन्दवर्धनेन) व्याकरणं प्रति अधमर्णता स्वीकृता। तत्र व्याकरणे ध्वनिर्नाम स शब्दो नादो वा भवति यः स्फोटस्य व्यञ्जकस्तथैवात्र साहित्यनये ध्वनिः स काव्यविशेषः कथितो यो व्यङ्ग्यार्थस्य व्यञ्जको भवति। तदुक्तं ध्वनिकृता–

'सूरिभिः कथितः' इति विद्वदुपज्ञेयमुक्तिः न तु यथाकथञ्चित् प्रवृत्तेति प्रतिपाद्यते। प्रथमे हि विद्वांसो वैयाकरणाः व्याकरणमूलत्वात्

1 स हि कदाचिद् वाच्ये विधिरूपे प्रतिषेधरूपः। यथा भ्रमधार्मिकवृत्तौ। का. 4
2 क्वचिद् वाच्याद् विभिन्नविषयत्वेन व्यवस्थापितो यथा 'कस्य का वा न'। तत्रैव
3 का. 6 प्रथमोद्योतः
4 का. 7 प्रथमोद्योतः
5 का. 8 प्रथमोद्योतः
6 का. 8 वृत्तौ प्रथमोद्योतः
7 का. 13 प्रथमोद्योतः

सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः।"[1]

द्वितीयोद्योते व्यङ्ग्यमुखेन ध्वनेः सप्रभेदभेदानां प्रदर्शनं तथा रसवदलङ्कारतो ध्वनेर्विविक्तविषयस्य विस्तरतो विवेचनं कृतम्। तथाहि यत्र विविधात्मनां शब्दार्थालङ्काराणां रसादिपरता स ध्वनेर्विषयः तदुक्तम् –

**वाच्यवाचकचारुत्वहेतूनां विविधात्मनाम्।**
**रसादिपरता यत्र स ध्वनेर्विषयो मतः॥**[2]

तथा यत्र अन्यार्थो 'रसवस्त्वलङ्काररूपः' वाक्यार्थीभूतः तस्य चाङ्गभूता रसभावतदाभासादयस्तत्र रसवदलङ्कारः तदुक्तम् –

**प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः।**
**काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥**[3]

तस्मिन्नेवोपक्रमे ध्वनिकृता सर्वप्रथमं 'गुणालङ्कारयोराश्रयभेदेन भेदः' इति न्यरूपि तथाहि शौर्यादय इव येऽङ्गिनं रसमवलम्बन्ते ते गुणास्तथा कटकादय इव ये पुनरङ्गाश्रितास्तेऽलङ्काराः तदुक्तम् –

**तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।**
**अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत्॥**[4]

तदनु क्रमेण माधुर्यौजःप्रसादगुणानां[5] वर्णनं तथा 'दोषाणां नित्यानित्य-व्यवस्थानां कारणं रस एव' इत्यस्य विवेचनं तथाहि ध्वन्यात्मन्येव शृङ्गारे श्रुतिकटुत्वादिदोषो नान्यत्र, ततश्च नायं श्रुतिकटुदोषो नित्यदोषः प्रत्युत अनित्य- दोषः तथैव दोषान्तराणामपि नित्यानित्यता तदुक्तम् –

**श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः।**
**ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः॥**[6]

---

1 का. 13 व्याख्याने वृत्तौ प्रथमोद्योतः
2 4/2 द्वितीयोद्योतः
3 5/2 द्वितीयोद्योतः
4 6/2 द्वितीयोद्योतः
5 7,8,9,10/2 द्वितीयोद्योतः
6 11/2

तदनु विस्तरतो केषां शब्दार्थालङ्काराणां कथं कुत्र निवेशनम् इत्यस्य निरूपणम्।[1] यत्र व्यङ्ग्यः पुनः कविना स्वोक्त्या प्रकाश्यते न स ध्वनेर्विषयः परं सान्यैवालङ्कृतिः तदुक्तम् –

**शब्दार्थशक्त्याक्षिप्तोऽपि व्यङ्ग्योऽर्थः कविना पुनः।**
**यत्राविष्क्रियते स्वोक्त्या सान्यैवालङ्कृतिर्ध्वनेः॥**[2]

तृतीयोद्योते पुनर्व्यञ्जकमुखेन ध्वनेः सप्रभेदभेदानां वर्णनं तथा 'असंलक्ष्यक्रमव्यङ्ग्यध्वनिर्वर्णपदवाक्यसंघटनाप्रबन्धादिषु प्रकाशते' इत्यस्य विस्तरतो वर्णनं तदुक्तम् –

**यस्त्वलक्ष्यक्रमव्यङ्ग्यो ध्वनिर्वर्णपदादिषु।**
**वाक्ये संघटनायां च स प्रबन्धेऽपि दीप्यते॥**[3]

संघटनाया विवेचने ध्वनिकारो नवीनतया दोषस्य प्रदर्शनं कृतवान्। सः कथयति –

'द्विविधो हि दोषः कवेरव्युत्पत्तिकृतो अशक्तिकृतश्च। तत्राव्युत्पत्तिकृतो दोषः शक्तितिरस्कृतत्वात् कदाचिन्न लक्ष्यते। यस्त्वशक्तिकृतो दोषः स झटिति प्रतीयते। परिकरश्लोकश्चात्र –

**अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः।**
**यस्त्वशक्तिकृतस्तस्य स झटित्यवभासते॥**[4]

प्रबन्धे चासंलक्ष्यक्रमव्यङ्ग्यस्य यथा प्रकाशनं भवेत् तस्य सोदाहरणं विस्तरतो विवेचनम्।[5] तस्मिन्नवसरे औचित्यस्य सर्वप्राधान्यं ध्वनिकृता स्थापितं यत्–

**अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।**
**प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा॥**[6]

1 18,19/2
2 23/2
3 2/3
4 का. 6 वृत्तौ तृतीयोद्योतः
5 10,11,12,13,14 का. तृतीयोद्योतः
6 का. 14 वृत्तौ तृतीयोद्योतः

अस्मिन्नेवावसरे ध्वनिकृता सूक्ष्मेक्षिकया सुप्-तिङ्-सम्बन्ध -समासादीनाम् अपि व्यञ्जकता सोदाहरणं प्रदर्शिता तदुक्तम् –

**सुप्-तिङ्-वचन-सम्बन्धैस्तथा कारकशक्तिभिः।**
**कृत्-तद्धित-समासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित्।।**[1]

तदनु विरोधिरसानां विस्तरेण विरोधाभावप्रकारः प्रदर्शितः। तदनन्तरं व्यञ्जना-स्थापना ध्वनिकृता कृता तथा घटप्रदीपन्यायो वाच्यव्यङ्ग्ययोः स्वीकृतः। यथैव हि प्रदीपद्वारेण घटप्रतीतावुत्पन्नायां न प्रदीपप्रकाशो निवर्तते तद्वद् व्यङ्ग्यप्रतीतौ वाच्यावभासः।'[2]

उद्योतान्ते च ललनालावण्यप्रख्यस्य व्यङ्ग्यस्य वाच्यानुगमे सति गुणीभूतव्यङ्ग्यतोक्ता यत्-

**प्रकारोऽन्यो गुणीभूतव्यङ्ग्यः काव्यस्य दृश्यते।**
**यत्र व्यङ्ग्यान्वये वाच्यचारुत्वं स्यात् प्रकर्षवत्।।**[3]

किञ्चायं गुणीभूतव्यङ्ग्योऽपि काव्यप्रकारो रसादिपर्यालोचनया पर्यन्ते ध्वनिरूपतां प्राप्नोति तदुक्तम्-

**प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम्।**
**धत्ते रसादितात्पर्यपर्यालोचनया पुनः।।**[4]

व्यङ्ग्यस्य प्राधान्याप्राधान्याभ्यां ध्वनिगुणीभूतव्यङ्ग्यरूपं काव्यद्वयं भवति।[5] यत्र च कवेः तात्पर्यं न तयोर्ध्वनिगुणभूतव्यङ्ग्ययोस्तत्र रसभावादिविषयविवक्षाविरहे सति य अलङ्कारनिबन्धः स चित्रकाव्यस्य विषयस्तदुक्तम् –

**रसभावादिविषयविवक्षाविरहे सति।**
**अलङ्कारनिबन्धो यः स चित्रविषयो मतः।।**[6]

1 16/3
2 का. 33 वृत्तौ तृतीयोद्योतः
3 35/3
4 41/3
5 42/3
6 का. 43 वृत्तौ

चतुर्थोद्योते पुनर्ध्वनेः प्रपञ्चस्य प्रयोजनमाह–

**ध्वनेर्यः सगुणीभूतव्यङ्ग्यस्याध्वा प्रदर्शितः।**
**अनेनानन्त्यमायाति कवीनां प्रतिभागुणः॥**[1]

यद्यपि व्यङ्ग्यव्यञ्जकभावो बहुप्रकारकस्तथापि एकस्मिन्नेव रसादिमये प्रकारे कवेः प्रवृत्तिः स्यात्, तदुक्तम् – 'प्रबन्धे चाङ्गी रस एक एवोपनिबध्यमानोऽर्थविशेषलाभं छायातिशयञ्च पुष्णाति। कस्मिन्निवेति चेत् यथा रामायणे यथा वा महाभारते। रामायणे हि करुणो रसः स्वयमादिकविनासूत्रितः 'शोकः श्लोकत्वमागतः' इत्येवंवादिना। निर्व्यूढश्च स एव सीतात्यन्तवियोगपर्यन्तमेव स्वप्रबन्धमुपरचयता।

महाभारतेऽपि शास्त्रकाव्यरूपच्छायान्वयिनि वृष्णिपाण्डवविरवसानवैमनस्यदायिनीं समाप्तिमुपनिबध्नता महामुनिना वैराग्यजननतात्पर्यं प्राधान्येन स्वप्रबन्धस्य दर्शयता मोक्षलक्षणः पुरुषार्थः शान्तो रसश्च मुख्यतया विवक्षाविषयत्वेन सूचितः। एतच्चांशेन विवृतमेवान्यैर्व्याख्याविधायिभिः। स्वयं चैतदुद्गीर्णं तेनोदीर्णमहामोहमग्नमुज्जिहीर्षता लोकमतिविमलज्ञानालोकदायिना लोकनाथेन–

**यथा यथा विपर्येति लोकतन्त्रमसारवत्।**
**तथा तथा विरागोऽत्र जायते नात्र संशयः॥**

इत्यादि बहुशः कथयता। ततश्च शान्तो रसो रसान्तरैः, मोक्षलक्षणः पुरुषार्थः पुरुषार्थान्तरैस्तदुपसर्जनत्वेनानुगम्यमानोऽङ्गित्वेन विवक्षाविषय इति महाभारततात्पर्यं सुव्यक्तमेवावभासते।[2]

अन्ते कवीन् निर्दिशति यत् भवद्भिः काव्यानि कर्तव्यानि तथेत्थं न विचारणीयं यत् प्राक्तनैः कविभिः तु तुल्यार्थानि काव्यानि रचितानि ततश्च किं मदीयैः काव्यैः, कारणं परस्वादानेच्छाविरतमनसः कवेः स्वयं भगवती सरस्वती यथेष्टं वस्तु घटयति।[3]

अन्ते ध्वनिकारो वदति यो मार्गः (ध्वनिमार्गः) चिरात् सुप्तप्रायो

---

1 1/4
2 का. 5 ध्व. लो. च. उ.
3 का. 17 ध्व. लो. च. उ.

विद्वेषु आसीत् तस्य प्रकाशनं सहृदयानामभिवृद्धये मया आनन्दवर्धनेन कृतं तदुक्तम्–

**सत्काव्यतत्त्वनयवर्त्मचिरप्रसुप्त**
**कल्पं मनस्सु परिपक्वधियां यदासीत्।**
**तद्व्याकरोत्सहृदयोदयलाभहेतो**
**रानन्दवर्धन इति प्रथिताभिधानः॥**[1]

तदित्थं ध्वन्यालोके सयुक्तिकं ध्वनेर्लक्षणस्थापनाप्रयोजनादिकं ध्वनिकारेण प्रकाशितम्।

**देवीशतकम्**

शतकेऽस्मिन् ध्वनिकारेण भगवत्याः स्तुतिः कृता। यमकश्लेषचित्र–बन्धादीनां चमत्कारोऽप्यत्र दृश्यते। अत्रैव च शतके ध्वनिकारस्य पितुर्नाम (नोण) दृश्यते स्वयं तेनैवोक्तम् –

**देव्या स्वप्नोद्गमादिष्टदेवीशतकसंज्ञया।**
**देशितोऽनुपमामाधादतो नोणसुतो नुतिम्॥**[2]

**विषमबाणलीला**

महाकाव्यस्यास्य प्राप्तिर्न भवति केवलं ध्वन्यालोके कुत्रचित् कानिचित् पद्यानि महाकाव्यस्यास्य दृश्यन्ते, तद्यथा –

यथा च ममैव विषमबाणलीलायाम्

**ताला जाअन्ति गुणा जाला दे सहिअएहिँ घेप्पन्ति।**
**रइकिरणानुग्गहिआइँ होन्ति कमलाइँ कमलाइँ॥**[3]

यथा वा ममैव विषमबाणलीलायामसुरपराक्रमणे कामदेवस्य

**तं ताण सिरिसहोअररअणाहरणम्मि हिअअमेक्करसम्।**
**बिम्बाहरे पिआणं णिवेसिअं कुसुमबाणेन॥**[4]

---

1 का. 17 वृत्तौ ध्व. लो. च. उ.

2 देवीशतकम् श्लो. 101

3 का. 1 वृत्तौ द्वि. उ.

4 का. 27 वृत्तौ द्वि. उ.

तृतीयोद्योते पुनर्वदति यत् ध्वनेरनुरणनरूपव्यङ्ग्योऽपि यः प्रभेद उदाहृतो द्विप्रकारः सोऽपि प्रबन्धेषु केषुचिद् द्योतते। तद्यथा मधुमथनविजये पाञ्च- जन्योक्तिषु। यथा वा ममैव कामदेवस्य सहचरसमागमे विषमबाणलीलायाम्।[1] अत्र लोचनकारो विषमबाणलीलायाः पद्यं निर्दिशति यत् -

**मिअवहण्डिअरोरो णिरङ्कुसो अविवेअरहिओ वि।**
**सविण वि तुमम्मि पुणोवन्ति अ अतन्ति पंमुसिम्मि॥**

तथैव पुनः चतुर्थोद्योते वदति यत् - 'दर्शितमेव चैतद्विषमबाणलीलायाम् -

**ण अ ताण घडइ ओही ण अ ते दीसन्ति कह वि पुनरुत्ता।**
**जे विब्भमा पिआणं अत्था वा सुकइवाणीणम्॥**[2]

तथा महाकाव्येऽस्मिन् अचेतनानां चेतनवद्व्यवहारो भूयसा दृश्यते स्वयं ध्वनिकृतोक्तं 'अयमपरश्चावस्थाभेदप्रकारो यदचेतनानां सर्वेषां चेतनं द्वितीयं रूपमभिमानित्वप्रसिद्धं हिमवद्गङ्गादीनाम्। ... प्रसिद्धश्चायं सत्कवीनां मार्गः। इदं च प्रस्थानं कविव्युत्पत्तये विषमबाणलीलायां सप्रपञ्चं दर्शितम्।'[3]

**अर्जुनचरितं महाकाव्यम्**

अस्यापि महाकाव्यस्योल्लेखो ध्वन्यालोक एव दृश्यते तद्यथा चतुर्दशकारिकायां वृत्तौ ध्वनिकृतोक्तं 'इदमपरं प्रबन्धस्य रसाभिव्यञ्जकत्वे निबन्धनम्। इतिवृत्तवशायातां कथञ्चिद्रसाननुगुणां स्थितिं त्यक्त्वा पुनरुत्प्रेक्ष्या-प्यन्तराभीष्टरसोचितकथोन्नयो विधेयः। यथा कालिदासप्रबन्धेषु। यथा च सर्वसेनविरचिते हरिविजये। यथा च मदीय एवार्जुनचरिते महाकाव्ये।'[4]

तथैव रसानामविरोधसम्पादने ध्वनिकृतोक्तं 'विपक्षविषये हि भयाति-शयवर्णने नायकस्य नयपराक्रमादिसम्पत् सुतरामुद्योतिता भवति। एतच्च मदीयेऽर्जुनचरितेऽर्जुनस्य पातालावतरणप्रसङ्गे वैशद्येन प्रदर्शितम्।[5]

इत्थं महाकाव्येऽस्मिन् पराक्रमातिशयोऽर्जुनस्य वर्णितः।

---

1 का. 15 तृ. उ.
2 का. 7 वृत्तौ 4 उद्योते
3 का. 7 वृत्तौ च. उ.
4 का. 14 वृत्तौ तश. उ.
5 का. 25 वृत्तौ तत्रैव

**तत्त्वालोकः**

आनन्दवर्धनाचार्यो महान् दार्शनिकोऽपि आसीत्। तथा चायं ग्रन्थः (तत्त्वालोकः) अद्वैतवेदान्तसम्बद्धो वर्तते, तदुक्तं व्यञ्जनास्थापनावसरे लोचनकृता 'येऽप्यविभक्तं स्फोटं वाक्यं तदर्थं चाहुः, तैरप्यविद्यापदपतितैः सर्वेयमनुसरणीया प्रक्रिया। तदुत्तीर्णत्वे तु सर्वं परमेश्वराद्वयं ब्रह्मेत्यस्मच्छास्त्रकारेण न न विदितं तत्त्वालोकग्रन्थं विरचयतेत्यास्ताम्।[1]

'एतच्च ग्रन्थकारेण तत्त्वालोके वितत्योक्तमिह त्वस्य न मुख्योऽवसर इति नास्माभिर्दर्शितम्।'[2]

**धर्मोत्तमाविवृतिः / प्रमाणविनिश्चयविवृतिः**

बौद्धाचार्येण धर्मकीर्तिणा 'प्रमाणविनिश्चयः' इत्याख्यो बौद्धन्यायग्रन्थो विरचितः तथा आचार्यधर्मोत्तरेण तदुपरि 'प्रमाणविनिश्चयटीका' प्रणीता, आनन्दवर्धनेन पुनः प्रमाणविनिश्चयटीकायाः 'प्रमाणविनिश्चयविवृतिः' इत्याख्या वृत्तिर्लिखिता। तत्र 'केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयम्' इत्यस्य निराकरणे ध्वनिकृतोक्तं 'यत्तु अनिर्देश्यत्वं सर्वलक्षणविषयं बौद्धानां प्रसिद्धं तत्तन्मतपरीक्षायां ग्रन्थान्तरे निरूपयिष्यामः'।[3] अत्र लोचनकृतोक्तं 'ग्रन्थान्तर इति विनिश्चयटीकायां धर्मोत्तर्यां या विवृतिरमुना ग्रन्थकृता कृता तत्रैव व्याख्यातम्।'[4]

ध्वनिकारस्य कृतीनां सम्यगालोचनेन ज्ञायते यदयं परमविष्णुभक्तः कारणं प्रायशः सर्वाणि तत्प्रणीतानि पद्यानि भगवतो विष्णोः पराणि। तद्यथा मङ्गलाचरणे–

**स्वेच्छा-केसरिणः स्वच्छस्वच्छायायासितेन्दवः।**
**त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः॥**[5]

यथा वा व्यतिरेकालङ्कारवर्णने –

**श्लाघ्याशेषतनुं सुदर्शनकरः सर्वाङ्गलीलाजित**
**त्रैलोक्यां चरणारविन्दललितेनाक्रान्तलोको हरिः।**

1 का. 4 व्याख्याने लोचने ध्व. लो. प्र. उ.
2 लोचने व्यञ्जनास्थापनावसरे
3 का. 47 वृत्तौ तश. उ.
4 तत्रैव व्याख्याने लोचने
5 मङ्गलाचरणम्, ध्वन्यालोकस्य

**बिभ्राणां मुखमिन्दुरूपमखिलं चन्द्रात्मचक्षुर्दधत्**
**स्थाने यां स्वतनोरपश्यदधिकां सा रुक्मिणी वोऽवतात्।।**[1]

यथा वा विरोधालङ्कारवर्णने

**सर्वैकशरणमक्षयमधीशमीशं धियां हरिं कृष्णम्।**
**चतुरात्मानं निष्क्रियमरिमथनं नमत चक्रधरम्।।**[2]

यथा वा

**या व्यापारवती रसान् रसयितुं काचित् कवीनां नवा**
**दृष्टिर्या परिनिष्ठितार्थविषयोन्मेषा च वैपश्चिती।**
**ते द्वे अप्यवलम्ब्य विश्वमनिशं निर्वर्णयन्तो वयं**
**श्रान्ता नैव च लब्धमब्धिशयन त्वद्भक्तितुल्यं सुखम्।।**[3]

अत्रानन्यपरायणता ध्वनिकारस्य विष्णौ दृश्यते। यथा वा-

**मम मम इति भणतो व्रजति कालो जनस्य।**
**तथापि न देवो जनार्दनो गोचरीभवति मनसः।।**[4]

**लोचनकारस्य व्यक्तित्वकृतित्वयोः परिचयः**

**वंशः**

अभिनवगुप्तः परमशैवो महान् दार्शनिकः सहृदयचक्रवर्ती काश्मीरीयाचार्यो बभूव। परं तस्य पूर्वजाः काश्मीरीया न आसन्। अभिनवस्य जन्मनो द्विशत्वर्षपूर्वं (200) तत्पूर्वजाः कन्नौजराज्ये वसन्ति स्म। तत्र राजतरङ्गिण्यां प्रतिपादितं यत् 'अष्टमशताब्द्यां कन्नौजस्य राजा यशोवर्मा तथा काश्मीरस्य राजा ललितादित्य आसीत्, तयोर्महद् युद्धमभूत् तथा ललितादित्यः तं (यशोवर्माणं) पराजितवान्। तदानीं अन्तर्वेदीक्षेत्रे[5] (गङ्गायमुनयोर्मध्यप्रदेशे) अत्रिगुप्तस्य पाण्डित्यस्य प्रसिद्धिरासीत् तथा गुणग्राही ललितादित्यः तेन प्रभावितस्सन् तं स्वराज्ये काश्मीरे सादरं स्थापयामास, तदुक्तम्-

1 का. 21 वृत्तौ द्वि. उ.
2 तत्रैव
3 का. 44 वृत्तौ तृ. उ.
4 का. 7 वृत्तौ च. उ.
5 अन्तर्वेदीक्षेत्रे कन्नौजराज्योऽपि आसीत्

**अन्तर्वेद्यामत्रिगुप्ताभिधानः प्राप्योत्पत्तिं प्राविशत् प्राग्र्यजन्मा।**
**श्रीकाश्मीरांश्चन्द्रचूडावतारैर्निःसंख्याकैः पावितोपान्तभागान्।।**[1]

अभिनवेन स्वयं पूर्वोक्तप्रसङ्गस्य तन्त्रालोके वर्णनं कृतम्–

**निःशेषशास्त्रसदनं किल मध्यदेश–**
**स्तस्मिन्नजायत गुणाभ्यधिको द्विजन्मा।**
**कोऽप्यत्रिगुप्त इति नाम निरुक्तगोत्रः**
**शास्त्राब्धिचर्वणकलोद्यदगस्त्यगोत्रः।।**[2]

**तमथ ललितादित्यो राजा निजं पुरमानयत्।**
**प्रणयरभसात् कश्मीराख्यं हिमालयमूर्धगम्।।**[3]

**तस्मिन् कुबेरपुरचारिसितांशुमौलि**
**साम्मुख्यदर्शनविरुढपवित्रभावे।**
**वैतस्तरोधसि निवासममुष्य चक्रे**
**राजा द्विजस्य परिकल्पितभूरिसम्पत्।।**[4]

अस्मिन्नेव वंशे पितामहो वराहगुप्तः, पिता नृसिंहगुप्तश्च बभूव। पिता किल लोके चुलुखनाम्ना प्रसिद्ध आसीत् तथा स्वयमभिनवगुप्तश्च वंशेऽस्मिन् जातः तदुक्तं तत्रैव –

**तस्यान्वये महति कोऽपि वराहगुप्त–**
**नामा बभूव भगवान् स्वयमन्तकाले।**
**गीर्वाणसिन्धुलहरीकलिताग्रमूर्धा**
**यस्याकरोत् परमनुग्रहमाग्रहेण।।**[5]
**तस्यात्मजः चुलुखकेति जने प्रसिद्ध**
**श्चन्द्रावदातधिषणो नरसिंहगुप्तः।**

1 परात्रिंशिकाविवरण, 280
2 काव्यप्रकाशभूमिकायाम्, आचार्यविश्वेश्वरसिद्धान्तशिरोमणिः, पृ. 50
3 तत्रैव
4 तत्रैव
5 काव्यप्रकाशभूमिकायाम्, आचार्यविश्वेश्वरसिद्धान्तशिरोमणिः, पृ. 50

**यं सर्वशास्त्ररसमञ्जनशुभ्रचित्तं**
**माहेश्वरी परमलङ्कुरुते स्म भक्तिः॥**[1]

**जीवनम्**

अभिनवगुप्तस्य कालः 950 ई. तः 1025 ई. पर्यन्तमस्ति। अभिनवगुप्तस्य बाल्यकाल एव माता स्वर्गस्था जाता 'माता व्ययूयुजदमुं किल बाल्य एव'[2] तथापि स मातुर्वियोगमपि भाविजीवनस्य कृते कल्याणरूपेण स्वीकृतवान् 'देवो हि भाविपरिकर्मणि संस्करोति'[3] तथा मातु र्मरणानन्तरं पिताऽपि संन्यासी बभूव 'तारुण्यसागरतरङ्गभरानपोह्य वैराग्यपोतमधिरूह्य दृढं हठेन।'[4] झटिति पिता च स्वर्गस्थो जातः। इत्थं पित्रोः वियोगेन यः खलु सरससाहित्यपठनप्रवृत्त आसीत् स शैवदर्शनप्रभृतीनां पठने तत्परो बभूव।

**साहित्यसान्द्ररसभोगपरो महेश**
**भक्त्या स्वयंग्रहणदुर्मदया गृहीतः।**
**स तन्मयीभूय न लोकवर्तनी**
**मजीगणत् कामपि केवलं पुनः॥**[5]

सम्पूर्णे जीवने शिवभक्तिसंलग्नमनस्सन् कठोरब्रह्मचर्यचर्यां चरन् शास्त्राणि विरचयन् व्याचक्षयन् च चरमे वयसि काश्मीरे श्रीनगरगुलमर्गयोर्मध्ये 'मगम' नाम्नः स्थानस्य समीपे 'भैरव-गुफा' अस्ति तत्र प्रविश्य न कदापि ततो निर्जगाम। एवं हि श्रूयते यत् 'काश्मीरीया ब्राह्मणा अद्यापि अभिनवगुप्तस्य मूर्तिं निर्माय पूजयन्ति तन्नाम्ना व्रतञ्च कुर्वन्ति।

**गुरवः**

अभिनवगुप्तस्य बहवो गुरवो बभूवुः, तेषां सादरं कीर्तनञ्च स्वटीकादिषु तेन कृतं, तत्र ध्वन्यालोको भट्टेन्दुराजेन पाठितं तदुक्तं लोचने-

---

1 तत्रैव
2 तत्रैव पृ. 52
3 तत्रैव
4 तत्रैव
5 काव्यप्रकाशभूमिकायाम्, आचार्यविश्वेश्वरसिद्धान्तशिरोमणिः, पृ. 53

**भट्टेन्दुराजचरणाब्जकृताधिवास**
**हृद्यश्रुतोऽभिनवगुप्तपदाभिधोऽहम्।**
**यत्किञ्चिदप्यनुरणन्स्फुटयामि काव्या-**
**लोकं स्वलोचननियोजनया जनस्य।।**[1]

इत्थं सर्वत्र गुरुणां सादरमुल्लेखो दृश्यते अभिनवस्य रचनासु। अभिनवस्य पूर्णं नाम 'अभिनवगुप्तपादः' अस्ति। एवं हि श्रूयते बाल्यावस्थातोऽयं शास्त्रार्थे विद्वत्तम आसीत् ततश्च सहाध्यायिनः तस्माद् बिभ्यन्ति स्म, तस्माद् गुरुभिः सहाध्यायीनां त्रासकरणात् तस्य 'गुप्तपादः' अर्थात् सर्प इत्युपाधिः प्रदत्तः स च सहर्षं तं स्वीकृत्य स्वनाम्नि योजितवान् ततश्च अभिनवगुप्तपादः इति नाम बभूव। स्वयं तेनैवोक्तं तन्त्रालोके -

**'अभिनवगुप्तस्य कृतिः सेयं यस्योदिता गुरुभिराख्या।'**[2]

विविधेभ्यः तत्तच्छास्त्रनिपुणेभ्यो गुरुभ्य इमानि शास्त्राणि पठितानि -

| **गुरवः** | **शास्त्राणि** |
|---|---|
| नरसिंहगुप्तः (पिता) | व्याकरणम् |
| वामनाथः | द्वैताद्वैततन्त्रम् |
| भूतिराजतनयः | द्वैतशैवतन्त्रम् |
| लक्ष्मणगुप्तः | प्रत्यभिज्ञा-क्रम-त्रिकदर्शनानि |
| भट्टेन्दुराजः | ध्वन्यालोकः |
| भूतिराजः | ब्रह्मविद्या |
| भट्टतौतः | नाट्यशास्त्रम् |

### लोचनकारस्य कृतयः

#### (1) लोचनम्

ध्वन्यालोकस्य प्राचीनतमा प्रमाणिका टीका अभिनवगुप्तस्य 'लोचनम्' वर्तते, यद्यपि लोचनात् पूर्वं काचित् चन्द्रिकाटीका अभिनवगुप्तस्य

1 ध्व. लोचनटीकामङ्गलाचरणे
2 तन्त्रालोकः 150/1

सगोत्रस्य आसीत् तथापि तस्याः प्राप्तिर्न भवति, केवलं लोचने तदुल्लेखः।[1] टीकेयं वस्तुतः साहित्यशास्त्रस्य महाभाष्यरूपा वर्तते, या ध्वन्यालोकस्य मूलस्य भावं सरलतया प्रकाशयन्ती नूतनान् मौलिकान् सिद्धान्तांश्च प्रतिपादयति। लोचनस्य पठनेन ज्ञायते यत् भट्टेन्दुराजेन ग्रन्थोऽयं (ध्वन्यालोकः) पाठितः स्वयं लोचने कथितम्-

**भट्टेन्दुराजचरणाब्जकृताधिवास**
**हृद्यश्रुतोऽभिनवगुप्तपदाभियोऽहम्।**
**यत्किञ्चिदप्यनुरणन्स्फुटयामि काव्या**
**लोकं स्वलोचननियोजनया जनस्य॥**[2]

किञ्च लोचने बहुशः शैवदर्शनव्याकरणादीनां दर्शनं भवति, व्यञ्जनायाः स्थापने तु विशेषतो लेखनी गर्जती लोचनकारस्य तथा लोचनं विना ध्वन्या- लोकस्य तथा प्रचारोऽपि न स्यात्, बहुवक्तव्येन किं स्वयं लोचनकृतोक्तम्-

**किं लोचनं विनालोको भाति चन्द्रिकयापि हि।**
**तेनाभिनवगुप्तोऽत्र लोचनोन्मीलनं व्यधात्॥**[3]

**(2) अभिनवभारती**

अभिनवगुप्तस्य द्वितीयः काव्यगुरुः तौतभट्टो वर्तते, तेन च अभिनवाय नाट्यशास्त्रं पाठितं तदुक्तम् अभिनवभारतीसमाप्तौ-

**द्विजवरतौतनिरूपितसन्ध्यध्यायार्थतत्त्वघटनेयम्।**
**अभिनवगुप्तेन कृता शिवचरणाम्भोजमधुपेन॥**

अभिनवगुप्तेन नाट्यशास्त्रस्य या व्याख्या अकारि सा 'अभिनवभारती' वर्तते। यद्यपि अस्याः टीकायाः सम्पूर्णता नास्ति तथापि यावान् विषयोऽत्र दृश्यते तत्र सिद्धान्तानां गभीरता भावावबोधिता च वर्तते।

---

1 चन्द्रिकाकारस्तु पठितमनुपठतीति न्यायेन गजनिमीलिकया व्याचक्षते .. इत्यलं पूर्ववंश्यैः सह विवादेन बहुना। का. 33 व्याख्याने लोचने। तृ. उ.

2 लोचनमङ्गलाचरणे

3 प्रथमोद्योतसमाप्तौ

**( 3 ) काव्यकौतुकविवरणम्**

अभिनवगुप्तस्य गुरुणा भट्टतौतेन काव्यकौतुकाख्यो ग्रन्थो विरचितः तस्य विवरणम् अभिनवगुप्तेन 'काव्यकौतुकविवरणम्' नाम्ना कृतं तदुक्तं लोचने –

'स चायमस्मदुपाध्यायभट्टतौतेन काव्यकौतुके, अस्माभिश्च तद्विवरणे बहुतरकृतनिर्णयपूर्वपक्षसिद्धान्त इत्यलं बहुना।'[1]

तत्रैव च लोचने भट्टतौतस्य श्लोकार्द्धमपि दृश्यते तदुक्तं 'यदुक्तमस्मदुपाध्यायभट्टतौतेन' नायकस्य कवेः श्रोतुः समानोऽनुभवस्ततः।'[2] अस्य ग्रन्थस्य प्राप्तिर्न भवति।

एतदतिरिक्तान्यपि बहूनि शास्त्राणि लोचनकारेण रचितानि।

◈ ◈ ◈

1 का. 26 व्याख्याने लोचने तृ. उ.

2 का. 6 व्याख्याने लो. प्र. उ.

# द्वितीयोऽध्यायः

## ध्वनिस्थापने व्याकरणशास्त्रस्यावदानम्

काव्यशास्त्रे सर्वप्रथमं ध्वनिशब्दस्य प्रयोगो[1] मीमांसा[2] वा आनन्द-वर्धनेन ध्वन्यालोके विहिता, यद्यपि काव्यस्य जीवातुरूपस्य व्यङ्ग्यस्य सत्ता महाकवीनां भारतीषु पूर्वत एव आसीत्[3] तथापि तल्लक्षणकर्तुमशक्नुवतां सोऽर्थो भर्तृसुखमतद्वित्सु कुमारीष्विव गिरामगोचरप्रायमासीत्। तदुक्तम्-

'तस्य हि ध्वनेः स्वरूपं सकलसत्कविकाव्योपनिषद्भूतम्, अतिरमणीयम्, अणीयसीभिरपि अचिरन्तनकाव्यलक्षणविधायिनां बुद्धिभिरनुन्मीलितपूर्वम्।'[4]

राजानकानन्दवर्धनाचार्येण च सूक्ष्मेक्षिकया व्याकरणशास्त्रे ध्वनिस्फोटयोः सम्यक् स्वरूपमवधार्य काव्यशास्त्रेऽपि व्यञ्जकत्वसाम्याद् ध्वनिव्यवहारः कृतः। तदुक्तम् -

'प्रथमे हि विद्वांसो वैयाकरणाः व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः।'[5]

तथैवाग्रेऽपि तृतीयोद्योते व्यञ्जनास्थापनावसरे स्पष्टं ध्वनिकृतोक्तं यत् -

---

1 काव्यस्यात्मा ध्वनिरिति ... का. 1 ध्व. लो. प्र. उ.

2 का. 13 ध्व. लो. प्र. उ.

3 सरस्वतीस्वादु ... का. 6 तत्रैव

4 का. 1 वृत्तौ तत्रैव

5 का. 13 व्याख्याने वृत्तौ तत्रैव

'परिनिश्चितनिरपभ्रंशशब्दब्रह्मणां विपश्चितां मतमाश्रित्यैव प्रवृत्तोऽयं ध्वनिव्यवहारः।'[1]

काव्यक्षेत्रे यो ध्वनिव्यवहारस्तस्योपजीव्यं व्याकरणशास्त्रमेव। आनन्दवर्धनेन ध्वनेर्लक्षणमुक्तं यत् -

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥**[2]

अत्र 'सूरिभिः कथितः' इत्यस्य व्याख्याने ध्वनिकृता व्याचष्टं 'सूरिभिः कथितः' इति विद्वदुपज्ञेयमुक्तिः न तु यथाकथञ्चित्प्रवृत्तेति प्रतिपाद्यते' इति। अत्र 'विद्वत्' शब्देन वैय्याकरणाः स्वीक्रियन्ते कारणं व्याकरणमेव सर्वशास्त्रमूलं हरदत्तेन व्याकरणवैयाकरणयोः प्रशंसायामुक्तम्–

**उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्।**
**प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम्॥**[3]

किं बहुना -

**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।**
**इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥**[4]
**रूपान्तरेण ते देवा विचरन्ति महीतले।**
**ये व्याकरणसंस्कारपवित्रितमुखा नराः॥**[5]

भामहेन तु साहित्यिकानाङ्कृते व्याकरणज्ञानस्य नितान्तमुपयोगिता स्वीकृता–

**सदोपयुक्तं सर्वाभिरन्यविद्याकरेणुभिः।**
**नापारयित्वा दुर्गाद्यममुं व्याकरणार्णवम्॥**
**शब्दरत्नं स्वयं गम्यमलङ्कर्तुमयं जनः॥**[6]

---

1 का. 33 व्याख्याने वृत्तौ तृ. उ.
2 का. 13 प्र. उ.
3 पदमञ्जरी, अथ शब्दानुशासनम् इत्यस्य व्याख्याने
4 ब्र. का. का. 15 वाक्यपदीयम्
5 ब्र. का. का. 15 वाक्यपदीयम्
6 काव्यालङ्कारः 2/3

वैय्याकरणानां स्फोटवादस्य मूलता ध्वनिव्यवहारे वर्तते, ततश्च स्फोटवादस्य सर्वादावत्र मीमांसा क्रियते।

वैय्याकरणाः शब्दार्थयोस्तादात्म्यं मन्वते, तदुक्तं पातञ्जलभाष्ये 'सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मको योऽयं शब्दः सोऽर्थो, योऽर्थो स शब्दः'। तर्हि प्रश्नो भवति यदि शब्दार्थयोस्तादात्म्यं ततश्च कथं मधुशब्देन न मधुरास्वादः कथं न वह्निशब्देन मुखे दाहकता। न तु मधुशब्देन मधुरास्वादो न वा वह्नि शब्देन दाहकता मुखे, ततश्च न शब्दार्थयोस्तादात्म्यम्। अस्याः शङ्कायाः समाधाने वैय्याकरणाः बौद्धार्थस्य सत्तां मन्वते। अर्थात् वस्तुतः शब्दस्य बाह्यार्थो न भवति प्रत्युत शब्दमात्रस्य भावात्मकं चित्रं जनानां हृदये व्यवस्थितम्।[1] सा आकृतिरेव जाति कथ्यते 'आकृतिर्जातिपदवाच्या' तथा आकृतिरेव शब्दस्य वास्तविकोऽर्थः। अयमेव बौद्धार्थो कथ्यते बौद्धार्थवशादेव –

**एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।**
**कूर्मक्षीरचये स्नातः शशशृङ्गधनुर्धरः॥**[2]

बाह्यार्थसत्ताशून्यानां वन्ध्यासुतादीनाञ्च शाब्दबोधे न काचित् क्षतिः। साहित्यशास्त्रेऽपि बौद्धार्थस्य सत्ता स्वीक्रियते, तदुक्तं पण्डितराजजगन्नाथेन उपमालङ्कारनिरूपणे –

'ननु त्वयि कोपो ममाभाति सुधांशाविव पावकः' इत्यादावुपमानस्या–त्यन्तमम्भावितत्वात्सादृश्यमेव न तावत्प्रतिपत्तुं शक्यम्, चमत्कारस्तु पुनः केन स्यादिति चेत्, कविना हि खण्डशः पदार्थोपस्थितिमता स्वेच्छया सम्भावितत्वेनाकारेण चन्द्राधिकरणकमनलं प्रकल्प्य तेन सह साम्यस्यापि कल्पने बाधकाभावात्। कल्पितमसत्सादृश्यं कथं चमत्कारजनकमिति तु न वाच्यम्। परमसुकुमारीभवत्कनकनिर्मिताङ्ग्या मणिमयदशनकान्तिनिर्वासित–ध्वान्तायाः कान्ताया भावनया पुरोऽवस्थापिताया आलिङ्गनस्याह्लादजनक–

1 यत्तु तार्किकाः शब्दार्थयोस्तादात्म्यस्वीकारे मधुशब्दोच्चारणे मुखे माधुर्यरसास्वादा–स्तादाम्यम्। तत्र बौद्धे वह्न्यादावर्थे दाहादिशक्तिमत्त्वाभावात्। परमलघुमञ्जूषा शक्तिनिरूपणे नागेशभट्टः

2 परमलघुमञ्जूषा शक्तिनिरूपणे नागेशभट्टः

त्वदर्शनात्। उपमानोपमेययोः सत्यत्वस्य लक्षणे प्रवेशाभावान्नात्र दोषलेशोऽपि।[1] इति।

इत्थं वैय्याकरणाः शब्दार्थयोस्तादात्म्यं वदन्तः सन्त अन्तःकरणे शब्दब्रह्मणा सह बौद्धार्थस्यैकरूपतां मन्वते, तथा घटत्वेन शरावत्वेन च घटशरावादयो भिन्ना अपि मृत्तिकारूपेणाभिन्ना एव तथा कत्वखत्वाद्युपाधि भेदेन भिन्ना अपि कखादयो शब्दब्रह्मणाभिन्ना एव। यदा कखगादय अभिन्नरूपेण शब्दब्रह्मणा सह भवन्ति सा परावाणी कथ्यते। यदा पुनः तेषां वर्णानां कत्वखत्वादिरूपेण बुद्धिर्ग्रहणं करोति सा पश्यन्तीवाणी वैय्याकरणैः कथ्यते। यदा कर्णपिधाने जपादौ वा सूक्ष्मनादः स्वसंवेद्यो भवति तदा मध्यमावाणी कथ्यते, तत्र परावाणी मूलचक्रे, पश्यन्ती नाभौ, मध्यमा च हृदि वर्तते तथा तिसृष्वपि वाणीषु वर्णानां शब्दब्रह्मणा सह एकरूपता प्रायशो भवति, परं यदा वायुः मूर्धानमाहत्य तत्तत्स्थानान् संस्पृश्याभिव्यक्तस्सन् परश्रवणगोचरो भवति तदा 'वैखरी' वाणी स्वीक्रियते। तदुक्तं नागेशेन -

'चतुर्विधा हि वागस्ति, परा, पश्यन्ती, मध्यमा, वैखरी च। तत्र मूलाधार- स्थपवनसंस्कारीभूता मूलधारधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी 'परा' वागुच्यते। नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता मनो गोचरीभूता 'पश्यन्ती' वागुच्यते। एतद्द्वयं वाग्ब्रह्मयोगिनां समाधौ निर्विकल्पक-सविकल्पकज्ञानविषय इत्युच्यते। ततो हृदयपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता तत्तदर्थवाचकस्फोटरूपा परग्रहणायोग्येत्वेन सूक्ष्मा जपादौ बुद्धिर्निर्ग्राह्या 'मध्यमा' वागुच्यते। तत आस्यपर्यन्तमाच्छता तेन वायुनोर्ध्वमाक्रामता च मूर्धानमाहत्य परावृत्य च तत्तस्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्राह्या 'वैखरी' वागुच्यते। तदाह -

**परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥**
**वैखर्या हि कृतो नादः परश्रवणगोचरः।**
**मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते॥**[2] इति

1 उपमाननिरूपणे रसगङ्गाधरे द्वितीयोल्लासे

2 स्फोटनिरूपणे परमलघुमञ्जूषायां नागेशः

तथा येन वायुसंयोगेन स्थानप्रयत्नसहकृतेन स्फोटोऽभिव्यज्यते सो वैयाकरणैर्ध्वनिः कथ्यते। स च ध्वनिर्द्विविधः प्राकृतो वैकृतश्च। तत्र स्फोटस्य व्यञ्जनं येन ध्वनिना भवति स प्राकृतो ध्वनिः तथा प्राकृतध्वनेः समुत्पन्नः चिरस्थायी यो ध्वनिः सो वैकृतः, तदुक्तं स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।

**शब्दस्योर्ध्वमभिव्यक्ते वृत्तिभेदे तु वैकृताः।**
**ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते॥**[1]

शब्दो द्विविधः कारणरूपः कार्यरूपश्चेति तत्र प्रथमः विवक्षाप्रयत्नभेदेन वायोर्न्यूनाधिकप्रमाणवशात् तत्तस्थानेषु विलक्षणाघातप्रतिघाताभ्यां ह्रस्वाधिकप्रमाणेषु ह्रस्वदीर्घप्लुतरूपो वर्णरूपो जायते स प्राकृतध्वनिः कथ्यते सः कारणरूपः प्रथमः शब्दः। अपरः कार्यरूपः, यः प्राकृतध्वनेः समुत्पन्नः तदनुरूपः शब्दान्तरं सन्तान- रूपेण भावयति। अयमेव वैकृतध्वनिः कथ्यते। तदुक्तं नागेशेन -

ध्वनिस्तु द्विविधः प्राकृतो वैकृतश्च। प्रकृत्यार्थबोधनेच्छया स्वभावेन वा जातः स्फोटव्यञ्जकः प्रथमः प्राकृतः। तस्मात्प्राकृताज्जातो विकृतिविशिष्टश्चिरस्थायी निवर्तको वैकृतिकः।[2]

शब्दोऽपि द्विविधः प्रथमः स्फोटरूपः, अपरः वायुसंयोगात्मक-ध्वनिरूपः। तस्मादेव महाभाष्यकारेणापि शब्दस्य लक्षणद्वयमुपन्यस्तं यत्-

'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः। अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवकः इति ध्वनिं कुर्वन्नेवमुच्यते तस्मात् ध्वनिः शब्दः।'[3]

तत्र प्रथमे स्फोटरूपे शब्दे कोऽपि भेद उपाधिर्वा न भवति, भेदस्तु द्वितीयशब्दरूपे ध्वनौ भवति। तस्मादेव भिन्नैरपि जनैर्भिन्नैर्ध्वनिभिः स्फोटस्य स्वरूपे न कश्चन भेदमायाति। तथाहि नववध्वा ध्वनिर्भिन्नः तथा

1 वाक्यपदीये ब्रह्मकाण्डे का. 77
2 स्फोटनिरूपणे परमलघुमञ्जूषा नागेशः
3 पस्पशाह्निकम्

वीरपुरुषभीरुबालकादीनामपि ध्वनिर्भिन्नस्तथापि सत्यपि तेषां ध्वनिभेदे स्फोटस्वरूपे न कश्चन भेदलेशोऽपि। तदुक्तं भर्तृहरिणा –

**शब्दस्योर्ध्वमभिव्यक्ते वृत्तिभेदे तु वैकृताः।**
**ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते॥**[1]

तथा पूर्वपरध्वनिभिः स्थापितबीजायां बुद्धौ चरमध्वनिसहकारेण स्फोटो निश्चयरूपेण ज्ञातो भवति, तदुक्तम् –

**नादैराहितबीजायामन्त्येन ध्वनिना सह।**
**आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते॥**[2]

यथा शरीरस्य कृशतास्थूलतादिभिर्नात्मनि कृशतास्थूलतादयो, यथा वा मुखस्य तैलमुकुरखड्गादिषु भिन्ना भिन्ना मुखाकृतिर्न तु मुखे कश्चन भेदस्तथा ध्वनिभेदे सत्यपि न स्फोटे कश्चन भेदः। तदुक्तं नागेशेन–

'स च यद्यप्येकोऽखण्डश्च, तथापि पदं वाक्यं जपाकुसुमादिलौहित्य–पीतत्वादिव्यञ्जकोपरागवशाल्लोहितः पीतः स्फटिक इति भानवद् वर्णादिव्यङ्ग्यः वर्णरूपः पदरूपो वाक्यरूपश्च। यथा च मुखे मणि–कृपाण–दर्पण व्यञ्जकोपा–धिवशाद्दैर्घ्यवर्तुलत्वादिभानं तद्वत्। तदुक्तम् –

**पदे न वर्णा विद्यन्ते वाक्येष्ववयवा न च।**
**वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन॥**

किञ्च व्यञ्जकध्वनिगतं कत्वगत्वादिकं स्फोटे भासते, बिम्बगत–धर्मवैशिष्ट्येनैव प्रतिबिम्बस्य लोके अवधारणाद्, व्यञ्जकरूषितस्यैव स्फटिकादे- र्भानाच्च। यथा चैकस्याकाशस्य घटाकाशो महाकाश इत्यौपाधिकभेदः यथा चैकस्यैव चेतस्यौपाधिको जीवेश्वरभेदौ, जीवानाञ्च परस्परं भेदः, एवं स्फोटे व्यञ्जकध्वनिगतकत्वादिभानात् ककारो बुद्ध इत्यौपाधिको भेदव्यवहारः।'3

अयमेव स्फोटसिद्धान्तस्य निष्कर्षो यत् वैयाकरणाः स्फोटस्य व्यञ्जकेषु ध्वनिरिति व्यवहरन्ति। तेषां मते ध्वनतीति ध्वनिः इति व्युत्पत्त्या

1 ब्र. का. 78

2 ब्र. का. 85

3 स्फोटनिरूपणे परमलघुमञ्जूषायां नागेशः

श्रोत्रग्राह्या वर्णाः स्फोटाभिव्यञ्जका ध्वनिपदवाच्याः। साहित्यिका इतोऽप्यधिकं विस्तृतरूपेण ध्वनिव्यवहारं कुर्वन्ति, तत्र साहित्यिकाचार्यैः व्यञ्जकत्वधर्मस्य साम्याद् शब्दार्थयोः, व्यञ्जनव्यापारे, व्यङ्ग्यार्थे, समुदितरूपे काव्ये च ध्वनिव्यवहारो कृतः। तदुक्तं ध्वनिकारेण–

'सूरिभिः कथित इति विद्वदुपज्ञेयमुक्तिः न तु यथाकथञ्चित्प्रवृत्तेति प्रतिपाद्यते। प्रथमे हि विद्वांसो वैय्याकरणाः, व्याकरणमूलत्वात्सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः।'[1]

काव्यप्रकाशकारेणाप्युक्तं यत् –

**'इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः।'**

इदमिति काव्यम्। बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावित-वाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य। यथा–

**निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो**
**नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।**
**मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे**
**वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्॥**

अत्र तदन्तिकमेव रन्तुं गतासीति प्राधान्येनाधमपदेन व्यज्यते।'[2] इति

अस्य स्फोटसिद्धान्तस्य निष्कर्षो लोचनकारेण प्रतिपादितः तद्यथा–

'श्रोत्रशष्कुलीं सन्तानेनागता अन्त्याः शब्दाः श्रूयन्त इति प्रक्रियायां शब्दजाः शब्दाः श्रूयमाणा इत्युक्तम्। तेषां घण्टानुरणनरूपत्वं तावदस्ति, ते च ध्वनिशब्देनोक्ताः। यथाह भगवान् भर्तृहरिः –

**यः संयोगविभागाभ्यां करणैरूपजन्यते।**
**स स्फोटः शब्दजाः शब्दाः ध्वनयोऽन्यैरूदाहृताः॥**

---

1 का. 13 वृत्तौ ध्वन्योलोके प्रथमोद्योते

2 का. 4 व्याख्याने वृत्तौ काव्यप्रकाशे प्रथमोल्लासे

एवं घण्टानिर्ह्रादस्थानीयोऽनुसरणनात्मोपलक्षितो व्यङ्ग्योऽप्यर्थो ध्वनिरिति व्यवहृत:। तथा श्रूयमाणा ये वर्णा नादशब्दवाच्या अन्त्यबुद्धि-निर्ग्राह्यस्फोटाभिव्यञ्जकास्ते ध्वनिशब्देनोक्ता:। यथाह भगवान् स एव-

**प्रत्ययैरनुपाख्यायैर्ग्रहणानुगुणैस्तथा ।**
**ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते॥**

तेन व्यञ्जकौ शब्दार्थावपीह ध्वनिशब्देनोक्तौ। किञ्च वर्णेषु तावन्मात्र-परिमाणेष्वपि सत्सु। यथोक्तम्-

**अल्पीयसापि यत्नेन शब्दमुच्चारितं मति:।**
**यदि वा नैव गृह्णाति वर्णं वा सकलं स्फुटम्॥** इति

तेषु तावत्स्वेव श्रूयमाणेषु वक्तुर्योऽन्यो द्रुतविलम्बादिवृत्तिभेदात्मा प्रसिद्धादुच्चारणव्यापारादभ्यदिक: स ध्वनिरुक्त:। यदाह स एव-

**शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृता:।**
**ध्वनय: समुपोहन्ते स्फोटात्मा तैर्न भिद्यते॥** इति

अस्माभिरपि प्रसिद्धेभ्य: शब्दव्यापारेभ्योऽभिधातात्पर्यलक्षणा-रूपेभ्योऽतिरिक्तो व्यापारो ध्वनिरित्युक्त:। एवं चतुष्कमपि ध्वनि:। तद्योगाच्च समस्तमपि काव्यं ध्वनि:।'[1]

यद्यपि ध्वनिकारेण सामान्येनोक्तं 'काव्यस्या ध्वनिरिति' तथापि लोचनकारेण ध्वनिशब्दस्य प्रयोग: पञ्चष्वर्थेषु कृत: तद्यथा -

1. ध्वनतीति ध्वनि: (वाचक:)
2. ध्वनतीति ध्वनि: (वाच्य:)
3. ध्वन्यत इति ध्वनि: (व्यङ्ग्यार्थ:)
4. ध्वननं ध्वनि: (ध्वननव्यापार:)
5. ध्वन्यतेऽस्मिन्निति ध्वनि: (काव्यम्)

तदुक्तं लोचनकृता तत्रैव -

'वाच्योऽपि ध्वनि: वाचकोऽपि शब्दो ध्वनि:, द्वयोरपि व्यञ्जकत्वं ध्वनतीति कृत्वा। सम्मिश्र्यते विभावानुभावसंवलनयेति व्यङ्ग्योऽपि ध्वनि:,

1 का. 13 व्याख्याने लोचने

ध्वन्यत इति कृत्वा। शब्दनं शब्दः शब्दव्यापारः न चासावभिधादिरूपः, अपि त्वात्मभूतः सोऽपि ध्वननं ध्वनिः। काव्यमिति व्यपदेश्यश्च योऽर्थः सोऽपि ध्वनिः। उक्त- प्रकारध्वनिचतुष्टयमयत्वात्। अत एव साधारणहेतुमाह - व्यञ्जकत्वसाम्यादिति। व्यङ्ग्यव्यञ्जकभावः सर्वेषु पक्षेषु सामान्यरूपः साधारण इत्यर्थः।'[1]

एतदतिरिक्तं रीतिवृत्तिगुणालङ्कारपदपदांशवर्णवाक्यप्रबन्धादयो व्यङ्ग्यार्थस्य व्यञ्जनाद् ध्वनिकुक्षौ परापतन्ति।[2] यदि व्यङ्ग्यार्थोऽपि द्वितीयं व्यङ्ग्यार्थं व्यनक्ति तदा सोऽपि व्यञ्जको भवति। तदुक्तम् -

**'सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते।'**[3]

प्रायशो अर्थात् सति वक्त्रादिवैशिष्ट्ये अर्थात् यदि सीतातुल्या काचित् पतिव्रता भ्रम धार्मिक....[4] इत्यादि वक्ति तदा न तत्र व्यङ्ग्यलेशोऽपि, तमेव यदि काचित् स्वैरिणी ब्रूयात् तदा व्यङ्ग्यार्थो 'मा भ्रम' इति आयाति। तेन च व्यङ्ग्येन तस्याः स्वैरिण्याः तत्र निःशङ्कभ्रमणरमणादयो व्यज्यन्ते। अस्यैवार्थस्य (व्यङ्ग्यार्थोऽपि व्यञ्जको भवतीत्यस्य) सम्यक् स्फोरणं काव्यप्रकाशे कृतं यत्-

**पश्य निश्चलनिष्पन्दा बिसिनीपत्रे राजते बलाका।**
**निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव॥**

अत्र निष्पन्दत्वेन आश्वस्तत्वम्। तेन च जनरहितत्वम्। अतः सङ्केतस्थानमेतदिति कयाचित् कञ्चित् प्रति उच्यते। अथवा मिथ्या वदसि न त्वमत्रागतोऽभूरिति व्यज्यते।'[5]

तथैव लक्ष्यार्थोऽपि व्यञ्जको भवति वाच्यस्य व्यञ्जकता तु

---

1 का. 13 व्याख्याने लोचने

2 वाच्यवाचकचारुत्वहेतूनां विविधात्मनाम्। रसादिपरता यत्र स ध्वनेर्विषयो मतः। का. 4 ध्व. लो. द्वि. उ.

3 का. प्र. सू. 8 का. 7 द्वि. उ.

4 भ्रम धार्मिक विश्रब्धः स शुनकोऽद्य मारितस्तेन। गोदावरीनदीकूललतागहनवासिना दृप्तसिंहेन।। का. 4 वृत्तौ ध्व. प्र. उ.

5 का. 7 व्याख्याने वृत्तौ का. प्र. द्वि. उ.

प्रसिद्धैव।[1] वाचकादीनामपि व्यञ्जकता विस्तारेण तृतीयोद्योते प्रदर्शितं तत्रापि प्रबन्धस्य व्यञ्जकता सयुक्तिकं विस्तारेण प्रदर्शितं तथा रामायणमहाभारतयोः करुणशान्तरसयोर्व्यङ्ग्यता प्रदर्शिता। वैय्याकरणानां व्यञ्जकत्वसादृश्यात् ध्वनिकृता सुप्-तिङ्-वचन-सम्बन्ध-कारक-कृत्- तद्धित समासादीनां व्यञ्जकता दर्शिता तदुक्तम्-

**सुप्-तिङ्-वचन-सम्बन्धैस्तथा कारकशक्तिभिः।**
**कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित्॥**

अलक्ष्यक्रमो ध्वनेरात्मा रसादिः सुब्विशेषैः तिङ्विशेषैः वचनविशेषैः सम्बन्धविशेषैः कारकशक्तिभिः कृद्विशेषैः समासैश्चेति च शब्दनिपातोपसर्ग-कालादिभिः प्रयुक्तैरभिव्यज्यमानो दृश्यते। यथा-

**न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः**
**सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।**
**धिग् धिच्छक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा**
**स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः॥**

अत्र हि श्लोके भूयसा सर्वेषामप्येषां स्फुटमेव व्यञ्जकत्वं दृश्यते। तत्र 'मे यदरयः' इत्यनेन सुप्सम्बन्धवचनानामभिव्यञ्जकत्वम्। 'तत्राप्यसौ तापसः' इत्यत्र तद्धितनिपातयोः। 'सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः' इत्यत्र तिङ्कारकशक्तीनाम्। 'धिग् धिच्छक्रजितम्' इत्यादौ श्लोकार्धे कृत्तद्धितसमासोपसर्गाणाम्।[2]

इत्थं धवनतीति ध्वनिरिति व्युत्पत्त्या व्यञ्जकत्वसाम्याद् ध्वनिकृता वाचक-लक्षक-व्यञ्जक-वाच्य-लक्ष्य-व्यङ्ग्य-रीति-वृत्ति-गुणालङ्कार-वर्ण-पद-पदांश-वाक्य-प्रबन्धादीनां ध्वनिव्यपदेशः कृतः। परं काव्यप्रकाशकारेण

---

1 वाच्यस्य यथा मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया। तद्भण किं करणीयमेवमेव न वासरः स्थायी।। अत्र स्वैरविहारार्थिनीति व्यज्यते। लक्ष्यस्य यथा 'साधयन्ती सखि सुभगं क्षणे क्षणे दूनासि मत्कृते। सद्भावस्नेह-करणीयसदृशकं तावद् विरचितं त्वया। अत्र मत्प्रियं रमन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यम्। तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यम्। का. प्र. सू. 8 वृत्तौ द्वि. उल्लासे

2 का. 16 तद् व्याख्याने ध्व. लो. तृ. उ.

मम्मटाचार्येण केवलं शब्दार्थयुगलस्य ध्वनिव्यवहारो विहितः तदुक्तं 'बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्य-व्यञ्जनक्षमस्य शब्दार्थयुगलस्य।'

लोचनकारश्च ध्वनिलक्षणं विशदयन् पञ्चस्वर्थेषु ध्वनिशब्दस्य प्रयोगं कृतवान्।[1] तत्र सर्वं सुष्ठु व्याख्यातं लोचनकृता परं 'प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात्सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति'। इत्यस्य वृत्त्यंशस्य व्याख्याने यदुक्तं प्रमाणञ्च यत्प्रदत्तं तन्न वैयाकरणानुमतं तत्र लोचनकृतोक्तम् –

श्रोत्रशष्कुलीं सन्तानेनागता अन्त्याः शब्दाः श्रूयन्त इति प्रक्रियायां शब्दजाः शब्दाः श्रूयमाणा इत्युक्तम्। तेषां घण्टानुरणनरूपत्वं तावदस्ति, ते च ध्वनिशब्देनोक्ताः। यथाह भगवान् भर्तृहरिः –

**यः संयोगवियोगाभ्यां करणैरूपजन्यते।**
**स स्फोटः शब्दजाश्शब्दा ध्वनयोऽन्यैरुदाहृताः॥**[2] इति

अत्र लोचनकृता या हरिकारिका स्वव्याख्याने वैयाकरणमत-प्रदर्शनावसरे समुद्धृता सा न वैयाकरणसिद्धान्तानुमता, सा तु नैयायिक-सिद्धान्तानुमता। नैयायिकास्तावद् वायोः संयोगविभागाभ्यां (ताल्वादिस्थानेषु वायोः संयोगविभागाभ्यां) स्थानप्रयत्नाभ्यां यः प्राथमिकः शब्द उत्पद्यते तं शब्दं स्फोटं वदन्ति तथा वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा ये प्रथमोत्पन्नात् शब्दात् श्रोत्रदेशपर्यन्तं गच्छन्तः प्रथमशब्दसन्तानभूतास्ते द्वितीयादिशब्दाः तान् ध्वनित्वेन स्वीकुर्वन्ति। वैयाकरणास्तु वायोः संयोगविभागाभ्यां करणैरूपजन्यत्वात् अत एव अनित्यत्वात् तं शब्दं स्फोटत्वेन न मन्वते तस्य अनादिनिधनत्वात्। स्वयं भर्तृहरिणा यः संयोगविभागाभ्यां

1 वाच्योऽपि ध्वनिः वाचकोऽपि शब्दो ध्वनिः द्वयोरपि व्यञ्जकत्वं ध्वनतीति कृत्वा। सम्मिश्र्यते विभावानुभावसंवलनयेति व्यङ्ग्योऽपि ध्वनिः ध्वन्यत इति कृत्वा। शब्दनं शब्दः शब्दव्यापारः न चासावभिधादिरूपः अपि त्वात्मभूतः सोऽपि ध्वननं ध्वनिः। काव्यमिति व्यपदेश्यश्च योऽर्थः सोऽपि ध्वनिः उक्तप्रकारचतुष्टयमयत्वात्। का. 13 व्याख्याने लोचने

2 का. 13 व्याख्याने लोचने

करणैरूपजन्यते। स स्फोटः शब्दजाः शब्दाः ध्वनयोऽन्यैरूदाहृताः। इत्यस्य व्याख्याने हरिवृषभवृत्तौ लिखितम् –

'अनित्यपक्षे स्थानकरणप्राप्तिविभागहेतुकः प्रथमाभिनिर्वृत्तो यः शब्दः स स्फोट इत्युच्यते। नित्यपक्षे तु संयोगजविभागजध्वनिव्यङ्ग्यः स्फोटः।'[1]

प्रत्येकार्थप्रकाशिकायान्तु स्पष्टमुक्तं यत् 'इदानीं ध्वनिस्फोटयोर-नित्यत्ववादिमते स्वरूपमाह य इति। संयोगः = तत्तत्स्थानेषु वायोरभिघातः वियोगश्च = उक्तस्थानान्निःसरणम्, ताभ्यां करणैः = स्थानादिभिः यः = प्राथमिक उपजन्यते = उत्पद्यते स स्फोटः = शब्दः। शब्दाज्जाताः शब्दजाः प्रथमोत्पन्नात् शब्दात् शब्दान्तरं जायते, ततोऽपि शब्दान्तरम्, एवं रूपेण श्रुतिपथमारोहन्ति, अत्रैव वीचितरङ्गन्यायो दृष्टान्त इत्यन्यत्र विस्तरः, ते शब्दाः अन्यैः = नैयायिकैः ध्वनय उदाहृताः कथिता इत्यर्थः। अन्यैरित्युक्त्या नेदं स्वमतमिति सूचितम्। स्वमतन्तु संयोगविभागजा ध्वनयस्तदभिव्यङ्ग्यः स्फोटः शब्दो नित्य इति।'[2]

तथापि निर्विवादमिदं यत् व्यञ्जकत्वसाम्याद् ध्वनिकारेण काव्यक्षेत्रे ध्वनिव्यवहारो विहितः तथा स्फोटस्य यथा अनादिनिधनता तथैव व्यङ्ग्यार्थस्यापि प्राचीनता वर्तत एव, तस्य (व्यङ्ग्यार्थस्य) समाम्नातपूर्वत्वात्।[3] तदुक्तं लोचनकारेण–

'अविच्छिन्नेन प्रवाहेण तैरेतदुक्तं विनापि विशिष्टपुस्तकेषु विनिवेशना-दित्यभिप्रायः। न च बुधा भूयांसोऽनादरणीयं वस्त्वादरेणोपदिशेयुः, एतत्त्वादरेणोप-दिष्टम्। तदाह 'समाम्नातपूर्व' इति। पूर्वग्रहणेनेदम्प्रथमता नात्र सम्भाव्यत इत्याह, व्याचष्टे च सम्यगासमन्ताद् म्नातः प्रकटित इत्यनेन।[4]

ध्वनिकारोऽपि ध्वनेः स्वरूपकथने वक्ति यत् तस्य (ध्वने) स्वरूपं चिरन्तनकाव्यलक्षणविधायिनां बुद्धिभिरनुन्मीलितपूर्वं तथा रामायणमहाभारतादौ सर्वत्र लक्ष्ये तत्सत्ता अस्त्वेव तदुक्तम् –

'तस्य हि ध्वनेः स्वरूपं सकलसत्कविकाव्योपनिषद्भूतम्,

---

1 वा. प. ब्र. का. का. 103 व्याख्याने

2 तत्रैव

3 काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः ध्व. का. 1 प्रथमोद्योतः

4 तत्रैव व्याख्याने लोचने

अतिरमणीयम्, अणीयसीभिरपि चिरन्तनकाव्यलक्षणविधायिनां बुद्धिभिरनुन्मीलितपूर्वम्। अथ च रामायणमहाभारतप्रर्भृतिनि लक्ष्ये सर्वत्र प्रसिद्धव्यवहारं लक्षयतां सहृदयानाम् आनन्दो मनसि लभतां प्रतिष्ठामिति प्रकाश्यते।'[1]

सम्प्रति स्फोटातिरिक्तविषयेऽपि व्याकरणशास्त्रावदानं प्रस्तूयते। ध्वनिकारः सहृदयश्लाघ्यस्यार्थस्य काव्यात्मता ग्रन्थादौ मेने, तदुक्तम् –

**योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।**
**वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ॥**

काव्यस्य हि ललितोचितसन्निवेशचारूणः शरीरस्येवात्मा साररूपतया स्थितः सहृदयश्लाघ्यो योऽर्थः तस्य वाच्यः प्रतीयमानश्चेति द्वौ भेदौ।'[2]

यद्यपि काव्यस्यात्मा प्रतीयमानार्थ एव न वाच्यः तथापि महाभाष्यकाररीत्या प्रथमं वास्तविकं स्वरूपमभिधाय तदनु लोकप्रसिद्ध्या द्वितीयमपि स्वरूपं जगाद, तदनु बहुप्रपञ्चैः सह वास्तविकस्य लक्षणस्य प्रमीयमानस्य व्याख्यानञ्चक्रे।

कथनस्य तात्पर्यमिदं यत् यथा महाभाष्यकारः शब्दस्वरूपं प्रतिपादयन् सर्वादौ शब्दस्य वास्तविकं स्वरूपं ब्रवीति 'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः।'[3]

तदनु लोकप्रसिद्ध्यनुरोधेन द्वितीयमपि लक्षणञ्चक्रे 'अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा शब्दं कुरु मा शब्दं कार्षीः शब्दकार्ययं माणवकः इति ध्वनिं कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः।'[4]

तथा ध्वनिकारोऽपि ग्रन्थादौ काव्यात्मत्वेन व्यङ्ग्यार्थं स्वीकृत्य तदनु प्राचीनानां भामहादीनामनुमतं वाच्यालङ्कारमपि काव्यात्मत्वेन जगाद। 'वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ' इत्यत्र वाच्यपदेन न वाच्यार्थस्य ग्रहणं प्रत्युत उपमादीनां वाच्यालङ्काराणां ग्रहणं तदुक्तं ध्वनिकृता–

---

1 प्रथमकारिका वृत्तौ, प्रथमोद्योते

2 का. 2 प्रथमोद्योते

3 प्रथमाध्याये प्रथमपादः महाभाष्ये

4 तत्रैव

**तत्र वाच्यः प्रसिद्धो यः प्रकारैरूपमादिभिः।**
**बहुधा व्याकृतः सोऽन्यैः ततो नेह प्रतन्यते॥**[1]

ततश्च स्ववचनविरोधोऽपि (वदतोव्याघातदोषः) नास्ति। ध्वनिकारस्य पूर्वं भामहादीनामलङ्कारसम्प्रदाय सप्रपञ्चैः स्थापित आसीत्। किम्बहुना ध्वनिकारस्य समकालिकेन[2] मनोरथकविना च अलङ्कारस्य काव्ये नितरामनिवार्यता स्वीकृता। तदुक्तं (मनोरथकविना) -

**यस्मिन्नस्ति न वस्तु किञ्चन मनः प्रह्लादि सालङ्कृति**
**व्युत्पन्नै रचितं न चैव वचनैर्वक्रोक्तिशून्यं च यत्।**
**काव्यं तद् ध्वनिना समन्वितमिति प्रीत्या प्रशंसन् जडो**
**नो विद्मोऽभिदधत्ति किं सुमतिना पृष्टः स्वरूपं ध्वनेः॥**[3]

ततश्च नूतनं ध्वनिसम्प्रदायं प्रतिष्ठापयन् ध्वनिकारो महाभाष्यकारस्य पद्धतिमनुसृत्य आदौ काव्यस्य वास्तविकमात्मानं संसूच्य (काव्यस्यात्मा ध्वनिरिति) तदनु प्राच्याचार्याणामनुरोधेन उपमादिरूपं वाच्यालङ्कारमपि काव्यात्मत्वेन मेने (योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः। वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मश्तौ)।

एतदतिरिक्तं ध्वनिलक्षणे 'व्यङ्क्तः' इत्यत्रापि वैय्याकरणानामवदानं दृश्यते। तद्यथा ध्वनेर्लक्षणं कुर्वता ध्वनिकृतोक्तम् -

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥**[4]

अत्र कर्तृपदस्य (अर्थस्य/शब्दस्य) क्रियापदेन 'व्यङ्क्तः' इत्यनेन सह सङ्गतिर्न भवति, कारणं कर्तृपदे एकवचनं क्रियापदे तु द्विवचनम्। अत्र 'शब्दार्थौ व्यङ्क्तः' इति भवेदथवा 'अर्थः शब्द वा व्यनक्ति' इति न तु 'अर्थः शब्दो वा व्यङ्क्तः' इति। यद्यपि ध्वनिकृता प्रसङ्गेऽस्मिन् सर्वा शङ्का निरस्ता। लोचनकारो वदति यत् 'द्विवचनस्यायमभिप्रायो यत् यत्र अविवक्षितवाच्यध्वनिस्तत्र प्राधान्येन शब्द एव व्यञ्जकः तथाप्यर्थस्यापि

1 का. 3 प्रथमोद्योते
2 ग्रन्थकृत्समानकालभाविना मनोरथनाम्ना कविना, तत्रैव लोचने
3 का. 1 वृत्तौ ध्वन्यालोके प्रथमोद्योते
4 का. 13 ध्वन्योलोके प्रथमोद्योते

सहकारिता भवत्येव, अन्यथा यस्य शब्दस्य अर्थो न ज्ञातः सोऽपि (अज्ञातार्थोऽपि शब्दः) व्यञ्जको भवेत् तथा विवक्षितान्यपरवाच्यध्वनौ प्राधान्येन अर्थस्य व्यञ्जकता तथापि शब्दस्य तत्र सहकारिता भवति, इत्थं सर्वत्र शब्दार्थयोर्ध्वननव्यापारः। तद्यथा अविवक्षितवाच्यध्वनौ शब्दस्य प्राधान्येन व्यञ्जकता अर्थस्य च सहाकारिता, यथा – 'सप्तैताः समिधः श्रियः'।

अत्र धृतिक्षमादयाशौचकारुण्यादयः[1] श्रियः (सम्पत्तेः) समिधः कथितः। परं यज्ञीयकाष्ठानां वाचकत्वात् समिच्छब्दस्य मुख्यार्थबाधः, ततश्च श्रीवर्धनोपायरूपमर्थं लक्षयन् समिच्छब्द अनन्यापेक्षलक्ष्म्युद्दीपनक्षमत्वं व्यनक्ति।

अत्र प्राधान्येन शब्दस्य (समिच्छब्दस्य) व्यञ्जकता अर्थस्य सहकारिता। विवक्षितान्यपरवाच्यध्वनौ अर्थस्य प्राधान्येन व्यञ्जकता यथा–

**पश्य निश्चलनिष्पन्दा बिसिनीपत्रे राजते बलाका।**
**निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव॥**[2]

अत्र निष्पन्दत्वेन आश्वस्तत्वादिरूपं व्यङ्ग्यार्थं समायाति। ततश्चात्र अर्थस्य प्राधान्येन व्यञ्जकता शब्दस्य च सहकारिता।

कथनस्य तात्पर्यमिदं यत्र शाब्दीव्यञ्जना तत्रार्थस्य तथा यत्र आर्थीव्यञ्जना तत्र शब्दस्य सहकारिता न त्रुट्यति। ततश्च 'व्यङ्क्तः' इति साधु। तदुक्तं लोचने –

'व्यङ्क्तः' इति द्विवचनेनेदमाह – यद्यप्यविवक्षितवाच्ये शब्द एव व्यञ्जकस्तथाप्यर्थस्यापि सहकारिता न त्रुट्यति, अन्यथा अज्ञातार्थोऽपि शब्दस्तद्व्यञ्जकः स्यात्। विवक्षितान्यपरवाच्ये च शब्दस्यापि सहकारित्वं भवत्येव, विशिष्टशब्दाभिधेयतया विना तस्यार्थस्याव्यञ्जकत्वादिति सर्वत्र शब्दार्थयोरुभयोरपि ध्वननं व्यापारः। तेन यद्भट्टनायकेन द्विवचनं दूषितं तद् गजनिमीलिकयैव।

1 धृतिः क्षमा दया शौचं कारुण्यं वागनिष्ठुरा।
मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः॥ का. 1 वृत्तौ ध्वन्यालोके तृतीयोद्योते

2 का. 7 वृत्तौ काव्यप्रकाशे द्वितीयोल्लासे

अत्र ध्वनिकारस्य 'व्यङ्क्तः' तथा लोचनकारस्य च तद्व्याख्यानेन ज्ञायते यत् वैय्याकरणानां 'नित्याः शब्दार्थसम्बन्धाः' वा 'सिद्धे शब्दार्थ-सम्बन्धे' इत्यस्य सिद्धान्तस्य प्रभावोऽत्र वर्तते। वैय्याकरणास्तावत् शब्दार्थयोस्तथा तयोः सम्बन्धस्य च नित्यतां मन्वते। तदुक्तं पातञ्जलमहाभाष्ये-

'सिद्धे शब्देऽर्थे सम्बन्धे चेति। अथ सिद्धशब्दस्य कः पदार्थः? नित्यपर्यायवाची सिद्धशब्दः। कथं ज्ञायते? यत्कूटस्थेषु अविचालिषु भावेषु वर्तते। तद्यथा - सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशमिति। ननु च भोः! कार्येष्वपि वर्तते। तद्यथा सिद्ध ओदनः, सिद्धः सूपः, सिद्धा यवागूरिति। यावता कार्येष्वपि वर्तते, तत्र कुत एतन्नित्यपर्यायवाचिनो ग्रहणम्, न पुनः कार्ये यः सिद्धशब्द इति? सङ्ग्रहे तावत्कार्यप्रतिद्वन्द्विभावात् मन्यामहे नित्यपर्यायवाचिनो ग्रहणमिति। इहापि तदेव।

अथवा सन्त्येकपदान्यप्यवधारणानि। तद्यथा अब्भक्षो वायुभक्ष इति 'अप एव भक्षयति वायुमेव भक्षयतीति गम्यते।' एवमिहापि सिद्ध एव न साध्यः।

अथवा पूर्वपदलोपोऽत्र द्रष्टव्यः अत्यन्तसिद्धः सिद्ध इति। तद्यथा देवदत्तो दत्तः सत्यभामा भामेति।

अथवा 'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्' इति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्यामः।

किं पुनरनेन वर्ण्येन, किं न महता कण्ठेन नित्यशब्द एवोपात्तः। यस्मिन्नुपादीयमानेऽसन्देहः स्यात्?

माङ्गलिक मङ्गलार्थम्। आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं 'सिद्ध-शब्दम्' आदितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते, वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरूषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति।'[1]

वार्तिककारकात्यायनेनापि कथितं यत् 'सिद्धे शब्दार्थसम्बन्धे लोकतोऽर्थप्रयुक्ते शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु।'[2]

भर्तृहरिस्तु सिद्धादिपदं विहाय साक्षात् नित्यशब्दं प्रयुञ्जानो ब्रवीति-

---

1 प्रथमाध्याये प्रथमपादः पस्पशाह्निके महाभाष्ये

2 प्रथमवार्तिको वार्तिकखण्डे

**नित्याः शब्दार्थसम्बन्धाः तत्राम्नाता महर्षिभिः।**
**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः॥**[1]

अस्य व्याख्याने स्वयं भर्तृहरिः कथयति हरिवृषभवृत्तौ यत् –

'नित्यः शब्दो नित्योऽर्थो नित्यः सम्बन्ध इत्येषा शास्त्रव्यवस्था। 'तत्राम्नाता महर्षिभिः – सूत्रादीनां प्रणेतृभिः। व्याकरण एव ये सूत्रादीनां प्रणेतारस्ते व्यपदिश्यन्ते। तत्र सूत्राणामारम्भादेव शब्दानां नित्यत्वमभिहितम्। न ह्यनित्यत्वे शब्दादीनां शास्त्रारम्भे किञ्चिदपि प्रयोजनम्। व्यवहारमात्रं ह्येतदनर्थकं न महान्तः शिष्टाः समनुग्रहीतुमर्हन्ति। तस्माद् व्यवस्थित-साधुत्वेषु शब्देषु स्मृतिशास्त्रं प्रवृत्तमिति।

अपरे तु 'तदशिष्यं सञ्ज्ञाप्रमाणत्वात्'[2] इत्येवमादीनि सूत्राणि नित्यं प्रति समर्थयन्ते। अनुतन्त्रेषु खल्वपि 'सिद्धे शब्दार्थसम्बन्धे' इति, सिद्धं तु नित्यशब्दत्वात् इति 'स्फोटः' शब्दो ध्वनिस्तस्य व्यायाम उपजायते। सर्वे सर्वपदादेशाः इत्येवमादि।

भाष्ये खल्वप्युक्तं 'संग्रहे एतत् प्राधान्येन परीक्षितं नित्यः शब्दः' इति। अनुतन्त्रभाष्येऽप्युक्तं 'नित्येषु शब्देषु कूटस्थैर्वर्णैरविचालिभिर्भवितव्यम् इत्येवमादि।'[3]

तथैव काव्यक्षेत्रेऽपि शब्दार्थयोर्नित्यसम्बन्धः स्वीकृतः। 'अर्थः शम्भुः शिवा वाणी' इति प्रसिद्धिः साहित्ये, ततश्च कालिदासेनोक्तम् –

**वागर्थाविवसम्पृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥**[4]

अस्मात्कारणादेव ध्वनिकारेण ध्वनिलक्षणे 'व्यङ्क्तः' इति द्विवचनं प्रयुक्तं, यत्रोपसर्जनीकृतस्व अर्थः, उपसर्जनीकृतार्थः शब्दो वा प्रतीयमानमर्थं व्यङ्क्तः (द्योतयतः) सः काव्यविशेषो ध्वनिः।

तत्र ध्वनिलक्षणे शाब्दीव्यञ्जनायाः कृते शब्दः तथा आर्थीव्यञ्जनायाः

1 का. 23 ब्रह्मकाण्डे वाक्यपदीये
2 पाणिनिसूत्रम् 1/2/51
3 तत्रैव व्याख्याने भर्तृहरिः
4 रघुवंशमहाकाव्ये मङ्गलाचरणम् श्लो. 1

कृते अर्थः प्रयुक्तः। यत्र शाब्दीव्यञ्जना भवति तत्रार्थस्य सहकारिता भवति, यत्रार्थीव्यञ्जना तत्र शब्दस्य सहकारिता, तदुक्तं मम्मटेन –

**शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः।**
**अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता॥**[1]

विश्वनाथेनाप्युक्तं साहित्यदर्पणे यत्–

**शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः।**
**एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता॥**[2]

यतः शब्दो व्यञ्जकत्वेऽप्यर्थान्तरमपेक्षते, अर्थोऽपि शब्दम्, तदेकस्य व्यञ्जकत्वेऽन्यस्य सहकारितावश्यमङ्गीकर्तव्या।[3]

इत्थं 'व्यङ्क्तः' इत्यत्रापि व्याकरणावदानं वर्तते। सम्प्रति अभिधामूलां व्यञ्जनां प्रति व्याकरणस्यावदानं वर्ण्यते। तथाहि व्यञ्जनास्तावद् द्विविधा, तत्राद्या अभिधामूला द्वितीया लक्षणामूला तदुक्तम्–

**'अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा'।**[4]

तत्र अभिधामूला विवक्षितान्यपरवाच्यरूपा लक्षणमूला अविवक्षित–वाच्यरूपा, तदुक्तम् –

**भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूलौ।**
**अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यश्च॥**[5]

तत्राविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः। लक्षणामूलत्वादेवात्र वाच्यमविवक्षितं बाधितस्वरूपम्। विवक्षितान्यपरवाच्यस्त्वभिधामूलः, अत एवात्र वाच्यं विवक्षितम्। अन्यपरं व्यङ्ग्यनिष्ठम्।[6]

तत्राभिधामूलायां व्यञ्जनायां संयोगादिभिः चतुर्दशकारणैरनेकार्थस्य शब्दस्य वाच्येऽर्थे नियन्त्रिते सति या शक्तिरपरमर्थं (व्यङ्ग्यार्थं) बोधयति सा अभिधामूलाव्यञ्जना। तदुक्तं विश्वनाथेन –

1 का. 23 का. प्र. तृ. उल्लासः
2 का. 18 साहित्यदर्पणः द्वितीयपरिच्छेदः
3 तत्रैव व्याख्याने
4 का. 13 साहित्यदर्पणः द्वितीयपरिच्छेदः
5 का. 2 साहित्यदर्पणः चतुर्थपरिच्छेदः
6 का. 2 वृत्तौ साहित्यदर्पणः चतुर्थपरिच्छेदः

**अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।**
**एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया।।**[1]

मम्मटेनाप्युक्तम् -

**अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।**
**संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम्।।**[2]

तदित्थं सर्वेऽपि ध्वनिभेदकर्तारः साहित्याचार्या अभिधामूलव्यञ्जनायाः प्रसङ्गे भर्तृहरेः कारिके: प्रमाणत्वेन प्रयच्छन्ति। ते च यथा -

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**
**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।।**
**सामर्थ्यमौचिती देशः कालो व्यक्तिस्वरादयः।**
**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।।**[3]

भर्तृहरिणा तावत् शब्दार्थस्यानवच्छेदे (प्रकृतार्थसन्देहे) सति प्रस्तुतार्थ-निश्चायकत्वेन संयोगादीनां चर्चा कृता, परं ध्वनिसमयान्तपातिनः काव्यविदः पूर्वोक्तानां संयोगादीनां ग्रहणं व्यञ्जनाप्रसङ्गे कुर्वन्ति। तत्र ध्वनिकृता शब्द-शक्त्युत्थध्वनिप्रसङ्गे उक्तं यत् -

**आक्षिप्त एवालङ्कारः शब्दशक्त्या प्रकाशते।**
**यस्मिन्ननुक्तः शब्देन शब्दशक्त्युद्भवो हि सः।।**[4]

यत्र शब्दशक्त्या आक्षिप्तः (व्यङ्ग्यः) अलङ्कारः केनापि शब्देनानुक्तस्सन् प्रकाशते स शब्दशक्त्युद्भवो ध्वनिः। तत्रोदाहरणत्वेन स्थलत्रयं दर्शयति ध्वनिकारः तद्यथा-

'अत्रान्तरे कुसुमसमययुगमुपसंहरन्नजृम्भत ग्रीष्माभिधानः फुल्ल-मल्लिकाधवलाट्टहासो महाकालः'।[5] इति

अत्र प्राकरणिकोऽर्थो ग्रीष्माभिधानस्य महाकालस्य वर्तते। स च

---

1 का. 14 साहित्यदर्पणः द्वितीयपरिच्छेदः
2 का. 19 काव्यप्रकाशः द्वितीयपरिच्छेदः
3 वाक्यपदीयम्
4 का. 21 ध्वन्यालोके द्वितीयोद्योतः
5 तत्रैव वृत्तौ

महाकालः कुसुमसमयस्य युगं नाम चैत्रवैशाखात्मकमासद्वयम् उपसंहरन् समाप्तिं नयन्धवलानि अट्टानि (हर्म्यपृष्ठानि) येन स धवलाट्टः, फुल्लमल्लिकानां धवलाट्टः हासो विकासो यत्र सः ग्रीष्मनामा महाकालः ग्रीष्मर्तुरित्यर्थः अजृम्भत।

अप्राकरणिकोऽर्थः शिवस्य सोऽपि महाकालः। तथाहि कुसुमसमयसदृशं युगं सत्यादियुगम् उपसंहरन् नाशयन् फुल्लमल्लिकावद्ध वलोऽट्टहासो यस्य तादृशः महाकालः शिव अजृम्भत।

अत्र शिवपक्षीयार्थस्य ज्ञानं नाभिधया, प्रत्युत व्यञ्जनया तथा प्रकरणेन ग्रीष्मकालस्यार्थस्य नियन्त्रिते सति शिवग्रीष्मयोरूपमानोपमेयभावस्य च प्रतीतिरभिधामूलव्यञ्जनयैवेति ध्वनिविषयोऽयम्। अथवा

**उन्नतः प्रोल्लसद्धारः कालागुरुमलीमसः।**
**पयोधरभरस्तन्व्याः कं न चक्रेऽभिलाषिणम्।।**[1]

प्राकरणिकोऽर्थोऽत्र मेघविषयकः, तथाहि उन्नतः गगनोच्छ्रितः तथा प्रोल्लसन्ती निस्सरन्ती धारा जलप्रपातो यस्मात् सः, कालागुरुरिव मलीमसः श्यामः पयोधरभरो मेघसमूहः कं जनं तन्व्या विषयेऽभिलाषिणं न चक्रे? अर्थात् सर्वान् चक्रे।

अप्राकरणिकोऽर्थोऽत्र वक्षस्थलविषयकः तद्यथा उन्नतो यौवनेनोच्छ्रितः प्रोल्लसन् शोभमानो हारो मौक्तिकस्रक् यत्र तादृशः, कालागुरुणा काकतुण्डेन (तेनोपलिप्तेन) मलीमसः श्यामः तन्व्याः पयोधरभरः स्तनाभोगः कं जनमभिलाषिणं न चक्रे।

अत्र वक्षस्थलपक्षीयार्थस्य भानं नाभिधया प्रत्युत व्यञ्जनया तथा वर्षाप्रकरणेन मेघपक्षीयार्थस्य नियन्त्रिते सति स्तनमेघयोरूपमानोपमेयभाव-प्रतीतिरभिधामूलव्यञ्जनयेवेति ध्वनेर्विषयोऽयम्। पुनरुदाहरणान्तरं ददाति-

**दत्तानन्दाः प्रजानां समुचितसमयाकृष्टसृष्टैः पयोभिः**
**पूर्वाह्णे विप्रकीर्णा दिशि दिशि विरमत्यह्नि संहारभाजः।**
**दीप्तांशोर्दीर्घदुःखप्रभवभवभयोदन्वदुतारनावो**
**गावो वः पावनानां परमपरिमितां प्रीतिमुत्पादयन्तु।।**[2]

---

1 का. 21 वृत्तौ ध्वन्यालोके द्वितीयोद्योते

2 का. 21 वृत्तौ ध्वन्यालोके द्वितीयोद्योते

मयूरकवेः सूर्यस्तोत्रपरं पद्यमिदं ततश्च प्राकरणिकोऽर्थोऽत्र सूर्यविषयको यत् दीप्तांशोः सूर्यस्य गावः किरणाः पावनानां पवित्राणां परं सर्वोत्कृष्टाः वो युष्माकम् अपरिमितां निरतिशयां प्रीतिमुत्पादयन्तु।

अप्राकरणिकोऽर्थोऽत्र धेनुविषयको यत् गावो धेनवः पावनानां पवित्राणां परं सर्वोत्कृष्टाः वो युष्माकम् अपरिमितां निरतिशयां प्रीतिमुत्पादयन्तु।

अत्रापि सूर्यप्रकरणेन किरणपक्षीयार्थस्याभिधया नियन्त्रिते सति धेनुपक्षीयार्थस्य तथा धेनुकिरणयोरूपमानोपमेयभावस्य प्रतीतिरभिधामूल-व्यञ्जनयैवेति ध्वनेर्विषयोऽयम्।

अत्र त्रिष्वपि स्थलेषु प्रकरणेन प्रस्तुतार्थस्य नियमनाद् द्वितीयार्थस्य ज्ञानं तथा तयो प्राकरणिकाप्राकरणिकयोरर्थयोरूपमानोपमेयभावस्य प्रतीतिरभिधामूलव्यञ्जनद्वारा, तदुक्तं ध्वनिकृता –

'एषूदाहरणेषु शब्दशक्त्या प्राकशमाने सत्यप्राकरणिकेऽर्थान्तरे वाक्यस्यासम्बद्धार्थाभिधायित्वं मा प्रसांक्षीदित्यप्राकरणिकप्राकरणिकार्थयो-रूपमानोमेयभावः कल्पयितव्यः।'[1]

उपमातिरिक्तालङ्कारा अपि शब्दशक्त्युत्थध्वनौ सम्भवन्ति। तदुक्तं ध्वनिकृता तत्रैव-

'अन्येऽपि चालङ्काराः शब्दशक्तिमूलानुस्वानरूपव्यङ्ग्यध्वनौ सम्भवन्त्येव। तथाहि विरोधोऽपि शब्दशक्तिमूलानुस्वानरूपो दृश्यते। यथा स्थाण्वीश्वराख्यजनपदवर्णने भट्टबाणस्य-

'यत्र च मत्तमातङ्गगामिन्यः शीलवत्यश्च, गौर्यो विभवरताश्च, श्यामाः पद्मरागिण्यश्च धवलद्विजशुचिवदना मदिरामोदश्वसनाश्च प्रमदाः।'[2]

बाणभट्टस्य हर्षचरिते स्थाण्वीश्वराख्यजनपदस्य वर्णने प्रमदानां (कामिनीनां) वर्णने विरोधालङ्कारस्य[3] व्यञ्जना दृश्यते, तद्यथा-

यत्र प्रमदा मत्तमातङ्गान् चाण्डालान् गच्छन्ति तथापि शीलवत्यः कथमिति संदेहे सति 'मत्तमातङ्गवद् गजवद् गच्छन्ति, अथवा मत्तमातङ्गेन गच्छन्ति' इति परिहारः।

---

1 का. 21 वृत्तौ ध्वन्यालोके द्वितीयोद्योते

2 का. 21 वृत्तौ ध्वन्यालोके द्वितीयोद्योते

3 विरोधः सोऽविरोधेऽपि विरूद्धत्वेन यद्वचः। का. 110 काव्यप्रकाशः

तथैव 'गौर्य: पार्वत्य: विभिन्नो भव: (शिवो) यस्मात् स: तस्मिन् शिवभिन्ने रता:' इति विरोध: तर्हि गौर्य: गौरवर्णा: तथा विभवे धने रता इति परिहार:।

तथा 'श्यामा: कृष्णवर्णा: तथा पद्मस्येव रक्तवर्णा' इति विरोध: तर्हि 'श्यामा: यौवनमध्यस्था: पद्ममणिरागयुक्ताश्चेति परिहार:।

तथा धवलद्विजानां शुद्धब्राह्मणानामिव शुचि पवित्रं वदनं यासां ता:, मदिरया आमोदि श्वसनं मुखमारूतो यासां ता इति विरोध: तर्हि धवलै: श्वेतैर्द्विजैर्दन्तै: शुचि स्वच्छं वदनं मुखं यासां ता इति परिहार:। साहित्यदर्पणे विश्वनाथेनाप्यस्मिन् प्रसङ्गे विशुद्धमुक्तं यत्–

'एवमेकस्मिन्नर्थेऽभिधया नियन्त्रिते या शब्दार्थस्यान्यार्थबुद्धिहेतु: शक्ति: साऽभिधामूला व्यञ्जना।

यथा मम तातपादानां महापात्रचतुर्दशभाषाविलसिनीभुजङ्गमहाकवीश्वर–श्रीचन्द्रशेखरसन्धिविग्रहिकाणाम्–

**दुर्गालङ्घितविग्रहो मनसिजं समीलयंस्तेजसा**
**प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभि:।**
**नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन्**
**गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभ:।।**

अत्र प्रकरणेनाभिधया उमावल्लभशब्दस्योमानाम्नीमहादेवीवल्लभभानुदेवनृपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपोऽर्थो बोध्यते।'[1]

तदित्थं सर्वत्राभिधामूलायां व्यञ्जनायां भर्तृहरिकारिकानुरोधेन (संयोगो विप्रयोगश्च..) प्रस्तुतार्थनियन्त्रिते सति प्रस्तुतार्थभिन्नस्य ज्ञानं व्यञ्जनयैव। तत्र अभिधामूलव्यञ्जनाया द्वौ भेदौ, तौ च संलक्ष्यक्रमव्यङ्ग्या–संलक्ष्यक्रमव्यङ्ग्यरूपौ। तदुक्तं ध्वनिकृता।

**असंलक्ष्यक्रमोद्योत: क्रमेण द्योतित: पर:।**
**विवक्षिताभिधेयस्य ध्वनेरात्मा द्विधा मता:।।**[2]

तत्र असंलक्ष्यक्रमव्यङ्ग्यस्यानन्ता: प्रभेदा:। तदुक्तम्–

---
1 का. 14 वृत्तौ साहित्यदर्पणे द्वितीयपरिच्छेदे
2 का. 2 ध्वन्यालोके द्वितीयोद्योते

**तत्राद्यो रसभावादिरेक एवात्र गण्यते।**
**एकोऽपि भेदोऽनन्तत्वात् संख्येयस्तस्य नैव यत्॥**[1]

तथाहि एकस्यैव शृङ्गारस्यैकोऽपि संभोगरूपो भेदः परस्परालिङ्गना-धरपानचुम्बनादिभेदात् प्रत्येकं च विभावादिवैचित्र्यात्संख्यातुमशक्यः, का गणना सर्वेषाम्?[2]

ध्वकृितापि प्रतिपादितं यत् –

**तस्याङ्गानां प्रभेदा ये प्रभेदा स्वगताश्च ये।**
**तेषामानन्त्यमन्योन्यसम्बन्धपरिकल्पने ॥**[3]

द्वितीयस्य संलक्ष्यक्रमव्यङ्ग्यस्य त्रयो भेदा शब्दार्थोभयशक्त्युत्थरूपाः तदुक्तम् –

**शब्दार्थोभयशक्त्युत्थे व्यङ्ग्येऽनुस्वानसन्निभे।**
**ध्वनिर्लक्ष्यक्रमव्यङ्ग्यस्त्रिविधः कथितो बुधैः॥**[4]

शब्दशक्त्युद्भवत्वेन अर्थशक्त्युद्भवत्वेन शब्दार्थशक्त्युद्भवत्वेन संलक्ष्यक्रमव्यङ्ग्यः त्रिविधः। तत्र शब्दशक्त्यद्भुवस्य पुनर्द्वौ भेदौ वस्त्वलङ्काररूपौ, तदुक्तम् –

**'वस्त्वलङ्काररूपत्वाच्छब्दशक्त्युद्भवो द्विधा।'**[5]

अत्र शब्दशक्त्युद्भवस्य अलङ्कारव्यङ्ग्यरूपे द्वितीये भेदे सर्वत्र प्रकरणज्ञानस्यापेक्षा, विना प्रकरणज्ञानं न जातुचित् अलङ्कारध्वनिः। यत्र च प्रकरणज्ञानं नास्ति तत्राभिधयैव अर्थद्वयस्य प्रतीतिः, तद्यथा –

**येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो**
**यश्चोद्वृत्तभुजङ्गहारवलयो गङ्गां च योऽधारयत्।**
**यस्याहुः शशिमच्छिरो हर इति स्तुत्यं च नामामराः**
**पायात् स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः॥**[6]

1 का. 5 साहित्यदर्पणे चतुर्थपरिच्छेदे
2 तत्रैव वृत्तौ
3 का. 12 ध्वन्यालोके द्वितीयोद्योते
4 का. 5 साहित्यदर्पणः चतुर्थपरिच्छेदः
5 का. 7 साहित्यदर्पणः चतुर्थपरिच्छेदः
6 का. 21 वृत्तौ ध्वन्यालोके द्वितीयोद्योते

अत्र प्रकरणज्ञानाभावात् हरिहरौ द्वावपि अभिधया बोध्येते। यत्र च प्रकरणज्ञानं भवति तत्रापरार्थस्य प्रतीतिरभिधामूलव्यञ्जनयैव। किञ्च शब्द-शक्त्युद्भवस्य प्रथमे भेदे वस्तुव्यङ्ग्यरूपेऽपि प्रकरणज्ञानस्यापेक्षा, तद्यथा –

**'पन्थिअ! ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे।**
**उण्णअपओहरं पेक्खिऊण जइ वससि ता वससु॥**
**'पथिक! नात्र स्रस्तरमस्ति मनाक्प्रस्तरस्थले ग्रामे।**
**उन्नतपयोधरं प्रेक्ष्य यदि वससि तद्वस॥**[1]

इति संस्कृतच्छाया

रात्रौ निवासार्थिनं प्रति प्रोषितभर्तृकाया उक्तिरियं हे पथिक! प्रस्तरस्थले (पाषाणपूर्णस्थले) अस्मिन् ग्रामे मनाक् स्रस्तरं शयनायास्तरणं नास्ति उन्नपयोधरम् उद्भूतमेघं प्रेक्ष्य यदि वससि शयनीयास्तरणाभावेऽपि अवस्थानं करोषि चेत् वस।

अत्र शब्दशक्तिमहिम्ना प्रतिध्वनिरूपेण हे पान्थ! अत्र प्रस्तरस्थले ग्रामे कामशास्त्रज्ञानाभावेन प्रस्तरप्रायजडयुक्ते ग्रामे स्रस्तरं शास्त्रं, कामशास्त्रं नास्ति (कामशास्त्रज्ञाता विदग्धो नास्ति, मम उन्नतपयोधरं यौवनवशादुच्चस्तनं वीक्ष्य यदि उपभोगक्षमोऽसि चेद्वसेति स्रस्तरपयोधरशब्दयोः परिवृत्त्यसहत्वात् शब्दशक्तिमूलो वस्तुध्वनिः।

तदित्थं साक्षाद् व्याकरणशास्त्रस्यावदानं (हरिकारिकाद्वारा 'संयोगो विप्रयोगश्च.. इत्यनेन) व्यञ्जनायाः प्रभेदेषु दृश्यते, यद्यपि भर्तृहरिणा नानार्थकशब्दानां प्रकृतार्थसंदेहे चतुर्दशनिश्चायकाः परिगणिता तथापि तेषु संयोगविप्रयोगसाहचर्यप्रभृतिषु प्रकरणज्ञानस्य सर्वाधिकोपयोगिता काव्यक्षेत्रे, विशेषतो ध्वनिप्रभेदेषु तत्र प्रकरणादिवशादेव सर्वेषां वाच्यलक्ष्यव्यङ्ग्यार्थानां व्यञ्जकता भवति। तदुक्तं 'सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते'।[2]

अत्र प्रायशः पदस्येदमेव रहस्यं यत् सति वक्तृबोद्धव्य-प्रकरणादिवैशिष्ट्ये सर्वेषामपि वाच्यलक्ष्यव्यङ्ग्यार्थानां व्यञ्जकत्वम्। तत्र वाच्यार्थस्य व्यञ्जकत्वे प्रकरणादिवैशिष्ट्यं यथा –

1 का. 7 वृत्तौ तत्रैव साहित्यदर्पणे
2 का. 7 काव्यप्रकाशः

**मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया।**
**तद्भण किं करणीयमेवमेव न वासरः स्थायी।।**[1]

प्रकरणमत्रास्ति यत् काचित् स्वैरिणी केनापि नायकेन सह रन्तुकामा सत्याह मातरं यत् 'गृहे किमपि भोजनाद्युपकरणं नास्ति ततश्च हे मातः शीघ्रं वद किं कर्तुं योग्यं सम्प्रति, कारणं दिनं वर्तमानमिव स्थिरं नास्ति अर्थात् शीघ्रमेव रात्रिर्भविष्यति ततश्च त्वया प्रेषिताप्यहं सत्कुलप्रसूतात्वेन बहिर्नो गमिष्यामि। अत्र प्रकरणस्य ज्ञानेनेयं नायिका रन्तुकामेति व्यज्यते तस्मान्मम्मटेनोक्तं यत् 'अत्र स्वैरविहारार्थिनीति व्यज्यते।' अत्र शुद्धो वाच्यार्थ एव प्रकरणादिसहकृतो व्यञ्जकः।

तथैव लक्ष्यव्यङ्ग्यार्थयोरपि प्रकरणादिसहकारद्वारा व्यञ्जकता काव्यप्रकाशे दर्शिता।[2]

सम्प्रति अर्थशक्त्युद्भवस्य भेदेष्वपि प्रकरणज्ञानस्य सापेक्षता वर्ण्यते। तथाहि विवक्षितान्यपरवाच्यस्य ध्वनेः त्रयो भेदाः ते च शब्दशक्त्युद्भवार्थ-शक्त्युद्भवोभयशक्त्युद्भवरूपाः तदुक्तम् -

**शब्दार्थोभयशक्त्युत्थे व्यङ्ग्येऽनुस्वानसन्निभे।**
**ध्वनिर्लक्ष्यक्रमव्यङ्ग्यस्त्रिविधः कथितो बुधैः।।**[3]

तत्रार्थशक्त्युद्भवस्य द्वादशभेदेषु सर्वत्र वस्त्वलङ्कारयोरन्यतमो व्यङ्ग्यो भवति तथा सर्वत्र प्रकरणज्ञानस्यापेक्षा वर्तते। तत्र वस्तुध्वनिविषये ध्वनिकारो वदति यत्-

---

1 का. 7 वृत्तौ काव्यप्रकाशः

2 साधयन्ती सखी सुभगं क्षणे क्षणे दूनासि मत्कृते। सद्भावस्नेहकरणीयसदृशकं तावद् विरचितं त्वया।। अत्र मत्प्रियं रमन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यं तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यम्। व्यङ्ग्यस्य यथा - पश्य निश्चलनिष्पन्दा बिसिनी पत्रे राजते बलाका। निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिवा।।
अत्र निष्पन्दत्वेन आश्वस्तत्वम्। तेन च जनरहितत्वम्। अतः सङ्केतस्थानमेतदिति कयाचित् कञ्चित् प्रति उच्यते। अथवा मिथ्या वदसि न त्वमत्रागतोऽभूरिति व्यज्यते।

3 का. 6 साहित्यदर्पणः चतुर्थपरिच्छेदः

**अर्थशक्त्युद्भवस्त्वन्यो यत्रार्थः स प्रकाशते।**
**यस्तात्पर्येण वस्त्वन्यद् व्यनक्त्युक्तिं विना स्वतः॥**[1]

अर्थशक्त्युद्भवनामकः संलक्ष्यक्रमव्यङ्ग्यध्वनेर्द्वितीयो भेदो वर्तते, यत्र ध्वननव्यापारेण अन्यद् वस्तु (वस्तुध्वनिः) विना शब्दव्यापारं प्रकाशते। तद्यथा–

**शिखिपिच्छकर्णपूरा जाया व्याधस्य गर्विणी भ्रमति।**
**मुक्ताफलरचितप्रसाधनानां मध्ये सपत्नीनाम्॥**[2]

व्याधस्य जायासु नवपरिणीता, यस्याः किल कर्णालङ्कारो मयूरस्य पिच्छेन विनिर्मितः सा मुक्ताफलैर्विरचितानां प्रसाधनानां सपत्नीनां मध्ये गर्विणी सती भ्रमतीति वाच्यार्थः।

अत्र प्रकरणस्य ज्ञानेन नवपरिणीतायाः सौभाग्यातिशयो व्यज्यतेऽर्थशक्तिमहिम्ना। तद्यथा प्राक् सपत्नीभिः सह संभोगावसरे स एव व्याधः करिवरशतानां व्यापादने शक्त आसीत्। अर्थात् तासां रूपं सौभाग्यं सामर्थ्यं वा तादृशं नासीत् येन स व्याधः तासां वशे भवेत्। ततश्च संभोगपराङ्मुखो व्याधः करिवराणां हननेन तेषां (करिणां) मौक्तिकं ताभ्यः पत्नीभ्य अदात्, तेन तासां प्रसाधनं मुक्ताफलैर्विरचितम्। परं यदा नववध्वागता तदा तत्सम्भोगरतस्सन् क्षिणो भवन् स एव व्याधो मयूरमात्रमारणे समर्थो जातो न तु करिवराणां, ततश्च मयूरमारणेन तत्पिच्छं तस्यै नवपरिणीतायै अदात् येन तस्यालङ्कारो मयूरपिच्छस्यास्ति। यद्यपि महार्घं सपत्नीनां प्रसाध नं तथापि सौभाग्यन्तु नववध्वा एव।

अतः प्रकरणज्ञानेनात्र नवपरिणीतायाः सौभाग्यातिशयो व्यज्यते, तदुक्तं ध्वनिकृता –

'अनेनापि वाक्येन व्याधवध्वाः शिखिपिच्छकर्णपूराया नवपरिणीतायाः कस्याश्चित् सौभाग्यातिशयः प्रकाश्यते।

तत्सम्भोगैकरतो मयूरमात्रमारणसमर्थः पतिर्जात इत्यर्थप्रकाशनात्। तदन्यासां चिरपरिणीतानां मुक्ताफलरचितप्रसाधनानां दौर्भाग्यातिशयः ख्याप्यते।

1 का. 22 ध्वन्यालोकः द्वितीयोद्योते

2 का. 24 वृत्तौ तत्रैव

तत्सम्भोगकाले स एव व्याधः करिवरवधव्यापारसमर्थ आसीदित्य-र्थप्रकाशनात्।'[1]

अर्थशक्त्युद्भवस्यालङ्कारध्वनिविषये ध्वनिकारो वक्ति यत्-

**अर्थशक्तेरलङ्कारो यत्राप्यन्यः प्रतीयते।**
**अनुस्वानोपमव्यङ्ग्यः स प्रकारोऽपरो ध्वनेः॥**[2]

यत्रार्थशक्त्या वाच्यार्थव्यतिरिक्तोऽन्योऽलङ्कारो व्यज्यते सः संलक्ष्यक्रमव्यङ्ग्यस्यापरो भेदः तद्यथा -

**जायेय वनोद्देशे कुब्ज एव पादपो गलितपत्रः।**
**मा मानुषे लोके त्यागैकरसो दरिद्रश्च॥**[3]

अत्र प्रकरणस्य ज्ञानेन त्यागैकरसस्य दरिद्रस्य गलितपत्रवृक्षापेक्षया शोच्यताधिक्यरूपो व्यतिरेकालङ्कारो व्यज्यते। तद्यथा कश्चिन्निर्धनो दानकर्तु-कामोऽप्यसमर्थस्सन् ब्रवीति वनस्यैकान्तगहनेऽहं गलितपत्रवृक्षो भवेयमिति तु वरं कारणं वने तावत् फलकुसुमबहुलान् वृक्षान् जनाः सेविष्यन्ते मयि तु कस्यापि दृष्टिरपि नो भविष्यति, यदि काष्ठाद्यपेक्षया कश्चिदागच्छेत् तथापि कुब्जत्वादहमनुपयोगी एव भवेयमिति 'कुब्जपदस्य' तात्पर्यम्। एतत्तु किञ्चित्प्रियं तथापि मानुषे लोके त्यागैरसो दरिद्रो न भवेयमिति।

अत्र त्यागैकरसस्य दरिद्रस्य जन्मनो निन्दा त्रुटितपत्रकुब्जपादपजन्मनः प्रशंसा वाच्या तया वाच्यप्रशंसया तादृशात् पादपात् तादृशस्य पुंसः शोच्यता-धिक्यरूपोव्यतिरेकालङ्कारो व्यज्यते। तदुक्तं ध्वनिकृता -

'अत्र हि त्यागैकरसस्य दरिद्रस्य जन्मानभिनन्दनं त्रुटितपत्रकुब्जपादप-जन्माभिनन्दनं च साक्षाच्छब्दवाच्यम्। तथाविधादपि पादपात् तादृशस्य पुंस उपमानोपमेयत्वप्रतीतिपूर्वकं शोच्यतायामाधिक्यं तात्पर्येण प्रकाशयति।'[4]
लक्षणामूलध्वनावपि प्रकरणज्ञानस्यापेक्षा भवत्येव तद्यथा -

---

1 का. 1 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः
2 का. 25 ध्वन्यालोकः द्वितीयोद्योतः
3 का. 27 वृत्तौ ध्वन्यालोकः द्वितीयोद्योतः
4 तत्रैव व्याख्याने

**उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्।**
**विदधदीदृशमेव सदा सखे! सुखितमास्स्व ततः शरदां शतम्॥**[1]

अत्र प्रकरणज्ञानेन ज्ञायते यत् कश्चन कञ्चिदपकरिणं प्रति विपरीतलक्षणया वक्ति यत् त्वया बहु अपकृतं दुर्जनता च प्रथिता ततश्च हे शत्रो! दु:खितं शरदां शतमास्स्व। अत्रोपकृतं 'सुजनता' 'सखे' 'सुखितम्' एतानि चत्वारि पदानि प्रकरणज्ञानेन स्वार्थेऽसम्भवन्ति विपरीतलक्षणया 'अपकृतं' 'दुर्जनता' 'शत्रो' 'दु:खितम्' रूपं लक्ष्यार्थं बोधयन्ति। तेन चापकारातिशयो व्यज्यते। इत्थं सर्वत्र लक्षणामूलध्वनौ (अविवक्षितवाच्यध्वनौ) प्रकरणज्ञानस्य नितरामुपयोगिता। ततश्चेमां (पुरोवर्तिनीं) कारिकां विवृण्वानो लोचनकारो वक्ति यत् वाच्यार्थोऽर्थान्तरे स्वयं सङ्क्रान्तो न भवति, प्रत्युत सङ्क्रान्तः क्रियते प्रकरणादिद्वारा अर्थान्तरसङ्क्रमितवाच्यध्वनौ। तत्रादौ ध्वनिकृतोक्तम् -

**अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम्।**
**अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम्॥**[2]

लोचनकारो ब्रवीत्यत्र 'सङ्क्रमितम्' इत्यत्र णिच्प्रत्ययेन प्रयोजक-कर्तुर्व्यपेक्षायां व्यञ्जनाया यः सहकारिवर्गः वक्तश्बोद्धव्यप्रकरणादिरूपः तस्य परामर्शो भवति। तत्रार्थः स्वत अर्थान्तरे सङ्क्रान्तो न भवति तथैव 'तिरस्कृतम्' इत्यत्रापि। विना प्रकरणादिसहकारिवर्गं न त्वर्थोऽर्थान्तरे सङ्क्रमितो न वा तिरस्कृतो भवति। तदुक्तं लोचने-

'सङ्क्रमतिमिति णिचा व्यञ्जनाव्यापारे यः सहकारिवर्गस्तस्यायं प्रभाव इत्युक्तं तिरस्कृतशब्देन च।'।[3]

तत्र लक्षणाया इमौ द्वौ भेदौ 'अर्थान्तरसङ्क्रमितवाच्यात्यन्त-तिरस्कृतरूपौ', उभयत्र प्रकरणस्यावश्यकता भवत्येव तद्यथा -

अर्थान्तरसङ्क्रमितवाच्यो यथा -

**स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना**
**वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।**

1 का. 24 वृत्तौ का. प्र. चतुर्थोल्लासः

2 का. 1 ध्वन्यालोकः प्रथमोद्योतः

3 तत्रैव व्याख्याने लोचने

**कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे**
**वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव॥**[1]

महानाटकस्य श्लोकेऽस्मिन् सीताविरहोत्कण्ठितस्य रामस्योक्तीयं यत् यद्यपि वर्षर्तौ कामोद्दीपकाः मेघ-वात-केकाप्रभृतयः सन्तु तथापि दृढहृदयोऽहं रामः सर्वं सोढुं क्षमे किन्तु या स्वभावकोमला सीता, सा कथं भविष्यतीति विचिन्त्य अथ भावनया प्रत्यक्षीक्रियमाणामिव तामाश्वासयति हा देवि सीते धीरा भव।

अत्र 'रामोऽस्मि सर्वं सहे' इत्यत्र रामशब्दः सुखदुःखसहनाभ्यत-रूपेऽर्थान्तरे परिणतस्सन् व्यञ्जनया राज्यनिर्वासनाद्यसंख्येयं प्रयोजनं बोध यति। यद्यत्र सूक्ष्मदृष्ट्या पश्यामस्तर्हि ज्ञायते यत् कश्चन रामोऽस्ति तस्मात् सर्वं स सहिष्यति इत्यत्र को न्यायः? अर्थात् नास्ति कोऽपि न्यायः, तर्हि कथं 'रामोऽस्मि सर्वं सहे' इत्युक्तं, कथं वा तस्यार्थान्तरे परिणतिः, कथं वा प्रयोजनस्य ज्ञानम्? तर्हि समाधानमेकमेव यत् 'प्रकरणज्ञानम्'। प्रकरणमत्र मदनशरासारदीर्यमाणहृदयस्य रामस्य वियोगस्यास्ति तस्मादेव रामपदेन न केवलं दाशरथिरूपस्य संज्ञिनो ज्ञानं प्रत्युत सर्वदुःखसहनाभ्यस्तस्य रामस्य ज्ञानं लक्षणया राज्यनिर्वासनाद्यसंख्येयस्य प्रयोजनस्य च ज्ञानं व्यञ्जनया। अत्यन्ततिरस्कृतवाच्यो यथा -

'गङ्गायां घोषः' इत्यत्र मुख्यार्थस्य बाधे सति सामीप्यसम्बन्धेन गङ्गपदं तटं लक्षयति, तेन च शैत्यपावनत्वादिरूपस्य प्रयोजनस्य प्रतीतिः। अत्रापि प्रकरणज्ञानस्यापेक्षास्त्येव कारणं वक्तुः प्रयोजनमत्रास्ति यत् यथा शीतलतादिः गङ्गायां तथैव घोषेऽपि। सोऽपि स्वयं जानाति यत् जलप्रवाहे न जातुचिद् घोषनिर्माणं तथापि स 'गङ्गातटे घोष' इत्यनुक्त्वा 'गङ्गायां घोष' इति वदति कारणं 'गङ्गातटे घोषः' इति कथनेन न शैत्यादिप्रयोजनस्य प्रतीतिः तस्मात् सो लाक्षणिकप्रयोगं कृतवान्।

तदित्थं लक्षणामूलध्वनावपि प्रकरणज्ञानस्यापेक्षा। तत्र ध्वनिर्द्विधा लक्षणामूलध्वनिः (अविवक्षितवाच्यध्वनिः) अभिधामूलध्वनिः (विवक्षितान्य-परवाच्यध्वनिः)। तदुक्तं ध्वनिकृता 'अस्ति ध्वनिः। स चासावविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविधः सामान्येन।'[2]

1 तत्रैव ध्वन्यालोकवृत्तौ

2 का. 13 वृत्तौ ध्वन्यालोकः प्रथमोद्योतः

तत्राविवक्षितवाच्यध्वनेः प्रभेदेषु तथा विवक्षितान्यपरवाच्यस्य संलक्ष्यक्रमव्यङ्ग्यस्य प्रभेदेषु प्रकरणज्ञानस्य नितरामुपयोगिता दर्शिता।

सम्प्रति विवक्षितान्यपरवाच्यस्य 'असंलक्ष्यक्रमव्यङ्ग्यध्वनिः' इत्याख्ये भेदे प्रकरणज्ञानस्यापेक्षा प्रदर्श्यते। तत्रासंलक्ष्यक्रमव्यङ्ग्यध्वनिर्नाम 'रसः'। तथा सर्वत्र रसचर्वणायां प्रकरणज्ञानस्यापेक्षा भवति। तद्यथा -

**निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो**
**नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।**
**मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे**
**वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्॥**[1]

आपाततो यद्यत्र सम्पूर्णं पद्यं पठामस्तर्हि न कुत्रापि मुख्यार्थस्य बाधा, केवलमत्रेदमेव ज्ञायते यत्काचित् नायिका स्वदूतीं वदति यत् त्वमित अर्थात् मत्तः स्नानं कर्तुं वापीं गतासि, तस्याधमस्य मम प्रियस्य समीपं न गतासि। इत्थं नात्र पद्ये व्यङ्ग्यस्पर्शलेशोऽपि।

किन्तु यद्यत्र सम्पूर्णस्य प्रकरणस्य ज्ञानं भवेत् तर्हि अयमेव श्लोक उत्तमोत्तमं किं वा उत्तमकाव्यपदवीं प्राप्नोति। तथा च श्लोकेऽस्मिन् वक्तृबोधव्यप्रकरणादीनां वैशिष्ट्यमस्त्येव, तस्मादेवायं श्लोको मम्मटाचार्येण उत्तमकाव्यत्वेन स्वीकृतः। किम्बहुना दुदर्मकाव्यालोचकेन पण्डितराज-जगन्नाथेनाप्यस्य पद्यस्य उत्तमोत्तमता स्वीकृता।

यदि सीतासदृशी काचित् पतिव्रता स्त्री इदं पद्यं ब्रूयात् 'वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्' तर्हि स्वप्नेऽपि पद्येऽस्मिन् व्यङ्ग्यसंस्पर्शस्य लेशोऽपि न भविष्यति, तस्मादेव मम्मटेनोक्तम् -

**'सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते'।**[2]

अत्र 'प्रायश' इति पदस्येदमेव रहस्यं यत् सति वक्तृबोध व्यप्रकरणादि- वैशिष्ट्ये सर्वेषां वाच्यलक्ष्यव्यङ्ग्यार्थानां व्यञ्जकत्वमिष्यते।

सम्प्रति कथं श्लोकेऽस्मिन् (निःशेषच्युत....) प्रकरणज्ञानेन चमत्कारो भवति तदत्र प्रस्तूयते। तथाहि काचित् विदग्धनायिका स्वकान्तानुनयार्थं दूतीं

1 श्लो. 2 काव्यप्रकाशे

2 का. 7 काव्यप्रकाशः

प्रेषयामास, परं धृष्टा सा दूती स्वमेव तं नायकमुपभुक्तवती, तथेदं विदग्धा सा नायिका ज्ञातवती ततश्च दु:खिता सती सा आपाततो वाच्यमुखेन, प्रकरणज्ञानद्वारा व्यङ्ग्यमुखेन दूतीमुवाच 'ममानुनयेनापि स (नायक) नागत' इत्थं मृषाभाषणशीले तथा मादृशस्य बन्धुजनस्य पीडाया अनभिज्ञे दूति त्वम् इत अस्मात् स्थानात् मम सामीप्यात् स्नानार्थं वापीं (लघुजलाशयं) नदीगमनेन विलम्बाकलनात् गतासि, कारणं स्तनतटं नि:शेषेण च्युतं चन्दनं यस्मात् तथाविधं विलम्बाकलनात् स्तनतट एव मुहुर्मुहुर्जलसंसर्गात्। तथैव अधरोऽपि नि:शेषेण मृष्टो रागो यस्मात् तादृशो, मुखशोधने (शुद्धिकरणे) मुहुर्मुहुरङ्गुलिसंघर्षणात् न तु उत्तरोष्ठ: तथा, नेत्रे च दूरं प्रान्तभागे कज्जलरहिते कारणं स्नानकाले नेत्रनिमीलनेन जलसम्पर्काभावात्, तथा तवेयं तनु: स्नानेन पुलकिता। अयमापाततो वाच्यार्थ:। प्रकरणज्ञानेन च व्यङ्ग्यार्थो यत् मिथ्याभाषणस्वभावे दूति त्वं वापीं स्नातुं न गतासि प्रत्युत तस्याधमस्यान्तिकं गतासि कारणं स्तनतटमेव नि:शेषच्युतचन्दनं संभोगे स्तनतटयोरेव मुहुरामर्शात् तथा अधर एव निर्मृष्टराग: कारणं कामशास्त्रे अधरस्यैव चुम्बनयोग्यता वर्णिता यत् 'कामीनामधरास्वाद: संभोगेनातिरिच्यते। कालिदासे- नाप्युक्तं 'पिबसि रतिसर्वस्वमधरम्'[1]। तथा कामशास्त्रे नेत्रयो: समीपे चुम्बननिषेधात् दूर एव विधानात् नेत्रे दूरमनञ्जने, तथा स्नानबहुकालात् नेतादृशी पुलकिता तनु: यादृशी सम्भोगेन, तस्मात् त्वं तस्याधमस्यैवान्तिकं गतासि।

तथा विदग्धनायिकाया: प्रगाढमन्युरत्र व्यज्यते, तेन च विप्रलम्भस्यातिरेको भवति।

तदित्थं यस्मिन् पद्ये प्रकरणज्ञानाभावे निरसता किलासीत् स एव श्लोक: प्रकरणादिवैशिष्ट्येन सहृदयाननुरञ्जयति। पण्डितराजेन रसगङ्गाधरे किञ्चिद्विशेष- प्रकारेण व्याख्यतमिदं पद्यं तद्यथा -

तथाहि 'अयि बान्धवजनस्याज्ञातपीडागमे' स्वार्थपरायणे! स्नानकालातिक्रमभयवशेन नदीमदीयप्रिययोरन्तिकमगत्वेव वापीं स्नातुम्,

---

1 चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं रहस्याख्यायीव स्वनसि मश्दु कर्णान्तिकचर: करौ व्याधुन्वत्या: पिबसि रति सर्वस्वमधरं वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती। अभिज्ञानशाकुन्तलम्

इतो मदन्तिकात् गताऽसि, न पुनस्तस्य परवेदनानभिज्ञतया दु:खदातृत्वेनाधमस्यान्तिकम्। यतो नि:शेषच्युतचन्दनं स्तनयोस्तटमेव नोर:स्थलम्, वापीगत-बहुलयुवजनत्रपापारवश्यादंसद्वयलग्नाग्रस्वस्तिकृतभुजलतायुगलेन तटस्यैवोन्नततया मुहुरामर्शात्। एवं त्वरया सम्यगक्षालनेनोत्तरोष्ठो न निर्मृष्टराग:, अधरस्तु तदपेक्षया गण्डूषजलरदनशोधनाङ्गुल्यादीनामधिकसम्मर्दमावहतीति तथा। किञ्च सम्यगक्षालनेन नेत्रे जलमात्रसंसर्गात् दूरमुपरिभाग एवानञ्जने। शीतवशात् तानवाच्च तव तनु: पुलकिता इति। एवं तस्या विदग्धाया गूढतात्पर्यैवोक्तिरुचिता, अन्यथा वैदग्ध्यभङ्गापत्ते:।

एवं साधारणेष्वेषु वाक्यार्थेषु मुख्यार्थे बाधाभावात् तात्पर्यार्थस्य झटित्यनाकलनात् कुतोऽत्र लक्षणावकाश:। अनन्तरं च वाक्यार्थप्रतिपत्तेर्वक्तृ-बोद्धव्यनायकादीनां वैशिष्ट्यस्य प्रतीतौ सत्यामधमपदेन स्वप्रवृत्तिप्रयोजको दु:खदातृत्वरूपो धर्म: साधारणात्मा वाच्यार्थदशायामपराधान्तरनिमित्तकदु:ख-दातृत्वरूपेण स्थितो व्यञ्जनाव्यापारेण दूतीसम्भोगनिमित्तकदु:खदातृत्वाकारेण पर्यवस्यतीत्यालङ्कारिकसिद्धान्तनिष्कर्ष:।[1]

असंलक्ष्यक्रमव्यङ्ग्यध्वनौ प्रकरणज्ञानेन साधारणोऽपि श्लोक: प्रबन्धायते, तद्यथा प्रथमोद्योते वाच्यार्थस्य व्यङ्ग्येन पार्थक्यं प्रदर्शयता ध्वनिकृता पद्यमिदमुपन्यस्तम् -

**कस्य वा ण होई रोसो दट्ठूण पियाएँ सण्वणं अहरम्।**
**सभमरपउमग्घाइणि वारिअवामे सहसु एह्लिम्॥**

(कस्य वा न भवति रोषो दृष्ट्वा प्रियाया: सव्रणमधरम्।
सभ्रमरपद्माघ्रायिणि वारितवामे सहस्वेदानीम्) इति छाया

तत्र काचित् स्वैरिणी केनापि नायकेन खण्डिताधरा जाता तथा तस्या: 'सव्रणमधरं दृष्ट्वा तत्पति: कुपितो मा भवेत्' इति सर्वं विचिन्त्य तस्या विदग्धा सखी तं रक्षयन्ती तथा समीपस्थं तत्पतिं चाभिनयेनापश्यन्ती सत्याह कस्य पत्यु: प्रियाया: सव्रणमधरं दृष्ट्वा रोषो न भवति अर्थात् स्वयं चुम्बनावसरेऽकृत्वापि कुतश्चित् खण्डिताधरं दृष्ट्वा सर्वस्य (पतिजनस्य) रोषो भवत्येव। अत: सभ्रमरं यत्पद्मं तत् आघ्रातुं शीलं यस्या: सा तादृशी

1 का. 2 वृत्तौ रसगङ्गाधर: प्रथमाननम्

त्वं तथा वारिते वारणे सभ्रमरपद्माद् वारणे वामा प्रतिकूलाचरणशीला इदानीं सहस्व वामाचरणस्य फलं भुङ्क्ष्व।

अत्र वाच्यार्थः सखीविषयकः तथा 'अस्याधरो भ्रमरेण सव्रणी कृतो न त्वपरेण पुरुषेण' इति व्यङ्ग्यार्थः तत्पतिविषयकः।

अस्यैव श्लोकस्य प्रकरणभेदेन लोचनकृता बहवोऽर्थाः कृताः। तद्यथा प्रियतमेन गाढमुपालभ्यमानायां तस्यां नायिकायां प्रातिवेशिकलोक-विषयोऽयं व्यङ्ग्यार्थो यत् 'भ्रमरकृतं क्षतमेतदिति नेयं दुश्चरित्रा। अथवा प्रियेण गाढमुपालभ्यमानायां तस्यां तथा तदुपालभनेन प्रसन्नायां सपत्न्यां 'प्रियाया' इति पदेन सौभाग्यातिशयं व्यङ्ग्यम्। अर्थात् सपत्नीविषयको व्यङ्ग्यार्थो यत् 'पत्युः प्रियतमेयमिति'। अथवा स्वयं नायिकाविषयोऽयं व्यङ्ग्यार्थो यत् पत्युरूपालम्भोऽपि प्रियतमां प्रत्येव भवति न तु सामान्यामप्रियां प्रतीति सपत्नीमध्ये तिरस्कृतास्मीति लाघवमात्मनि ग्रहीतुं न युक्तं प्रत्युतायं बहुमानः सहस्व शोभस्वेदानीमिति सखीविषयकं सौभाग्यप्रख्यानं व्यङ्ग्यम्। अथवा तस्या नायिकायाः प्रच्छन्नकामुकस्तत्र आसीत् तं प्रति व्यङ्ग्यं यत् 'अद्येयं तव प्रच्छन्नानुरागिणी हृदयवल्लभेत्थं मया रक्षिता, पुनः प्रकटरदन-दंशविधिर्न विधेय' इति। अथवा तटस्थविदग्धलोकविषयकं व्यङ्ग्यं यत् इत्थं मयेतदपह्नुतमिति स्ववैदग्ध्यख्यापनम्।

इत्थं प्रकरणज्ञानस्योपयोगिता सर्वत्र ध्वनेः प्रभेदेषु दृश्यते। तत्र वैशिष्ट्यमिदं यत् सर्वत्र रस असंलक्ष्यक्रमव्यङ्ग्य एव भवति परं यत्र झटिति प्रकरणस्य ज्ञानं नास्ति, तत्र संलक्ष्यक्रमव्यङ्ग्योऽपि रसो भवति, तदुक्तं पण्डितराजजगन्नाथेन रसगङ्गाधरे -

**तल्पगताऽपि च सुतनुः श्वासाङ्गं न या सेहे।**
**सम्प्रति सा हृदयगतं प्रियपाणिं मन्दमाक्षिपति।।**[1]

स्वयं पण्डितराजजगन्नाथो व्याख्यात्यत्र इदञ्च पद्यं मन्निर्मितप्रबन्ध गतत्वेन पूर्वसाकाङ्क्षमिति दिङ्मात्रेण व्याख्यायते। 'या नववधूः पल्यङ्कशयिता श्वासस्यासङ्गमात्रेणापि सङ्कुचदङ्गलतिकाऽभूत्, सा सम्प्रति प्रस्थानपूर्वरजन्यां प्रवत्स्यत्पतिका प्रियेण सशङ्केन समर्पितं हृदिपाणिं नववधूजातिस्वाभाव्यादाक्षिपति परन्तु मन्दम्।

---

1 का. 2 वृत्तौ रसगङ्गाधरे प्रथमानने

अत्र शनैः स्वस्थानप्रापणात्मना मन्दाक्षेपेण रत्याख्यः स्थायी संलक्ष्यक्रमतया व्यज्यते। उपपादयिष्यते च स्थाय्यादीनामपि संलक्ष्यक्रमव्यङ्ग्यत्वम्।

तत्रोत्तमोत्तमकाव्यस्योदाहरणे रतेरसंलक्ष्यक्रमव्यङ्ग्यतां प्रकाश्य[1] रतेः संलक्ष्यक्रमव्यङ्ग्यत्वरूपप्रयोजनान्तरेण 'तल्पगतापि च' इत्यादौ रत्यादिस्थायीभावानां प्रकरणवशात् संलक्ष्यक्रमव्यङ्ग्यता भवतीति सूचयति तथा पुनः प्रथमाननस्य समाप्तौ सप्रमाणं स्थायीभावानां संलक्ष्यक्रमव्यङ्ग्यतां दर्शयति, तदुक्तम्–

'सोऽयं निगदितः सर्वोऽपि रसादिलक्षणो व्यङ्ग्यप्रपञ्चः स्फुटप्रकरणे झटिति प्रतीतेषु विभावानुभावव्यभिचारिषु, सहृदयतमेन प्रमात्रा, सूक्ष्मेणैव समयेन प्रतीयत इति हेतुहेतुमतोः पौर्वापर्यक्रमस्यालक्षणादलक्ष्यक्रमो व्यपदिश्यते। यत्र तु विचारवेद्यं प्रकरणम्, उन्नेया वा विभावादयस्तत्र सामग्रीविलम्बाधीनं चमत्कृतेर्मान्थर्यमिति संलक्ष्यक्रमोऽप्येष भवति।

यथा 'तल्पगतापि च सुतनुः' इति प्रागुदाहृते पद्ये 'सम्प्रति' इत्येतदर्थाव- गतिर्विलम्बेन।

न खलु धर्मिग्राहकमानसिद्धं रत्यादिध्वनेरलक्ष्यक्रमव्यङ्ग्यत्वम्। अत एव लक्ष्यक्रमप्रसङ्गे–

**एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी।**
**लीलाकमलपत्राणि गणयामास पार्वती॥**

अत्र कुमारीस्वाभाव्यादप्यधोमुखत्वविशिष्टस्य लीलाकमलपत्रगणनस्योपपत्त्या मनाग्विलम्बेन नारदकृतविवाहादिप्रसङ्गविज्ञानोत्तरं 'व्रीडायाश्चमत्करणाल्लक्ष्यक्रमोऽयं ध्वनिः' इति प्राहुरानन्दवर्धनाचार्याः। 'रसभावादिरर्थो ध्वन्यमान एव, न वाच्यः तथापि न सर्वो लक्ष्यक्रमस्य विषयः।' इति चाभिनवगुप्तपादाचार्याः।[2]

इत्थं निर्भ्रान्तशब्देषु पण्डितराजजगन्नाथेन रसगङ्गाधरे स्थायीभावानां

---

1 शयिता सविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान्।
दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते।। का. 2 वृत्तौ रसगङ्गाधरः प्रथमाननम्

2 प्रथमाननसमाप्तौ

प्रकरणज्ञानाधीनत्वात् संलक्ष्यक्रमव्यङ्ग्यत्वमपि स्वीकृतम्। तत्र पण्डितराजेन यदुक्तं तस्योपजीव्यं ध्वनिकारस्येदं वचः -

**अर्थशक्त्युद्भवस्त्वन्यो यत्रार्थः स प्रकाशते।**
**यस्तात्पर्येण वस्त्वन्यद् व्यनक्त्युक्तिं विना स्वतः॥**[1]

अर्थात् संलक्ष्यक्रमव्यङ्ग्यस्यापरो भेदोऽस्ति अर्थशक्त्युद्भवध्वनिर्यत्र ध्वननव्यापारेण शब्दव्यापारं विना स्वतः तात्पर्यविषयीभूतार्थान्तरः प्रकाशते। यथा-

**एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी।**
**लीलाकमलपत्राणि गणयामास पार्वती॥**[2]

अत्र पार्वत्या लीलाकमलपत्रगणनारूपो व्यापारः स्वयं गौणी भूय शब्द- व्यापारं विना लज्जारूपं व्यभिचारिभावं प्रकाशयति।

ध्वनिकारोऽत्र प्रसङ्गे सर्वेषामाचार्याणामपेक्षया सर्वादौ स्थायीभावानां प्रकरणज्ञानेन संलक्ष्यक्रमव्यङ्ग्यत्वं सिद्धान्तयन् ब्रवीति -

'न चायमलक्ष्यक्रमव्यङ्ग्यस्यैव ध्वनेर्विषयः। यतो यत्र साक्षाच्छब्द-निवेदितेभ्यो विभावानुभावव्यभिचारिभ्यो रसादीनां प्रतीतिः स तस्य केवलस्य मार्गः। यथा कुमारसम्भवे मधुप्रसङ्गे वसन्तपुष्पाभरणं वहन्त्या देव्या आगमादिवर्णनं मनोभवशरसन्धानपर्यन्तं शम्भोश्च परिवृत्तधैर्यस्य चेष्टाविशेषवर्णनादि साक्षाच्छब्द- निवेदितम्।

इह तु सामर्थ्याक्षिप्तव्यभिचारिमुखेन रसप्रतीतिः। तस्मादयमन्यो ध्वनेः प्रकारः।'[3]

ध्वनिकारो वक्ति यत् 'एवंवादिनि ..' इति पद्यं केवलमसंलक्ष्यक्रम-व्यङ्ग्यध्वनेरेव नोदाहरणम्। यत्र साक्षात् शब्दनिवेदितेभ्यो विभावानुभावव्यभि-चारिभ्य रसादीनां प्रतीतिः स एव असंलक्ष्यक्रमव्यङ्ग्यध्वनेर्विषयः। यथा कुमारसम्भवे वसन्तवर्णनप्रसङ्गे वसन्तपुष्पनिर्मिताभरणं वहन्त्याः पार्वत्या आगमनप्रणामादिरूपालम्बनोद्दीपनविभाववर्णनम् यथा-

---

1 का. 22 ध्वन्यालोक द्वितीयोद्योतः

2 तत्रैव वृत्तौ

3 का. 22 वृत्तौ ध्वन्यालोक द्वितीयोद्योतः

**निर्वाणभूयिष्ठमथास्य वीर्यं सन्धुक्षयन्तीव वपुर्गुणेन।**
**अनुप्रयाता वनदेवताभिरदृश्यत स्थावरराजकन्या।।**[1]
**अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिकर्णिकारम्।**
**मुक्ताकलापीकृतसिन्धुवारं वसन्तपुष्पाभरणं वहन्ती।।**[2]
**उमापि नीलालकमध्यशोभि विस्रंसयन्ती नवकर्णिकारम्।**
**चकार कर्णच्युतपल्लवेन मूर्ध्ना प्रणामं वृषभध्वजाय।।**[3]

शम्भोश्च धैर्यच्युतरूपस्यानुभाववर्णनमपि साक्षाच्छब्दनिवेदितं तद्यथा–

**प्रतिग्रहीतुं प्रणयिप्रियत्वात्त्रिलोचनस्तामुपचक्रमे च।**
**सम्मोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम्।।**[4]

औत्सुक्यावेगप्रभृतीनां व्यभिचारिणामपि वाच्यप्रतीत्यव्यवहित–प्रतीतिविषयरूपं साक्षाच्छब्दनिवेदनं तद्यथा –

**हरस्तु किञ्चित्परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।**
**उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि।।**[5]

इत्थं सर्वं विभावानुभावव्यभिचारिवर्णनं साक्षाच्छब्दनिवेदितं तस्मादयं विषय असंलक्ष्यक्रमव्यङ्ग्यध्वनेः।

'एवंवादिनि ...' इत्यत्र तु पद्मदलगणनं तथैव अधोमुखत्वञ्च कुमारीणां लज्जां विना अन्यथापि स्वभावादपि सम्भवति, ततश्च शीघ्रतया लज्जायाः प्रतीतिर्न भवति, प्रत्युत प्रकरणालोचनया प्राग्वृत्ततपश्चार्यादि–वृत्तान्तस्मरणेन लज्जायाः प्रतीतिः। ततश्चात्र वाच्यार्थप्रतीतिलज्जाव्यभिचारि–भावप्रतीत्योर्मध्ये प्रकरणज्ञानेन विलम्बात् क्रमः संलक्ष्यते, तेनायं श्लोकः (एवंवादिनि.....) संलक्ष्यक्रमव्यङ्ग्यध्वनिविषयकः।

यद्यपि लज्जाव्यभिचारिभावस्य प्रतीत्यव्यवहितोत्तरकालेन शृङ्गाररसाभि–व्यक्तौ असंलक्ष्यक्रमव्यङ्ग्यध्वनिरेव तथापि वाच्यार्थव्यभिचारिभावप्रतीत्योर्मध्ये विलम्बेन संलक्ष्यक्रमव्यङ्ग्यत्वम्।

1 3/52 कुमारसंभवम्
2 3/53 कुमारसंभवम्
3 3/62 कुमारसंभवम्
4 3/66 कुमारसंभवम्
5 3/67 कुमारसंभवम्

संलक्ष्यक्रमव्यङ्ग्यध्वनौ प्रारम्भे झटिति तात्पर्यानाकलनात् न मुख्यार्थे बाधा तथापि प्रकरणज्ञानेन प्रारम्भ आपातत उपपद्यमानस्यार्थस्य बाधा भवति। तदुक्तम्–

**क्वचिद् बाध्यतया ख्यातिः क्वचित् ख्यातस्य बाधनम्।**
**पूर्वत्र लक्षणैव स्यादुत्तरत्राभिधैव तु॥**[1]

यथा 'एवंवादिनि ..' इत्यत्र यथा वा 'निःशेषच्युतः' इत्यत्रापि प्रारम्भे तात्पर्यानाकलनात् साधारणानां (स्नान–सम्भोगयोरुभयोः पक्षे वाक्यार्थानां समन्वये बाधाभावात् इत्यर्थः) चन्दनच्यवनादीनां स्नानसम्भोगाभ्यामुपपाद्यमानत्वात् न बाधो मुख्यार्थस्य तथापि पुनः प्रकरणसमालोचनया वक्तुः तात्पर्यविषयीभूतार्थस्य बाधनात् वक्तृबोधव्यादीनां वैशिष्ट्यात् सम्भोगार्थे साधारणानां तेषां चन्दनच्यवनादीनां पर्यवसानम्। तदुक्तं दीक्षितमतखण्डनावसरे रसगङ्गाधरे पण्डितराजेन –

''निश्शेषेत्यादौ गमकतया यानि चन्दनच्यवनादीन्युपात्तानि, तानि कारणान्तरतोऽपि भवन्ति, यतश्चात्रैव स्नानकार्यत्वेनोपात्तानि नोपभोग एव प्रतिबद्धानीत्यनैकान्तिकानि।'' इति काव्यप्रकाशकृतोक्तम्।

तथा –

एवञ्च व्यञ्जकानां साधारण्यं प्रतिपादयतां प्रमाणिकानां ग्रन्थैः सहासाधारण्यं प्रतिपादयतस्तव ग्रन्थस्य विरोधः स्फुटः।

तथा–

तस्माद् वाच्यार्थसाधारण्यमेवोचितमतिविदग्धनायिकानिरूपितानां विशेषणवाक्यार्थानाम्।

तथा–

एवं साधारणेष्वेषु वाक्यार्थेषु मुख्यार्थे बाधाभावात् तात्पर्यार्थस्य झटित्यनाकलनात् कुतोऽत्र लक्षणावकाशः। अनन्तरञ्च वाक्यार्थप्रतिपत्तेर्वक्तृबोधव्यनायकादीनां वैशिष्ट्यस्य प्रतीतौ सत्यामधमपदेन स्वप्रवृत्तिप्रयोजको दुःखदातृत्वरूपो धर्मः साधारणात्मा वाच्यार्थदशायामपराधान्तरनिमत्तकदुःख–

---

1 साहित्यदर्पणः

दातृत्वरूपेण स्थितो व्यञ्जनाव्यापारेण दूतीसम्भोगनिमित्तकदु:खदातृत्वाकारेण पर्यवस्यतीत्यालङ्कारिकसिद्धान्तनिष्कर्ष:।[1]

अनेन ज्ञायते प्रकरणवशाद् यस्यार्थस्य प्रारम्भे न बाध: सोऽपि तात्पर्यानुपपत्तौ प्रकृतेऽसम्भवन् बाध्यते। पुन: प्रकरणानुलोचनया क्रमस्य (वाच्यव्यङ्ग्यप्रतीत्यो:) संलक्ष्यत्वाद् रसस्य संलक्ष्यक्रमव्यङ्ग्यतापि भवति। तदुक्तं लोचने –

'यद्यपि रसभावादिरर्थो ध्वन्यमान एव भवति न वाच्य: कदाचिदपि तथापि न सर्वोऽलक्ष्यक्रमस्य विषय:। यत्र हि विभावानुभावेभ्य: स्थायिगतेभ्यो व्यभिचारिगतेभ्यश्च पूर्णेभ्यो झटित्येव रसव्यक्तिस्तत्रास्त्वलक्ष्यक्रम:। यथा–

**निर्वाणभूयिष्ठमथास्य वीर्यं सन्धुक्षयन्तीव वपुर्गुणेन।**
**अनुप्रयाता वनदेवताभ्यामदृश्यत स्थावरराजकन्या।।**

इत्यादौ सम्पूर्णालम्बनोद्दीपनविभावतायोग्यस्वभाववर्णनम्।

**प्रतिग्रहीतुं प्रणयिप्रियत्वात्त्रिलोचनस्तामुपचक्रमे च।**
**सम्मोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम्।।**

इत्यनेन विभावतोपयोग: उक्त:।

**हरस्तु किञ्चित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशि:।**
**उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि।।**

अत्र हि भगवत्या: प्रथममेव तत्प्रवणत्वात्तस्य चेदानीं तदुन्मुखीभूतत्वात् प्रणयिप्रियतया च पक्षपातस्य सूचितस्य गाढीभावाद्रत्यात्मन: स्थायिभावस्यौ–त्सुक्यावेगचापल्यहर्षादेश्च व्यभिचारिण: साधारणीभूतोऽनुभाववर्ग: प्रकाशित इति विभावानुभावचर्वणैव व्यभिचारिचर्वणायां पर्यवस्यति। व्यभिचारिणां पारतन्त्र्यादेव स्रक्सूत्रकल्पस्थायिचर्वणाविश्रान्तेरलक्ष्यक्रमत्वम्। इह तु पद्मदलगणनमधोमुखत्वं चान्यथापि कुमारीणां सम्भाव्यत इति झटिति न लज्जायां विश्रमयति हृदयं, अपितु प्राग्वृत्ततपश्चर्यादिवृत्तान्तानुस्मरणेन तत्र प्रतिपत्तिं करोतीति क्रमव्यङ्ग्यतैव। रसस्त्वत्रापि दूरत एव व्यभिचारिस्वरूपे पर्यालोच्यमाने भातीति तदपेक्षयालक्ष्यक्रमतैव। लज्जापेक्षया तु तत्र लक्ष्यक्रमत्वम्।[2]

---

1 का. 2 वृत्तौ रसगङ्गाधर: प्रथममाननम्

2 का. 22 व्याख्याने लोचने ध्वन्यालोक: द्वितीयोद्योत:

तदित्थं ध्वनेः सर्वेषु भेदप्रभेदादिषु प्रकरणज्ञानस्योपयोगिता दृश्यते। यद्यपि भर्तृहरिणा प्रकृतार्थस्य निश्चायकत्वेन 'प्रकरणस्य' कीर्तनं कृतं तथापि ध्वनिवादिभिः सर्वत्र प्रकरणाधारेण ध्वनेर्भेदाः कृताः, तत्राभिधामूल-ध्वनौ तु विशेषरूपेण प्रकरणस्य प्रभावो वर्तते, तदुक्तं विश्वनाथेन –

**अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।**
**एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया॥**[1]

तत्रोदाहरणे च मुक्तकण्ठेन प्रकरणस्य वैशिष्ट्यं प्रदर्शयन् वदति-

**दुर्गालङ्घितविग्रहो मनसिजं सम्मीलयंस्तेजसा**
**प्रौद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः।**
**नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन्**
**गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः॥**

अत्र प्रकरणेनाभिधया उमावल्लभशब्दस्योमानाम्नी महादेवीवल्लभ-भानुदेवनृपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपोऽर्थो बोध्यते।[2]

इत्थं ध्वनेः प्रभेदादिषु प्रकरणज्ञानस्यापेक्षा उपयोगिता च सर्वत्र दृश्यते। तथा प्रकरणज्ञानस्योपजीव्यं व्याकरणशास्त्रमेव। ततश्च प्रकरणज्ञानद्वारापि व्याकरणशास्त्रस्यावदानं ध्वनिस्थापने वर्तते।

सम्प्रति 'रसध्वनौ' व्याकरणशास्त्रस्यावदानं प्रदर्श्यते। तत्र वस्त्वलङ्काररसभेदेन ध्वनिस्त्रिधा, तदुक्तं ध्वनिकृता 'स ह्यर्थो वाच्यसामर्थ्याक्षिप्तं वस्तुमात्रम्, अलङ्काररसादयश्चेत्यनेकप्रभेदप्रभिन्नो दर्शयिष्यते।'[3]

तत्रापि रसध्वनिरेव 'काव्यस्यात्मा' तदुक्तम् –

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥**[4]

लोचनकारोऽपि तथैव व्याख्याति यत् –

---

1 का. 14 सा. द. द्वितीयपरिच्छेदः
2 का. 14 वृत्तौ साहित्यदर्पणः द्वितीयपरिच्छेदः
3 का. 4 वृत्तौ ध्वन्यालोकः प्रथमोद्योतः
4 का. 5 ध्वन्यालोकः प्रथमोद्योतः

'एवं प्रतीयमानं पुनरन्यदेव' इतीयता ध्वनिस्वरूपं व्याख्यातम्। अधुना काव्यात्मत्वमितिहासव्याजेन च दर्शयति काव्यस्यात्मेति। स एवेति प्रतीयमानमात्रेऽपि प्रक्रान्ते तृतीय एव रसध्वनिरिति मन्तव्यम्। इतिहासबलात् प्रक्रान्तवृत्तिग्रन्थार्थबलाच्च। तेन रस एव वस्तुत आत्मा, वस्त्वलङ्कारध्वनी तु सर्वथा रसं प्रति पर्यवस्येते इति वाच्यादुत्कृष्टौ तावित्यभिप्रायेण 'ध्वनिः काव्यस्यात्मेति सामान्येनोक्तम्।'[1]

तथा 'रसस्यापरो नाम असंलक्ष्यक्रमव्यङ्ग्यध्वनिः स च सुप्तिङ्वचन-सम्बन्धकारकशक्तिकृत्तद्धितसमासैश्च विशेषरूपेण प्रकाश्यते। तदुक्तम्-

**सुप्तिङ्वचनसम्बन्धैस्तथा कारकशक्तिभिः।**
**कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित्॥**[2]

व्याकरणशास्त्रे तावत् सुप्तिङ्वचनसम्बन्धादीनां मूलतो निरूपणं तथा ध्वनिनयेऽपि रसाभिव्यक्तौ तेषां सुबादीनां महद्योगदानं, तैरेव भूयसा रसानां व्यञ्जनात् तदुक्तं तत्रैव -

'असंलक्ष्यक्रमो ध्वनेरात्मा रसादिः सुब्विशेषैः वचनविशेषैः सम्बन्ध विशेषैः कारकशक्तिभिः कृद्विशेषैः तद्धितविशेषैः समासैश्चेति। च शब्दान्निपातोपसर्ग- कालादिभिः प्रयुक्तैरभिव्यज्यमानो दृश्यते।'[3]

एकस्मिन् श्लोके सर्वेषां तेषां व्यञ्जकता प्रदर्शयति ध्वनिकारः। तद्यथा -

**न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः**
**सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।**
**धिग् धिक्छक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा**
**स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः॥**[4]

हनुमन्नाटके चतुर्दशेऽङ्के रामरावणयुद्धप्रसङ्गे स्वसैनिकान् आत्मानञ्चाधिक्षिपन् रावणस्योक्तिरियम्। अयमेव न्यक्कारो यद् मे शत्रवः, अत्र 'मे' इत्यत्र सुप्सम्बन्धयोर्व्यञ्जकत्वं तथाहि षष्ठीविभक्तौ मे ('मम')

1 तत्रैव व्याख्याने लोचने
2 का. 16 ध्वन्यालोकः तृतीयोद्योतः
3 तत्रैव वृत्तौ
4 तत्रैव वृत्तौ

इत्यत्र एकवचनं तथाभिव्यज्यते यदहं जगति महानेकवीरस्तथा जगद्विजये निरपेक्षसहाय एकैवाहं समर्थः। तथा सम्बन्धस्य व्यञ्जकता यत् 'मम शत्रवः' कथं सम्भवन्ति, अहन्तु जगत्त्रयं स्ववशे करोमि, तादृशस्य मे रावणस्य शत्रवो भवन्ति चेदद्भुतम्। 'अरय' इत्यत्र बहुवचनस्य व्यञ्जकता यद् 'न तु शत्रुः प्रत्युत शत्रव' प्रथमन्तु शत्रुः स्यादित्येवानुचितं परं शत्रवो जाता इति महदद्भुतं दुःखास्पदञ्च।' तत्राप्यसौ तापसः' इत्यत्र तद्धितनिपातयोः तद्यथा 'तापस' इत्यत्र तद्धितस्य मत्वर्थीय अण्प्रत्ययस्तेन व्यज्यते यदि मम तुल्यः कश्चनाद्वितीयवीरः शत्रुः स्यात्तदा तु किञ्चिद्वरं, परमयं तु तपस्वी तत्र का पौरुषसम्भावना। ततश्च पौरुषहीनत्वक्षीण-देहत्वादीनां व्यङ्ग्यत्वम्। 'तत्रापि' इति निपातसमुदायेन शत्रूणामसम्भवनीयता। 'असौ' इत्यनेन व्यज्यते यत् तत्रापि असौ 'मानुषः' तुच्छप्राणिर्यः किल राज्याद् बहिष्कृतो, भोजनादावपि समर्थो नास्ति सः तुच्छप्राणिः किल मे शत्रुः। सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः' इत्यत्र तिङ्कारकशक्तीनां व्यञ्जकत्वं, तद्यथा सोऽपि इत्यत्र कर्तृपदेन यत् सः तापस अत्रैव मदधिष्ठिते लङ्काप्रदेशे न तु दूरे दण्डकारण्यादौ राक्षसानां कुलं न राक्षसं नो राक्षसौ नैव राक्षसान् प्रत्युत राक्षसानां वंशं निहन्ति तथा रावण जीवति यदि तदा हननक्रियैवानुचिता, तस्यां च हननक्रियायां कर्ता असौ तापसः तर्हि महद्दुःखमनुचितञ्च। तथैव 'राक्षसकुलं निहन्ति' इत्यस्य कर्मपदेनापि अनौचित्यस्य व्यङ्ग्यता। 'निहन्ति' इत्यत्र वर्तमानकालिकेन तिङ्प्रत्ययेन व्यज्यते यत् 'रावयतीति रावणः' (आक्रान्दयति लोकानिति रावणः) जीवति प्राणान् धारयतीति तु महदनौचित्यं, यः किल जनान् पीडयति तादृशे मयि जगत्त्रासकरणे प्राणान् धारयति सति मत्प्रजावर्गान् हन्ति तथा निःशेषेण समूलं सवंशं हन्तीति तु महदनौचित्यम्। 'रावणपदे चार्थान्तरसङ्क्रमित-ध्वनिः' तथाहि तात्पर्यानुपपत्तौ रावणपदं मुख्यार्थेऽसम्भवदनुपमपौरुषशालिन्यर्थे सङ्क्रान्तः। 'धिग्धिच्छक्रजितम्' इत्यादौ श्लोकार्धे कृत्तद्धितसमासोपसर्गाणां व्यञ्जकत्वं, तद्यथा शक्रजितं मेघनादं धिक् धिक् येन पुरा इन्द्रोऽपि रणमुखे पराजितः। 'धिक् धिक्' इति निपातवीप्सया परमगर्हणीयता व्यज्यते। तथा 'शक्रजितम्' इत्यत्र शक्रोपपदे जिधातोर्निष्पन्नेन शक्रजितपदेन उपपदसमासद्वारा व्यज्यते यत् मेघनादेन शक्रोपरि यो विजयः कृतः सः

तावत् कल्पितकथाप्रायं जातं, ततश्च 'मेघनादस्य शक्तिः कुण्ठिता जाता' इति समासस्य व्यञ्जकता। तथा 'शक्रं जितं येन' स शक्रजितः, क्विप्प्रत्ययेनात्र मेघनादस्य निन्दातिशयोऽभि- व्यज्यते। 'प्रबोधितवता' इत्यत्र 'प्र' उपसर्गपूर्वको बुधधातुः तस्मात् णिच्प्रत्यये सति क्तवतु प्रत्ययः। तत्र 'प्र' इत्यनेन प्रकर्षो व्यज्यते यत् कुम्भकर्णः खलु प्रकर्षेण वाद्यभोजनादिभिर्महत्प्रयासेन जागरित। 'णिच्' इत्ययस्य प्रेरणार्थः, 'क्तवतु' इत्ययं भूतकालप्रत्ययः ताभ्यां व्यज्यते यत् कुम्भकर्णेन किल महती सर्वेषामस्माकम् आकाङ्क्षा आसीत्, महत्प्रयासेन सोऽस्मभिर्जागरितस्तथापि जागरितेन तेन न किमपि कार्यं साधितम्। इत्थं दुःखातिशयो रावणस्याभिव्यज्यते। 'स्वर्ग एव ग्रामटिका' इत्यत्र कर्मधारयसमासेन तथा 'ग्रामटिका' इत्यत्र तद्धितस्य 'टिकच्' प्रत्ययेन च तुच्छार्थो व्यज्यते, तद्यथा मया तुच्छग्रामभूतः स्वर्ग अनायासेन विंशतिभुजै- र्बहुधा विशेषेण लुण्ठितः परमेतत्सर्वं व्यर्थप्रायम्। 'विलुण्ठन' इत्यत्र 'वि' उपसर्गेण निर्दयतापुरस्सरं लुण्ठनस्य व्यञ्जकत्वम्। 'वृथा' निपातेनानेन पौरुषनिन्दातिशयो व्यज्यते। 'भुजैः' बहुवचनेनानेन भुजानां भाररूपत्वं व्यज्यते। तदुक्तं ध्वनिकृता तत्रैव –

'अत्र हि श्लोके भूयसा सर्वेषामप्येषां स्फुटमेव व्यञ्जकत्वं दृश्यते। तत्र 'मे यदरयः' इत्यनेन सुप्सम्बन्धवचनानामभिव्यञ्जकत्वम्। 'तत्राप्यसौ तापसः' इत्यत्र तद्धितनिपातयोः। 'सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः' इत्यत्र तिङ्कारकशक्तीनाम्। 'धिग् धिग् शक्रजितम्' इत्यादौ श्लोकार्धे कृत्तद्धितसमासोपसर्गाणाम्।'[1]

लोचनकारेणात्र विशेषतो प्रतिपादितं यत् –

'ममारय' इति मम शत्रुसद्भावो नोचित इति सम्बन्धानौचित्यं क्रोधविभावं व्यनक्ति अरय इति बहुवचनम्। तपो विद्यते यस्येति पौरुषकथाहीनत्वं तद्धितेन मत्वर्थीयेनाभिव्यक्तम्। तत्रापि शब्देन निपातसमुदायेनात्यन्तासम्भावनीयत्वम्। मत्कर्तृका यदि जीवनक्रिया तदा हननक्रिया तावदनुचिता। तस्यां च कर्ता अपिशब्देन मनुष्यमात्रकम्। अत्रैवेति – मदधिष्ठितो देशोऽधिकरणम्। निःशेषेण हन्यमानतया राक्षसबलं च

1 का. 16 वृत्तौ ध्वन्यालोकः तृतीयोद्योते

कर्मेति तदिदमसम्भाव्यमानमुपनतमिति पुरुषकारासम्पत्तिर्ध्वन्यते तिङ्कारकशक्तिप्रतिपादकैश्च शब्दैः। रावण इति त्वर्थान्तरसङ्क्रमितवाच्यत्वं पूर्वमेव व्याख्यातम्। धिग्धिगिति निपातस्य शक्रं जितवानित्या- ख्यायिकेयमिति उपपदसमासेन सहकृतः स्वर्गेत्यादिसमासस्य स्वपौरुषानुस्मरणं प्रति व्यञ्जकत्वम्। ग्रामटिकेति स्वार्थिकतद्धितप्रयोगस्य स्त्रीप्रत्ययसहितस्याबहुमानास्पदत्वं प्रति, विलुण्ठनशब्दे विशब्दस्य निर्दयावस्कन्दनं प्रतिव्यञ्जकत्वम्। वृथाशब्दस्य निपातस्य स्वात्मपौरुषनिन्दां प्रति व्यञ्जकता। भुजैरिति बहुवचनेन प्रत्युत भारमात्रमेतदिति व्यज्यते।'[1]

इत्थं श्लोकेऽस्मिन् सुप्तिङ्वचनसम्बन्धकारकशक्तिकृत्तद्धितसमासैरसंलक्ष्यक्रमव्यङ्ग्यध्वनिर्नितरामभिव्यज्यते, तदुक्तं तत्रैव लोचनकृता -

'तेन तिलशस्तिलशोऽपि विभज्यमानेऽत्र श्लोके सर्व एवांशो व्यञ्जकत्वेन भातीति किमन्यत्'।[2]

तथा प्रतिभाविशेषभाजां महात्मनां बाहुल्येनैवंविधाबन्धप्रकारा दृश्यन्ते यत्र सुबादीनां बाहुल्येन व्यञ्जकता, यथा महर्षेर्व्यासस्य -

**अतिक्रान्तसुखाः कालाः प्रत्युपस्थितदारूणाः।**
**श्वः श्वः पापीयदिवसा पृथिवी गतयौवना॥**[3]

श्लोकेऽस्मिन् कलिकालं निन्दयन् महर्षिव्यासो वक्ति यत् पृथिवी गतयौवना स्त्रीवदस्ति। अर्थात् समाप्तयौवना स्त्रीवदसम्भाव्यमानसंभोगा वर्तते, अर्थात् सम्प्रति कलिकाले नोपभोक्तुं योग्या पृथिवी कारणं सुखस्य कालो व्यतीतः (सतयुगादिः) दारुणो भीषणः कालः समुपस्थितः तथा श्वः श्वः दिनाह्निं पापीयानां भृशंपापपरायणानां दिवसाः यस्यां सा तादृशी पृथिवी गतं यौवनम् उपभोगक्षमत्वम् यस्याः तादृशी वृद्धस्त्रीवदसम्भाव्यमानसंभोगास्ति।

अत्र 'अतिक्रान्तः' 'प्रत्युपस्थितः' 'गतम्' इत्यत्र भूतकालिकेन क्तप्रत्ययेन[4] व्यज्यते यद् 'सम्प्रति काल एतादृशो यत्र सुखं सर्वथा व्यपगतं' (अतिक्रान्तः)। येषां भीषणता किल प्रसिद्धा ते दिवसाः, किम्बहुना

---

1 का. 16 वृत्तौ व्याख्याने लोचने ध्वन्यालोकः तृतीयोद्योते

2 तत्रैव व्याख्याने लोचने

3 का. 16 वृत्तौ ध्वनिकारः तृतीयोद्योते

4 क्तक्तवतूनिष्ठा 1/1/26 पा. सू.

कालांशाः (वर्ष-मास-दिन-घटी-पल-विपलादयः सर्वेऽपि समयभागाः) समागताः (प्रत्युपस्थितः)। 'गतम्' इत्यनेन च 'पृथिव्या यौवनं व्यपगतं न च तस्य प्रत्यागमनस्य सम्भावना ततः सर्वथा परित्यक्तुं योग्या पृथिवीति व्यज्यते।' 'पापीय' इत्यत्र 'छप्रत्ययः' अर्थात् पापानां (पापीनां) सम्बन्धिनो दिवसाः यस्यां सा पापीयदिवसा पृथिवी। 'छ'[1] इति तद्धितप्रत्ययेन व्यज्यते यत् पापीनामधिकारः सम्प्रति वर्तते सज्जनानां च दुर्गतिः सम्प्रत्यस्ति। अर्थात् स्वभावतो दुःखं पूर्वत आसीत् (अतिक्रान्तत्वात् सुखकालस्य) सम्प्रति शासकाश्च पापिनः ततश्च सर्वथा दुःखम्। अथवा 'पापीय' इत्यत्र ईयसुन्[2] प्रत्ययः (तद्धितस्य) तेन व्यज्यते यत् पूर्वापेक्षया दुःखतराणां दिवसानां योगः पृथिव्यां सम्प्रति वर्तते। 'कालाः' इत्यत्र बहुवचनेनानेन व्यज्यते यत् सर्वेऽपि कालभागाः (वर्ष-मास-दिन-घटी- पल-विपलादयः सर्वेऽपि कालांशाः) दारूणाः।

इत्थं 'क्तप्रत्ययेन' 'छ' अथवा 'ईयसुन्' प्रत्ययेन, बहुवचनेन च असंलक्ष्यक्रमव्यङ्ग्यस्य (निर्वेदात्मकशान्तरसस्य) नितरामभिव्यक्तिः। तदुक्तं लोचनकृता-

'अतिक्रान्तं न तु कदाचन वर्तमानतामवलम्बमानं सुखं येषु ते काला इति, सर्व एव न तु सुखं प्रति वर्तमानः सः कोऽपि काललेश इत्यर्थः। प्रतीपान्युपस्थितानि वृत्तानि प्रत्यावर्तमानानि तथा दूरभावीन्यपि प्रत्युपस्थितानि निकटतया वर्तमानानि भवन्ति दारूणानि दुःखानि येषु ते। दुःखं प्रकारमेव प्रतिवर्तमानाः सर्वेऽपि कालांशा इत्यनेन तावन्निर्वेदमभि-व्यञ्जयतः शान्तरसव्यञ्जकत्वम्। देशस्याप्याह पृथिवी श्वः श्वः प्रातः प्रातर्दिनाद्दिनं पापीयदिवसाः पापानां सम्बन्धिनः पापिष्ठजनस्वामिका दिवसा यस्यां सा तथोक्ता। स्वभावत एव तावत् कालो दुःखमयः तत्रापि पापिष्ठजनस्वामिकपृथिवीलक्षणदेशदौरात्म्याद्विशेषतो दुःखमय इत्यर्थः। तथा हि श्वः श्व इति दिनाद्दिनं गतयौवना वृद्धस्त्रीवदसम्भाव्यमानसम्भोगा गतयौवनतया हि यो यो दिवस आगच्छति स स पूर्वापेक्षया पापीयान् निकृष्टत्वात्। यदि वेयसुनन्तोऽयं शब्दो मुनिनैवं प्रयुक्तो णिजन्तो वा।'[3]

1 वृद्धाच्छः 4/2/114 पा. सू.

2 द्विवचनविभज्योपपदे तरबीयसुनौ 5/3/57 पा. सू.

3 का. 16 वृत्तौ व्याख्याने लोचने तृतीयोद्योते

एतेषूदाहरणेषु साक्षात् व्याकरणशास्त्रस्यावदानं दृश्यते रसध्वनौ, ध्वनिकारस्तु वक्ति समस्तानां व्यस्तानाञ्च सुप्तिङ्वचनसम्बन्धकारकशक्ति-कृत्तद्धितसमासोपसर्गनिपातप्रकृतिप्रत्ययादीनां व्यञ्जकत्वं महाकवीनां प्रबन्धेषु दृश्यते तदुक्तम् –

'एषाञ्च सुबादीनामेकैकशः समुदितानां च व्यञ्जकत्वं महाकवीनां प्रबन्धेषु प्रायेण दृश्यते।'[1]

'न्यक्कारो ह्ययमेव –' इत्यत्र तथा 'अतिक्रान्तसुखाः काला' इति पदद्वये समस्तानां तेषां व्यञ्जकत्वं प्रदर्श्य पृथक्तया च तेषां दिङ्मात्रेण निर्देशं ध्वनिकारः करोति, तद्यथा –

सुबन्तस्य व्यञ्जकत्वं यथा –

**तालैः शिञ्जद्वलयसुभगैः कान्तया नर्तितो मे**
**यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद् वः॥**[2]

महाकविकालिदासस्य मेघदूते सुबन्तस्य व्यञ्जकतां प्रदर्शयन् श्लोकोऽयं वर्तते। स्वगृहं वर्णयन् यक्षो मेघं ब्रूते 'दिवसविगमे (दिवससमाप्तौ) सायंकाले मम कान्तया शिञ्जद्भ्यां वलयाभ्यां सुभगैः तालैर्नर्तितो वः सुहृद् नीलकण्ठो मयूरेत्यर्थः (मेघगर्जनेन नृत्यकरणात्) यां यष्टिमास्ते (तन्मे गृहम्)।

अत्र 'तालै' इति सुबन्तपदस्य तृतीयाबहुवचनेन व्यज्यते यन्मे कान्ता बहुविधं तालप्रकारं जानाति तथा नृत्यसङ्गीतादौ निपुणा सा इत्थं कान्तागुणस्मरणेन अर्थात् आलम्बनस्य[3] गुणस्मरणेन विप्रलम्भशृङ्गारस्यो-द्दीपनमतिशयेन भवति। इत्थं सुबन्तेन वस्तुध्वनिद्वारा विप्रलम्भो नितरामभिव्यज्यते, तदुक्तं लोचने-

'तालैरिति' बहुवचनमनेकविधं वैदग्ध्यं ध्वनत् विप्रलम्भो-द्दीपकतामेति।'[4]

1 का. 16 वृत्तौ ध्वनिकारः तृतीयोद्योतः

2 तत्रैव वृत्तौ

3 उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये।
आलम्बनस्य चेष्टाद्या देशकालादयस्तथा।। सा. द. का. 131 तृतीयपरिच्छेदः

4 का. 16 वृत्तौ व्याख्याने लोचने तृतीयोद्योतः

तिङन्तस्य व्यञ्जकत्वं यथा –

**मा पन्थानं रुधः अपेहि बालक अहो असि अह्रीकः।**
**वयं परतन्त्रा यतः शून्यगृहं रक्षितव्यं नः॥**[1]

केनापि नायकेन मार्गे रूणद्धा नायिका सङ्केतस्थलं सूचयन्ती सत्याह 'हे बालक, अनुभवशून्य अथवा अप्रौढमते अपेहि अपसर मे मार्गं मा रूध अवरूद्धं कार्षीः, अहो आश्चर्यं त्वं निर्लज्ज असि (मार्गे रोध नात्)। वयं पराधीना तथा नः (अस्माकं) शून्यगृहं रक्षकान्तररहितं गृहं रक्षितव्यम्।

अत्र 'अपेहि' इति क्रियापदेन व्यज्यते यत् 'त्वं तावदप्रौढमतिः कारणं लोके प्रच्छन्नरतिमेवं (आवयोः) प्रकाशयसि, मम गृहं तु शून्यं ततश्च सङ्केतस्थानं तत्। तदुक्तं लोचने –

'इत्यत्रापेहीति तिङन्तमिदं ध्वनति – त्वं तावदप्रौढो लोकमध्ये यदेवं प्रकाशयसि। अस्ति तु सङ्केतस्थानं शून्यगृहं तत्रैवागन्तव्यमिति।'[2]

सम्बन्धस्य यथा –

**अन्यत्र व्रज बालक स्नान्तीं किं मां प्रलोकयस्येतत्।**
**भो जायाभीरुकाणां तटमेव न भवति॥**[3]

विवाहितनायकासक्ता काचित् जायाभीरुं स्वात्मन्यासक्तं तं नायकं विनिन्दयन्ती सासूयं वक्ति 'हे बालक पौरुषहीनेत्यर्थः अन्यत्र गच्छ न तु इह तिष्ठ, स्नान्तीं मां कथमेवं सतृष्णं प्रलोकयसि। भो! जायाभीरूकाणां जायात्रस्तानां युष्माकं तटं नैतद् भवति।

नायिकायाः तात्पर्यमिदं यत् 'प्रेम यद्यस्ति मयि तर्हि भीतिः किमर्थम्, यदि मां स्पृहयसि तर्हि जायासम्मुखेऽपि प्रेम करणीयं, तत्र जायासम्मुखे तु भीतिः पुनरत्र स्नानतटे सतृष्णदृष्टिः। अत्र 'भो' इति सम्बोधनं तिरस्कारार्थे। जायातः सभीता ये भवन्ति तेषां जायाभीरूकाणां तटमेतन्नास्ति।

---

1 तत्रैव वृत्तौ ध्वनिकारः
2 तत्रैव व्याख्याने लोचने
3 तत्रैव वृत्तौ ध्वनिकारः

अत्र 'जायाभीरूकाणाम्' इत्यनेन सम्बन्धेन ईर्ष्यातिशयो व्यज्यते। तदुक्तं लोचने -

'जायाभीरुकाणां सम्बन्धितटमेव न भवति। अत्र जायातो ये भीरवस्तेषामेतत्स्थानमिति दूरापेतः सम्बन्धः इत्यनेन सम्बन्धेनेर्ष्यातिशयः प्रच्छन्नकामिन्याभिव्यक्तः।'[1]

निपातानां व्यञ्जकत्वं यथा -

**मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम्।**
**मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु॥**[2]

शकुन्तलया सह लतामण्डपे रहसि मेलनावसरे गौतमीसमागमनेन प्रतिरूद्धरतेर्दुष्यन्तस्योक्तिरियं यत् कथमपि महत्प्रयासेन शकुन्तलाया मुखमुत्थापितं मया परं दौर्भाग्येन तु न चुम्बितम्।

अत्र 'तु' इति निपातेन व्यज्यते यत् 'यदि' रमणादिर्नापि स्यात् तथापि चुम्बनस्यावसर आसीदेव तेनैव मे गतार्थता स्यात्। इत्थं पश्चात्तापातिशयो 'तु' इति निपातेन व्यज्यते, तदुक्तं लोचने।

'तुशब्द इति पश्चात्तापसूचकस्सन् तावन्मात्रपरिचुम्बनलाभेनापि कृतकृत्यता स्यादिति ध्वनतीति भावः।'[3]

कालस्य व्यञ्जकत्वं यथा -

**समविषमनिर्विशेषाः समन्ततो मन्दमन्दसञ्चाराः।**
**अचिराद् भविष्यन्ति पन्थानो मनोरथानामपि दुर्लङ्घ्याः॥**[4]

प्रवासोद्यतं प्राणेश्वरं वर्षाकालिकबिभीषिकां सूचयन्ती नायिकाह 'समविषमाभ्यां समतलनिम्नोन्नतभागाभ्यां निर्विशेषाः समानाः तथा स्खलनभयात् (पिच्छिलत्वात्) मन्दमन्दः सञ्चरणं गमनं येषु तादृशाः पन्थानो मनोरथानामपि, का कथा मानवरथानामित्यर्थः दुःखेन लङ्घयितुं योग्याः दुर्गमा अचिराद् भविष्यन्ति।'

---

1 का. 16 वृत्तौ व्याख्याने लोचने तृतीयोद्योतः

2 तत्रैव वृत्तौ ध्वनिकारः

3 का. 16 वृत्तौ व्याख्याने लोचने तृतीयोद्योतः

4 तत्रैव वृत्तौ ध्वनिकारः

नायिकाया: तात्पर्यमिदं यत् 'हे प्रिय! त्वं तावत्परदेशं गच्छसि कामोद्दीपनवर्षाकाले। प्रथमन्तु मया सन्देशप्रेषणे काठिन्यं द्वितीयन्तु त्वमपि मार्गाणां दुर्गमत्वात् कथं समागमिष्यसि।

अत्र 'भविष्यति' इत्यत्र भविष्यकालवाचक: 'स्यप्रत्यय:' तेन व्यज्यते यत् 'यदाहं वर्षाकालस्य कल्पनां करोमि तदैव भयकम्पितं मे हृदयं भवति, यदा साक्षाद् वर्षाकाल: समागमिष्यति तदा मे का दशा भविष्यति। अनेन भाविविप्रलम्भशृङ्गारातिशयो व्यज्यते। तदुक्तं स्वयं ध्वनिकृता।

'अत्र ह्यचिराद्भविष्यन्ति पन्थान इत्यत्र भविष्यन्तीत्यस्मिन् पदे प्रत्यय: कालविशेषाभिधायी रसपरिपोषहेतु: प्रकाशते। अयं हि गाथार्थ: प्रवासविप्रलम्भशृङ्गारविभावतया विभाव्यमानो रसवान्।'[1]

एतदतिरिक्तं पदप्रकृतितदंशोपसर्गादीनां व्यञ्जकत्वं विस्तारेण प्रदर्शितं ध्वनिकृता तथा विशेषव्याख्यानं च सर्वत्र लोचनकृता विहितम्। काव्यप्रकाश-साहित्यदर्पणरसगङ्गाधरादौ च सुबादीनां व्यञ्जकत्वं प्रतिपादितम्।

तदित्थं रसध्वनौ (असंलक्ष्यक्रमव्यङ्ग्यध्वनौ) विशेषतो व्याकरणस्यावदानं सर्वत्र वर्तते।

सम्प्रति 'अलङ्कारध्वनौ' व्याकरणस्यावदानं प्रदर्श्यते। तथाहि - 'वस्त्वलङ्काररसभेदेन' ध्वनि: त्रिविध:। तेषु वस्त्वलङ्कारौ कुत्रचित् वाच्यरूपावपि भवत: परं रसस्तु स्वप्नेऽपि न वाच्य: स्वशब्देन च स्वशब्दवाच्यता दोषश्च तदुक्तं दर्पणे-

**रसस्योक्तिः स्वशब्देन स्थायिसञ्चारिणोरपि।**
**परिपन्थिरसाङ्गस्य विभावादेः परिग्रहः॥**
**................ दोषा रसगता मताः॥**[2]

यथा -

**तामुद्वीक्ष्य कुरङ्गाक्षीं रसो नः कोऽप्यजायत।**

अथवा

**चन्द्रमण्डलमालोक्य शृङ्गारे मग्नमन्तरम्॥**[3]

1 का. 16 वृत्तौ ध्वनिकार: तृतीयोद्योत:
2 का. 12-16 सा. दर्पण: सप्तमपरिच्छेद:
3 तत्रैव वृत्तौ

उभयत्र 'रस' इति पदेन 'शृङ्गार' इति पदेन च स्वशब्दवाच्यतादोषः।

तत्रालङ्कारध्वनिविषये लोचनकारो ब्रवीति यत् प्रतीयमानस्य तावद् द्वौ भेदौ तौ च लौकिकालौकिकरूपौ, तत्र वस्त्वलङ्कारौ लौकिरूपौ रसस्तु अलौकिकरूपः। तत्र लौकिकस्य स्वरूपं वदन्नाह 'यः कुत्रचिद् वाच्यरूपोऽपि भवति सो लौकिकः, तथा वस्त्वलङ्कारौ कुत्रचिद् वाच्यरूपौ दृश्येते। यथा–

अहं ग्रामं गच्छामीति वस्तु।

मुखं कमलमिव सुन्दरमिति चोपमालङ्कारः।

कुत्रचिच्च व्यङ्ग्यरूपौ तौ दृश्येते, यथा – 'देवदत्तो ग्रामं गच्छतीति वाक्येन तद्भृत्यस्य' अहमपि स्वमिना सह ग्रामं गच्छामीति वस्तुध्वनिः। तथा

'दुर्गालङ्घितविग्रहो ... राजत्युमावल्लभः' इत्यत्र चोपमालङ्कारध्वनिः।

इत्थं प्रतीयमानस्य लौकिकरूपं बोधयता लोचनकृता भणितं यत् 'यः कुत्रचित् स्वशब्दवाच्योऽपि भवेत् कुत्रचिच्च व्यङ्ग्योऽपि भवेत् तल्लौकिकः। यश्च स्वप्नेऽपि स्वशब्दवाच्यो नैव भवेत् प्रत्युत विभावानुभावव्यभिचारिभिः प्रकटितो भवेत् सोऽलौकिकः, स चालौकिक-प्रतीयमानो रसध्वनिः। तदुक्तम्–

'तत्र प्रतीयमानस्य तावद् द्वौ भेदौ लौकिकः काव्यव्यापारैकगोचरश्चेति। लौकिको यः स्वशब्दवाच्यतामधिशेते स च विधिनिषेधाद्यनेकप्रकारो वस्तुशब्दे-नोच्यते।'[1] तथा –

'यस्तु स्वप्नेऽपि न स्वशब्दवाच्यो न लौकिकव्यापारपतितः किन्तु शब्दसमर्प्यमाणहृदयसंवादसुन्दरविभावानुभावसमुचितप्राग्विनिविष्टरत्यादिवास-नानुरागसुकुमारस्वसंविदानन्दचर्वणाव्यापाररसनीयरूपो रसः, स काव्य-व्यापारैकगोचरो रसध्वनिरिति, स च ध्वनिरेवेति, स एव मुख्यतयात्मेति।'[2]

तत्रालङ्कारध्वनिविषये वक्ति लोचनकारो यः पूर्वं कुत्रापि वाक्यार्थे वाच्यरूपेण वाक्यार्थस्योपस्करणात् वाच्यालङ्कारभूतो बभूव परं यत्र स्वयं व्यञ्जनयाभिव्यक्तस्सन् प्रधानतां प्राप्नोति। अर्थात् कुत्रापि गुणीभावाभावात्

---

1 का. 4 व्याख्याने लोचने

2 तत्रैव

यत्र सः प्रधानतयाभिव्यज्यते तत्रालङ्कारध्वनिः। यद्यपि सोऽलङ्कारो ध्वनिरूपः तथापि ब्राह्मणश्रमणन्यायेन 'अलङ्कारध्वनिः' कथ्यते।

तदुक्तं लोचने –

'यः पूर्वं क्वापि वाक्यार्थेऽलङ्कारभावमुपमादिरूपतयान्वभूत्, इदानीं त्वनलङ्काररूप एवान्यत्र गुणीभावाभावात् स पूर्वप्रत्यभिज्ञानबलादलङ्कारध्वनिरिति व्यपदिश्यते ब्राह्मणश्रमणन्यायेन।'

अलङ्कारध्वनेरूपजीव्यं वाच्यालङ्कार एव। अर्थात् प्रतीयमानस्य भेदत्रितये वस्त्वलङ्काररसरूपे द्वितीयस्तावत् 'अलङ्कारध्वनिः', सूक्ष्मेक्षिकयात्र पश्यामस्तर्हि ज्ञायते यत् वाच्यदशायां कुत्रचित् वाक्यार्थस्योपस्करणात्ते रूपकोपमादय अलङ्काराः कथ्यन्ते (अलं करोतीति व्युत्पत्त्या) परं यत्र कुत्रापि वाक्ये सो रूपकाद्यलङ्कारवर्गः स्वयं व्यङ्ग्यतया 'अलङ्कार्यभूतो' भवति (अलं कर्तुं योग्येत्यर्थः) अर्थात् तेषां रूपकादीनां कुत्रापि गुणीभावाभावात् प्राधान्यं भवति। तत्र ब्राह्मणश्रमणन्यायेन 'अलङ्कारध्वनिरिति' व्यपदेशो भवति।

कुत्रापि वाक्ये यद्यलङ्कारध्वनिरस्ति तदा तस्यालङ्कारध्वनेः सम्यग्बोधाय तस्यैवालङ्कारस्य वाच्यरूपं नूनं द्रष्टव्यं भवति। तथा कतिपयेष्वलङ्कारेषु साक्षाद् व्याकरणशास्त्रस्य सूत्राणां ज्ञानमावश्यकं, तेनैव सूत्रज्ञानेन तेषामलङ्काराणां स्वस्वरूपोपलब्धिः। तदित्थं वाच्यालङ्कारज्ञानद्वारकं व्यङ्ग्यालङ्कारज्ञानं सर्वत्र तथा येष्वलङ्कारेषु साक्षाद्व्याकरणस्य सूत्राणां ज्ञानस्योपयोगिता तत्र तत्र व्याकरणस्य अवदानं नूनम्।

सर्वादौ वाच्यालङ्काराणामुपजीव्यभूताया[1] उपमायाः स्वरूपनिर्णये व्याकरणस्यापरिहार्यता प्रदर्श्यते। तत्रोपमां लक्षयता विश्वनाथेनोक्तम् –

**साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः।**

---

1 उपमैका शैलूषी संप्राप्ता चित्रभूमिका भेदान्।
रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः।।
तथा
तदिदं चित्रं विश्वं ब्रह्मज्ञानादिवोपमाज्ञानात्।
ज्ञातं भवतीत्यादौ निरूप्यते निखिलभेदसहिता सा।।
उपमानिरूपणे चित्रमीमांसायाम् अप्पयदीक्षितः

वाक्यस्यैकत्वे सति द्वयोरूपमानोपमेययोर्वैधर्म्यरहितं वाच्यं (इवादिभि- र्निपातैः, क्यङादिभिः प्रत्ययैः, उपमितादिभिः समासैर्वा प्रतिपाद्यम्) सादृश्यम् 'उपमालङ्कारः'।

पूर्णोपमालुप्तोपमात्वेन भेदद्वयमुपमायाः तथा भेदद्वयेऽपि तावद् व्याकरणस्य आवश्यकता। तत्र 'उपमानोपमेयसाधारणधर्मवाचकानां चतुर्णां वाच्यत्वे पूर्णोपमा। पुनः पूर्णोपमायाः श्रौतीत्वेन आर्थीत्वेन भेदद्वयम्। श्रौत्युपमायां 'यथा' 'इव' वा प्रभृतीनां प्रयोगः तथा 'इवार्थे' 'तत्र तस्येव'[1] इति सूत्रेण वतिप्रत्ययः। तदुक्तं दर्पणे 'यथेववादयः शब्दाः उपमानान्तरप्रयुक्त- तुल्यादिपदसाधारणा अपि श्रुतिमात्रेणोपमानोपमेयगतसादृश्यलक्षणसम्बन्धं बोध यन्तीति तत्सद्भावे श्रौत्युपमा। एवं 'तत्र तस्येव' इत्यनेनेवार्थे विहितस्य वतेरूपादाने।'[2]

आर्थ्युपमायां 'तुल्यसमानाद्यः शब्दाः तथा तुल्यार्थे 'तेन तुल्यं क्रिया चेद्वतिः'[3] इति सूत्रेण वतिप्रत्ययः। तदुक्तम् -

'तुल्यादयस्तु 'कमलेन तुल्यं मुखम्' इत्यादावुपमेय एव। 'कमलं मुखस्य तुल्यम्' इत्यादावुपमान एव। 'कमलं मुखं च तुल्यम्' इत्यादावुभयत्रापि विश्रामयन्तीत्यर्थानुसन्धानादेव साम्यं प्रतिपादयन्तीति तत्सद्भावे आर्थी। एवं 'तेन तुल्यं क्रिया चेद्वतिः' इत्यादिना तुल्यार्थे विहितस्य वतेरूपादाने।'[4]

'तत्र तस्येव' इत्यनेन सप्तम्यन्तात् षष्ठ्यन्ताच्च इवार्थे (समानार्थे) वतिप्रत्ययः, 'तेन तुल्यं क्रियाचेद्वतिः' इत्यनेन तु तृतीयान्तात् तुल्यार्थे वतिप्रत्ययो यदि तुल्यार्थः क्रिया स्यात्।

पुनः तद्धितसमासवाक्यगतत्वेन श्रौत्यार्थीत्यनयोः षड् भेदाः। तत्र तद्धितसमासवाक्यगतत्वेन श्रौती यथा-

**सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ।**
**हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले।।**[5]

1 5/1/116 पा. सू.
2 का. 16 वृत्तौ सा. दर्पणः दशमपरिच्छेदः
3 5/1/115 पा. सू.
4 का. 16 वृत्तौ सा. द.
5 तत्रैव वृत्तौ सा. द.

तद्धितश्रौतीपूर्णोपमा यथात्र –

हे बाले तव मुखस्य (उपमेयम्) सौरभं (साधारणधर्मः) अम्भोरूहस्य (उपमानम्) इव (वाचकः)।

अम्भोरूहस्य इवेति विग्रहे 'तत्र तस्येव' इति सूत्रेण वतिप्रत्ययः औपम्यवाची, अतस्तद्धितगता श्रौतीपूर्णोपमेयम्।

समासगतश्रौतीपूर्णोपमा यथात्र –

हे बाले ते स्तनौ (उपमेयम्) कुम्भौ (उपमानम्) इव (वाचकः) पीनौ (साधारणधर्मः)।

'कुम्भाविव' इत्यत्र 'इवेन समासो विभक्त्यलोपश्च' इति वार्तिकेन समासस्तथा विभक्त्यलोपः। अतः समासगता श्रौतीपूर्णोपमेयम्।

वाक्यगतश्रौतीपूर्णोपमा यथात्र –

हे बाले! तव वदनं (उपमेयम्) शरदिन्दुः (उपमानम्) यथा (वाचकः) हृदयं मदयति (साधारणधर्मः)। वाक्यगता श्रौतीपूर्णोपमेयम्।

तद्धितसमासवाक्यगतत्वेन 'आर्थी' यथा –

**मधुरः सुधावदधरः पल्लवतुल्योऽतिपेलवः पाणिः।**
**चकितमृगलोचनाभ्यां सदृशी चपले च लोचने तस्याः॥**[1]

तद्धितगतार्थीपूर्णोपमा यथात्र –

तस्या अधरः (उपमेयम्) सुधया (उपमानम्) तुल्यं (वाचकः) मधुरः (साधारणधर्मः)। 'सुधया तुल्यम्' इति विग्रहे 'तेन तुल्यं क्रिया चेद्वतिः' इति सूत्रेण तुल्यार्थे वतिप्रत्ययः। अतः तद्धितगतार्थीपूर्णोपमेयम्।

समासगतार्थीपूर्णोपमा यथात्र –

तस्याः पाणिः (उपमेयम्) पल्लवेन (उपमानम्) तुल्यः (वाचकः) अतिपेलवः (साधारणधर्मः)।

'पल्लवेन तुल्यः' इति विग्रहे 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्'[2] इत्यनेन समासस्तथा समासगतार्थीपूर्णोपमेयम्।

---

1 का. 16 वृत्तौ सा. द.

2 2/3/72 पा. सू.

वाक्यगतार्थीपूर्णोपमा यथात्र –

तस्या लोचने (उपमेयम्) चकितमृगलोचनाभ्यां (उपमानम्) सदृशी (वाचकः) चपले (साधारणधर्मः)।

इत्थं पूर्णोपमायाः षट्सु भेदेषु साक्षाद् व्याकरणस्योत्तमर्णता दृश्यते। लुप्तोपमायामपि व्याकरणस्य साक्षात्प्रभावो दृश्यते। तथाहि चतुर्णां मध्ये (उपमानोपमेयसाधारणधर्मवाचकानामित्यर्थः) एकस्य द्वयोः त्रयाणां वा लोपे सति लुप्तोपमा।

यत्र साधारणधर्मस्य लोपस्तत्र सर्वत्र 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे'[1] इत्यनेन समासः। उपमेयस्योपमानेन सह गुणक्रियारूप-सामान्यधर्मस्याप्रयोगे सत्ययं समासो भवति।

यथा –

**वाचः सुधा इवोष्ठस्ते बिम्बतुल्यो मनोऽश्मवत्।**

वाचः (उपमेयम्) सुधा (उपमानम्) इव (वाचकः) परमत्र माधुर्यरूपसाधारणधर्मो नोपात्तः तथा चेयं समासगता धर्मलुप्ता श्रौती। तथा ते ओष्ठः (उपमेयम्) बिम्बेन (उपमानम्) तुल्यः (वाचकः) परमत्र रक्तत्वादिसाधारणधर्मो नोपात्तः, तथा चेयं समासगता धर्मलुप्तार्थी।

तथा ते मनः (उपमेयम्) अश्मना (उपमानम्) तुल्यं (वाचकः) परमत्र कठिनत्वरूपसाधारणधर्मो नोपात्तस्तथा तद्धितगता धर्मलुप्तार्थी।

'क्यच्' 'क्यङ्' 'णमुल्' प्रभृतिप्रत्यये सत्यपि साधारणधर्मस्य लोपे पुनर्लुप्तोपमा भवति तदुक्तम् –

**आधारकर्मविहिते द्विविधे व क्यचि क्यङि।**
**कर्मकर्त्रोणमुलि च स्यादेवं पञ्चधा पुनः॥**[2]

यथास्मिन् श्लोके

**अन्तः पुरीयसि रणेषु सुतीयसि त्वं**
**पौरं जनं तव सदा रमणीयते श्रीः।**

---

1 2/1/56 पा. सू.

2 का. 19 सा. दर्पणः दशमपरिच्छेदः

**दृष्टः प्रियाभिरमृतद्युतिदर्शमिन्द्र**
**सञ्चारमत्र भुवि सञ्चरसि क्षितीश॥**[1]

यत्र पुनः उपमावाचकस्य लोपस्तत्र सर्वत्र 'उपमानानि सामान्यवचनैः'[2] इत्यनेन सूत्रेण समासः। उपमानवाचकसुबन्तस्य समानधर्मवाचकसुबन्तेन समासोऽनेन सूत्रेण भवति, अत्र वाचकशब्दस्य समासत्वाल्लोपो भवति। यथा–

**वदनं मृगशावाक्ष्याः सुधाकरमनोहरम्।**

सुधाकरः (उपमानम्) इव (वाचकः) मनोहरम् (साधारणधर्मः) इति सुधाकरमनोहरम्।

इत्थं लुप्तोपमायामपि व्याकरणस्यानुप्राणितास्ति। अत्र तु सर्वत्र वाक्यार्थस्योपस्करणात् 'उपमाया न प्राधान्यम्' परं यत्र व्यङ्ग्यतया तत्प्रतीतिः तत्रोपमाध्वनिः। यथा–

**दुर्गालङ्घितविग्रहो मनसिजं सम्मीलयंस्तेजसा**
**प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः।**
**नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन्**
**गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः॥**[3]

अत्र प्रकरणेनाभिधया उमावल्लभशब्दस्योमानाम्नीमहादेवीवल्ल–भभानुदेवनृपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपोऽर्थो बोध्यते। ततश्च महेश्वरभानुदेवयोरूपमानोपमेयभावः कल्प्यते तेन 'भानुदेवो महेश्वर इव' इत्युपमाध्वनिः।

तथैव ध्वनिकारोऽपि शब्दशक्त्युत्थध्वनिस्वरूपं प्रकाशयन् तत्रैव चोदाहरणत्रयं प्रदाय वदति यत्–

'एषूदाहरणेषु शब्दशक्त्या प्रकाशमाने सत्यप्राकरणिकेऽर्थान्तरे वाक्यस्यासम्बद्धार्थाभिधायित्वं मा प्रसांक्षीदित्यप्राकरणिकप्राकरणिकार्थयो–रूपमानोपमेयभावः प्रकल्पयितव्यः।'[4]

1 तत्रैव वृत्तौ
2 2/1/55 पा. सू.
3 का. 14 वृत्तौ सा. द. द्वितीयपरिच्छेदः
4 का. 21 वृत्तौ ध्वन्यालोकः द्वितीयोद्योतः

तदित्थं प्राकरणिकाप्राकरणिकार्थयोरूपमानोपमेयभावकल्पनद्वारा उपमाध्वनौ सर्वत्र वाच्योपमालङ्कारज्ञानमावश्यकं तथा वाच्योपमालङ्कारज्ञाने व्याकरणज्ञानमावश्यकं ततश्च परम्परया 'अलङ्कारध्वनावपि' व्याकरणस्यावदानम्।

उपमातिरिक्तालङ्कारेष्वपि व्याकरणानुप्राणिता वर्तते। तद्यथा रसनोपमायां[1] –

**चन्द्रायते शुक्लरूचापि हंसो हंसायते चारुगतेन कान्ता।**
**कान्तायते स्पर्शसुखेन वारि वारीयते स्वच्छतया विहायः॥**[2]

अत्र सर्वत्र 'कर्तुः क्यङ् सलोपश्च'[3] इत्यनेन 'उपमानात्कर्तुः सुबन्तादाचारे क्यङ्'।

तथा 'यथासंख्यालङ्कारे'[4] यथासंख्यमनुदेशः समानाम्'[5] इत्यस्योपयोगिता। यत्र स्थानी तथादेशयोः संख्या समाना भवति, तत्र क्रमेण आदेशो यथा 'एचोऽयवायावः'। तथैव काव्येऽपि यत्र क्रमेण पूर्वकीर्तितानां वस्तूनां क्रमेण पश्चात्कीर्तनं समन्वयो वा भवति तत्र यथासंख्यालङ्कारः। यथा–

**एकस्त्रिधा वससि चेतसि चित्रमत्र**
**देव! द्विषां च विदुषां च मृगीदृशां च।**
**तापञ्च सम्मदरसं च रतिञ्च पुष्णन्**
**शौर्योष्मणा च विनयेन च लीलया च॥**[6]

कश्चन कविः कमपि राजानं स्तौति यत् 'हे देव! भवान् द्विषां (शत्रूणां) विदुषां (प्राज्ञानां) मृगीदृशां (कामिनीनां) चेतसि शौर्योष्मणा

1 यथोर्ध्वमुपमेयस्य यदि स्यादुपमानता कथिता रसनोपमा। का. 25 सा. द. द. प.
2 तत्रैवोदाहरणम्
3 3/1/11 पा. सू.
4 यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः। का. 108 का. प्रकाशः
5 1/3/10 पा. सू.
6 तत्रैवोदाहरणं काव्यप्रकाशे

(प्रतापाग्निना) विनयेन (नम्रतया) लीलया (विलासेन) तापं (संतापं) सम्मदरसं (आनन्दरसम्) रतिं (प्रीतिं) च पुष्णन् प्रकारत्रयेण वससि तदेतच्चित्रम् (आश्चर्यम्)।

अत्र द्वितीयपादे कथितानां (द्विषां - विदुषां - मृगीदृशां) क्रमेण तृतीयपादोक्तैः (तापम्-सम्मदरसम्-रतिम् एभिः) तथा चतुर्थपादोक्तैः सह (शौर्योष्मणा-विनयेन-लीलया एतैः) तेनैव क्रमेणान्वयात् यथासंख्यालङ्कारः।

तथा यत्र यथासंख्यध्वनिस्तत्र तत्स्वरूपज्ञानाय वाच्ययथासंख्यालङ्कार-ज्ञानापेक्षा तथा तज्ज्ञानं व्याकरणाधीनं, ततश्च परम्परया व्याकरणावदानं यथासंख्यध्वनौ। तदुक्तं ध्वनिकृता 'यथासंख्यध्वनिर्यथा'

**अङ्कुरितः पल्लवितः कोरकितः पुष्पितश्च सहकारः।**
**अङ्कुरितः पल्लवितः कोरकितः पुष्पितश्च हृदि मदनः॥**[1]

श्लोके वाच्यार्थोऽयं यत् सहकारः (आम्रः) पूर्वं सञ्जाताङ्कुरः तदनु सपल्लवः ततः कोरकितः ततः कुसुमितश्चाभूत्। मदनः (कामः) पूर्वं सञ्जाताङ्कुर ततः सपल्लवः कोरकितः कुसुमितश्चाभूत्।

परमत्र शब्दशक्तिवशाद् यथासंख्यालङ्कारोऽभिव्यक्तः। तद्यथा पूर्वं मुख्यार्थे बाधाभावात् संलक्ष्यक्रमवशात् येन क्रमेण सहकारविशेषणानि तेनैव क्रमेण मदनविशेषणानि ततश्चार्थो व्यज्यते यदा सहकारकोरकितः तदा कामोऽपि तेनैव क्रमेणाग्रे सर्वत्रान्वयः। अर्थात् यदुद्देशं सहकारगत-प्रथमवर्णनमनतिक्रम्य योऽनुद्देशः मदनवर्णनरूपः तत्र यच्चारुत्वं मदनविशेषण-भूताङ्कुरितादिशब्दगतम् अनुरणनरूपं संलक्ष्यक्रमव्यङ्ग्यरूपं यत् यथासंख्यं तत् प्रतीयमानम् आलक्ष्यते। तदुक्तं ध्वनिकृता-

अत्र हि यथोद्देशमनूद्देशे यच्चारुत्वमनुरणनरूपं मदनविशेषण-भूताङ्कुरितादिशब्दगतं तन्मदनसहकारयोस्तुल्ययोगितासमुच्चयलक्षणा-द्वाच्यादतिरिच्यमानमालक्ष्यते।'[2]

मयात्र दिङ्मात्रेण एतानि ध्वन्यात्मकान्युदाहरणानि प्रदर्शितानि ध्वनिकारेण तु द्वितीयोद्योते विस्तरशो बहूनि ध्वन्यात्मभूतानि उदाहरणानि

1 का. 27 वृत्तौ ध्वन्यालोकः द्वितीयोद्योतः

2 का. 27 वृत्तौ ध्वन्यालोकः द्वितीयोद्योतः

प्रस्तुतानि, तथान्ते निर्दिष्टं यत् सर्वेषामपि वाच्यालङ्काराणां ध्वनित्वं स्वयमुहनीयम्। तदुक्तम् –

**एवमन्येऽप्यलङ्काराः यथायोगं योजनीयाः।**[1]

अत्र लोचनकारश्च स्पष्टं वक्ति यत् 'एवमन्येपीति सर्वेषामेवार्थालङ्काराणां ध्वन्यमानता दृश्यते।'[2]

तथा व्याख्याने बहूनामलङ्काराणां ध्वन्यमानता प्रतिपादिता लोचनकृता तथा भणितं यत् 'महाकवीनां वाचः कामधेनुवदस्ति तेन तेषां वाक्षु, स्वयमेवान्येऽपि भेदाः शक्योत्प्रेक्ष्याः तथा सर्वेषामलङ्काराणां ध्वन्यमानत्वमस्तीति मन्तव्यम्। तदुक्तम्–

'एवमन्येऽप्यत्र भेदाः शक्त्योत्प्रेक्ष्याः। महाकविवाचोऽस्याः कामधेनुत्वात्। यतः –

**हेलापि कस्यचिदचिन्त्यफलप्रसूत्यै**
**कस्यापि नालमणवेऽपि फलाय यत्नः।**
**दिग्दन्तिरोमचलनं धरणीं धुनोति**
**खात्सम्पतन्नपि लतां चलयेन्न भृङ्गः।।**

तथाग्रे वक्ति 'एवं सर्वालङ्काराणां ध्वन्यमानत्वमस्तीति मन्तव्यम्।'[3]

तदित्थं सर्वेषामलङ्काराणां ध्वनिरपि तावदस्ति। किञ्च तेषां ध्वन्यात्मकानामलङ्काराणां ज्ञानाय वाच्यालङ्कारज्ञानं नितान्तमावश्यकं तथा सन्ति नैकालङ्कारा येषां स्वरूपोपलब्धये व्याकरणसूत्राणां ज्ञानमावश्यकम्। यथा 'उपमालङ्कारे' 'तत्र तस्येव' 'तेन तुल्यं क्रियाचेद्वतिः', 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे', 'उपमानानि सामान्यवचनैः', 'उपमानादाचारे', 'कर्तुः क्यङ् सलोपश्च', 'इवेन समासो विभक्त्यलोपश्च', इत्यादीनाम्। रूपकादौ च 'मयूरव्यंसकादीनां' यथासंख्यालङ्कारे 'यथासंख्यमनुदेशः समानाम्' समुच्चये च खले कपोतिकान्यायादेरावश्यक्ता।[4]

---

1 तत्रैव वृत्तौ

2 का. 27 वृत्तौ व्याख्याने लोचने ध्वन्यालोकः द्वितीयोद्योतः

3 तत्रैव व्याख्याने लोचने

4 वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत् पतन्ति तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति। सा. द. समुच्चयालङ्कारनिरूपणे दशमः परिच्छेदः

इत्थं परम्परया व्याकरणस्यावदानं द्वितीयध्वनिभेदे अर्थात् 'अलङ्कारध्वनौ' वर्तते, कारणं वाच्यालङ्कारज्ञानद्वारकं व्यङ्ग्यालङ्कारज्ञानं सर्वत्र भवति।

प्रश्नोऽत्र समुदेति यत् चिरन्तनैर्भामहादिभिरलङ्काराणां निरूपणं कृतमेव तर्हि पुनस्तेषां व्यङ्ग्यत्वप्रतिपादनस्य किं प्रयोजनं, तर्हि ध्वनिकारो ब्रवीति यत् 'वाच्यार्थदशायां येषां शरीरत्वापत्तिरपि दुर्घटा त एवालङ्काराः व्यङ्ग्यत्वमादाय परां शोभामावहन्ति तदुक्तम् –

**शरीरीकरणं येषां वाच्यत्वे न व्यवस्थितम्।**
**तेऽलङ्काराः परां छायां यान्ति ध्वन्यङ्गतां गताः॥**[1]

चतुर्णामपि वाचां परापश्यन्तीमध्यमावैखरीणां सादरमुल्लेखो मङ्गलाचरण– दृष्ट्या लोचनकृता प्रत्येकोद्योतव्याख्यानान्ते कृतः। यद्यपि तेषां ध्वनिस्थापने साक्षादवदानं नास्ति तथापि मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि चाप्येतारश्च सिद्धार्था[2], इति भाष्यकारोक्तिमनुसृत्य मयापि तदत्र सादरमुपन्यस्यते।

**यदुन्मीलनशक्त्यैव विश्वमुन्मीलति क्षणात्।**
**स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम्॥**[3]

शैवदर्शनानुप्राणिते मङ्गलेऽस्मिन् प्रतिभाख्या पराशक्तिः स्तुता। शैवदर्शनानुसारं परमशिवः परमशान्तोऽस्ति, तत्र हि मयूराण्डरसन्यायेन सर्वं चराचरं निलीनं तथा विश्वसिसृक्षया पराशक्तिः परमशिवमवलम्ब्य (स्वात्मायतनं समवलम्ब्य) स्वोन्मीलनशक्त्या विश्वं क्षणेनोन्मीलयति। ततश्च स्वात्मायतने 'परमशिवे' विश्रान्तां नित्यवर्तमानां शिवां कल्याणीं (किम्बहुना भगवतीं दुर्गां) आदिशक्तिं वा परावाणिं वन्दे।

काव्यपक्षे ध्वन्यते यत् 'कवेः प्रतिभां (नवनवोन्मेषशालिनीं प्रज्ञां) वन्दे, या नित्यं स्वायतने कवौ तिष्ठन्ती स्वशक्त्या विलक्षणमेव विश्वं क्षणेनोन्मीलयति।

---

1 का. 28 ध्वन्यालोकः द्वितीयोद्योतः

2 पस्पशाह्निके महाभाष्ये

3 प्रथमोद्योतसमाप्तौ लोचने

**प्राज्यं प्रोल्लासमात्रं सद्भेदेनासूत्र्यते यया।**
**वन्देऽभिनवगुप्तोऽहं पश्यन्तीं तामिदं जगत्॥**[1]

अत्रापि शैवदर्शनानुप्राणिते मङ्गले पश्यन्तीरूपा भगवती स्तुता। तथाहि परमशिवे बाह्यघटपटादिवस्तुमात्रस्याभेदस्तथापि यया शक्त्या (भगवत्या) किं बहुना मायया विस्तृतं (प्राज्यं) तथा प्रतीतिमात्रं (प्रोल्लासमात्रं) न तु पारमार्थिकमिदं जगद् भेदेन घटपटादिभेदेन आसमन्तात् सूत्र्यते रच्यते तां भगवतीं पश्यन्तीं वन्देऽभिनवगुप्तोऽहम्।

'पश्यन्ती'पदेनापरार्थो ध्वन्यते यत् 'चतुर्णां वाचां परा-पश्यन्ती-मध्यमा- वैखरीणां 'पश्यन्तीं वाचं वन्दे। तथाहि परावाण्यां सर्वेषां शब्दार्थानामभेदः सर्वथा तथा द्वितीयायां पश्यन्तीवाण्यां भेदस्य ग्रहणं बुद्धिः करोति। अर्थात् पश्यन्तीवाक् शब्दार्थयोर्भेदं कुर्वन्ती सर्वं विश्वं भेदेन प्रकाशयति। ततश्च तां वन्दे।

**आसूत्रितानां भेदानां स्फुटतापत्तिदायिनीम्।**
**त्रिलोचनप्रियां वन्दे मध्यमां परमेश्वरीम्॥**[2]

शैवदर्शनानुप्राणिते मङ्गलेऽस्मिन् भगवती मध्यमा वन्दिता। तथाहि शैवदर्शने परमशिवः 'परब्रह्म' तथा भगवती दुर्गा 'महामाया'। भेदानां सूत्रपातपुरस्सरं विश्वोत्पत्तिस्तावद् भगवत्याः कार्यम्। तत्र पश्यन्ती तथा मध्यमा भगवत्या शक्तिद्वयं रूपद्वयं वा। भेदानां सूत्रपातः (प्रारम्भः) पश्यन्त्या स्फुटता च मध्यमया भवति।

तदेव वक्ति लोचनकारो मङ्गले यत् 'पश्यन्तीशक्त्या कृता ये भेदास्तेषां स्फुटतापत्तिदायिनीं स्पष्टतादात्रीं त्रिलोचनप्रियां (शिवप्रियां) परमेश्वरीं मध्यमां वन्दे।

मङ्गलोऽयं निरतिशयमानन्दयति समुचितञ्चास्ति। कारणं द्वितीयोद्योते 'ध्वनिभेदानां सूत्रपातकरणात् तत्र भेदानां सूत्रपातकारिकायाः पश्यन्त्याः स्तुतिः'। पुनरत्र तृतीयोद्योते भेदपुरस्सरं व्यञ्जनास्थापनाद्वारा तेषु भेदेषु स्फुटातिशयकरणात् मध्यमायाः स्तुतिः।

---

1 द्वितीयोद्योतसमाप्तौ लोचने

2 तृतीयोद्योतसमाप्तौ

मध्यमा पदेन च परा-पश्यन्ती-मध्यमा-वैखरीणां 'मध्यमावाक्' वन्दिता, कारणं पश्यन्त्यपेक्षया मध्यमायां स्फुटतरभेदग्रहणं भवति। ततश्च मध्यमा वन्दिता।

**स्फुटीकृतार्थवैचित्र्यबहिः प्रसरदायिनीम्।**
**तुर्यां शक्तिमहं वन्दे प्रत्यक्षार्थनिदर्शिनीम्॥**[1]

शैवदर्शनानुप्राणिते मङ्गलेऽस्मिन् भगवती वैखरी स्तुता। परमशिवस्य या शक्तिः (मायापरपर्याया) सा वैखरीरूपा वर्तते। प्रथमतिसृणां परा-पश्यन्ती-मध्यमानां श्रवणं नास्ति, स्थानप्रयत्नसहकृतबलेन शब्दश्रवणं कार्यप्रवर्तनञ्च वैखर्या भवति। परादौ वाण्यां शब्दश्रवणाभावेन प्रवर्तनाभावात्तावद् वैचित्र्यं नास्ति।

सर्वादौ मनसि प्रवर्तनेच्छया अर्थवैचित्र्यमुदेति तञ्च बहिर्वैखरी करोति। सैव प्रत्यक्षार्थस्य निर्देशनं करोति। ततश्च स्फुटीकृतार्थवैचित्र्यबहिः प्रसरदायिनीं प्रत्यक्षार्थनिदर्शिनीं तुर्यां शक्तिं वैखरीं वन्देऽहम्।

तदित्थं ध्वनिस्थापने यावच्छक्यं सप्रमाणं सविस्तरं व्याकरणशास्त्र-स्यावदानं प्रकृताध्याये प्रदर्शितम्।

◈ ◈ ◈

1 चतुर्थोद्योतसमाप्तौ लोचने

# तृतीयोऽध्यायः

## ध्वनिस्थापने काश्मीरशैवदर्शनशास्त्रस्यावदानम्

सकलशास्त्रसारं 'साहित्यशास्त्रमि'ति विदुषां भणितिं निशम्य शोध प्रबन्धेऽस्मिन् ध्वनिस्थापने व्याकरणदर्शनशास्त्रयोरवदानमिति शीर्षकमनुसृत्य पूर्वस्मिन्नध्याये यथासम्भवं ध्वनिस्थापने व्याकरणशास्त्रस्यावदानं तावत्प्रदर्शितम्।

सम्प्रति ध्वनिस्थापने दर्शनशास्त्रस्यावदानं यथामति भगवतीप्रसादात् प्रदर्श्यते। यद्यपि 'प्रथमे हि विद्वांसो वैयाकरणाः व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः।[1] तथा 'बुधैर्वैयाकरणैः प्रधानभूतस्फोट-रूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। ततस्तन्मतानु-सारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य।[2] इत्यादिभिर्वचनैर्व्याकरणशास्त्रस्यावदानं साक्षाद् ध्वनिसिद्धान्तप्रतिष्ठापकेन श्रीआनन्दवर्धनाचार्येण मम्मटाचार्येण च मुक्तकण्ठेन स्वीकृतम्। दर्शनशास्त्रस्यावदानं यद्यपि कुत्रापि मुक्तकण्ठेन न स्वीकृतं तथापि व्यञ्जनायाः स्थापने प्रायशः सर्वेषां दर्शनानां योगदानं तावदस्त्येव। तदेवात्र क्रमेण प्रदर्श्यते।

### काश्मीर-शैवदर्शनस्यावदानम्

ध्वनिस्थापने सर्वाधिकं शैवदर्शनस्यावदानं तावदस्ति। आनन्द-वर्धनाचार्यस्तावत् परमशैवदार्शनिको बभूव, तस्य ध्वनिसिद्धान्तस्य मूलं व्यञ्जनैव अर्थात् व्यञ्जनावृत्त्यनुप्राणकत्वाद् व्यङ्ग्यार्थस्य सत्ता तावदस्त्येव

---

1 का. 13 वृत्तौ ध्वन्यालोकः प्रथमोद्योतः

2 सू. 2 वृत्तौ काव्यप्रकाशः प्रथमोल्लासः

तत्र प्रमाणञ्च सचेतसामनुभवमात्रम्। तत्र तृतीयोद्योते व्यञ्जनायाः स्थापनावसरे ध्वनिकारेण सयुक्तिकैः प्रमाणैर्व्यञ्जनास्थापना कृता तथा व्यञ्जकस्य स्वरूपं स्फोरयता भणितं यत् –

'व्यञ्जकत्वमार्गे तु यदार्थोऽर्थान्तरं द्योतयति तदा स्वरूपं प्रकाशयन्नेवा-सावन्यस्य प्रकाशकः प्रतीयते प्रदीपवत्'।[1]

तथा वाच्यव्यङ्ग्ययोः पदार्थवाक्यार्थन्यायखण्डनप्रसङ्गे सविस्तरं घटप्रदीपन्यायो विवेचयन्नुक्तं यत् –

'तस्माद् घटप्रदीपन्यायस्तयोः। यथैव हि प्रदीपद्वारेण घटप्रतीतावुत्पन्नायां न प्रदीपप्रकाशो निवर्तते तद्वद् व्यङ्ग्यप्रतीतौ वाच्यावभासः।'[2]

तथा च –

'न हि व्यङ्ग्ये प्रतीयमाने वाच्यबुद्धिर्दूरी भवति, वाच्यावभासा-विनाभावेन तस्य प्रकाशनात्'।[3]

इत्थं ध्वनिकारो व्यङ्ग्यप्रतीतिकालेऽपि वाच्यार्थस्यावभासनं मनुते। यदि सूक्ष्मेक्षिकया पश्यामस्तर्हि शैवदर्शनस्यानुप्रणिता घटप्रदीपन्यायेन दृश्यते, तथाहि शैवदर्शने सर्वेषु षट्त्रिंशत्तत्त्वेषु शिवत्वानपायात् सर्वेषु क्षित्यन्तेषु तेषु शिवत्वं दूरं न भवति।[4]

एवं सर्वपदार्थानां समैव शिवता स्थिता।

तेषां तत्त्वानां पृथक् सत्ता च भवति तथैव काव्येऽपि व्यङ्ग्यप्रतीतौ वाच्योऽपि सहैव भासते। सम्प्रति संक्षेपेण शैवदर्शनस्यापेक्षितं वस्तु तावदत्र प्रस्तूयते।

**परमेश्वरः / परमशिवः**

काश्मीरशैवदर्शनानुसारं परमेश्वरः परमशिवो वा एकमात्रं परमतत्त्वम्। तस्य परमशिवस्य रूपद्वयं तच्च विश्वोत्तीर्णरूपं विश्वमयरूपञ्चेति।

विश्वोत्तीर्णरूपे कस्यापि पदार्थस्य नोत्पत्तिः, यद्यपि मयूराण्ड-

---

1 का. 33 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः

2 का. 33 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः

3 तत्रैव

4 परापरादिभेदोऽत्र श्रद्धानैरूदाहृतः।। शिवदृष्टिः, प्रथमाह्निकम् 48

रसन्यायेन समस्तमपि प्रपञ्चं तत्रैवावस्थितं तथापि न तदानिं तदाभासस्तस्य। अस्यामवस्थायां केवलं नितरां शुद्धस्य 'अहम्' इत्यस्य भानं तावदस्ति। इयमेव परावस्था, तदुक्तम्-

**सुसूक्ष्मशक्तित्रितयसामरस्येन वर्तते।**
**चिद्रूपाह्लादपरमो निर्विभागः परस्तदा।।**[1]

विश्वमयरूपे तु प्रपञ्चजातस्योत्पत्तिः। परमशिवो यदा स्वसत्तायाः स्वयं विमर्शं करोति तदा तदन्तर्वतिनीनां शक्तीनां समुल्लासः स्पन्दनं वा भवति तदनु कारणान्तरानपेक्षस्सन् परमेश्वरः प्रपञ्चजातं समुद्भावयति तदुक्तम्-

**चिदात्मैव हि देवोऽन्तः स्थितमिच्छावशाद् बहिः।**
**योगीव निरूपादानमर्थजातं प्रकाशयेत्।।**[2]

**स्वातन्त्र्यम्**

स्वातन्त्र्यं काश्मीरशैवदर्शनस्य मूलसिद्धान्तरूपेण वर्तते, स्वातन्त्र्य-वशादेव परमेश्वरस्य पूर्वोक्तं रूपद्वयं (विश्वोत्तीर्णं विश्वरूपञ्च) सम्भवति। स्वातन्त्र्यं नाम स्वाधीनता, तेन परमेश्वरः स्वाधीनः प्रत्युत समस्तं कार्यजातं तदधीनम्। स्वातन्त्र्यवशादेव परमेश्वरस्य स्वनिष्ठस्वप्रकाशतायाः तथा स्वनिष्ठपरप्रकाशतायाश्च भानम्।

**स्पन्दः**

आगमशास्त्रेषु विभिन्नेष्वर्थेषु प्रयुक्तोऽयं स्पन्दशब्दः काश्मीरशैवदर्शने परमशिवस्य इच्छाशक्त्याः कृते प्रयुक्तः। शुद्धप्रकाशस्वरूपशिवो यदा स्वप्रकाशकतां ज्ञानात्मकतां वा विमृशति तदा सो विमर्श एव 'स्पन्द' इति कथ्यते। अभिनवगुप्तपादाचार्येण 'ईश्वरप्रत्यभिज्ञाविमर्शिनी' इति ग्रन्थे प्रतिपादितं यत्-

'स्पन्दनं च किञ्चिच्चलनम्। एषैव च किञ्चिद्रूपता यदचलमपि चलमाभासत इति। प्रकाशस्वरूपं हि मनागपि नातिरिच्यते, अतिरिच्यत इवेति। तदचलभेदाभासभेदयुक्तमिव च भाति।'[3]

---

1 शिवदृष्टिः, श्लोकः 4, प्रथमाह्निकम्

2 ईश्वरप्रत्यभिज्ञा 1/5/7

3 ईश्वरप्रत्यभिज्ञाविमर्शिनी 1/5/14

उत्पलाचार्येण तु परमशिवस्य या स्फुरता सैव स्पन्दत्वेनाभिमता[1] तथा अनन्तब्रह्माण्डादय अनेनैव परमशिवस्य स्फुरणेनैव विनिर्मिताः। स्पन्दस्य सरलार्थं यत् परमशिवस्य 'अहं बहु स्याम्' इति स्वेच्छायाः पूर्वावस्था।

शैवदर्शनेषट्त्रिंशत्पदार्थानां गणना भवति, सम्प्रति संक्षेपेण तेषां स्वरूपं प्रदर्श्यते।

**1. शिवः**

परमशिवस्य प्रथमं रूपं विश्वोत्तीर्णरूपं वर्तते, तदेव वस्तुतः परमशिवस्य मौलिकं रूपमस्ति। अस्यामवस्थायां परमशिवः स्वरूपानन्दे मग्नस्तु वर्तते तथापि तदानन्दस्य नास्वादनं परमशिवस्य कारणं तस्य स्वरूपस्य प्रसरणं तदा नास्ति। इदमेव हि स्थिरानन्दरूपं वस्तु 'निर्वृतचित्' इति कथ्यते।[2] तत्र परमशिवस्य प्रथमः स्पन्द एव 'शिवतत्त्वम्' वर्तते। तदुक्तम् –

**यदयमनुत्तरमूर्तिनिजेच्छयाऽखिलमिदं जगत्स्रष्टुम्।**
**पस्पन्दे स स्पन्दः प्रथमः शिवतत्त्वमुच्यते तज्ज्ञैः।।**[3]

अयं शिव पुराणादौ वर्णितः कैलासवासी वा यो लिङ्गरूपेण सर्वत्र पूज्यते सो नास्ति। अयं तु विमर्शयुक्तः प्रकाशः शक्तिसंवलितः परमशिवो वा वर्तते। यस्य केवलं शुद्धं स्वस्यैव 'अहम्' इत्यस्य विमर्शो (ज्ञानं) भवति।

**2. शक्तिः**

शिवतत्त्वे 'अहम्' इत्यस्य आभासो भवति, तत्र 'इदम्' इत्यस्य निषेधकारकं तत्त्वमेव 'शक्तिः'। अर्थात् 'परमशिवे' 'अहम्' तथा 'इदम्' इत्यनयोः सामरस्यं भवति तथा यदा परमशिवस्य स्वातन्त्र्यस्वभावात् विश्वादिकर्तुं ज्ञातुं वा या स्वेच्छा सा शक्ति कथ्यते, तदुक्तम् –

---

1 सा स्फुरत्ता महासत्ता देशकालविशेषिणी।
2 सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः।।
ईश्वरप्रत्यभिज्ञाविमर्शिनी 13/15
3 आत्मैव सर्वभावेषु स्फुरन् निर्वृतचिद्विभुः।
अनिरुद्धेच्छाप्रसरः प्रसरद्दृक्क्रियः शिवः।। शिवदृष्टि 1/2

**स एको विश्वमेषितुं ज्ञातुं कर्तुं चोन्मुखो भवन्।**
**शक्तिस्वभावः कथितो हृदयत्रिकोणमधुमांसलोल्लासः॥**[1]

**3. सदाशिवः**

परमशिवे पञ्चशक्त्यः समवेतास्सन्ति यदा तासां समरसताया भङ्गो भवति तदा क्रमशः पृथक्-पृथक् तत्त्वोल्लासः। चिच्छक्त्याः प्राधान्ये सति 'शिवः' आनन्दशक्त्याः प्राधान्ये शक्तिः तथा इच्छाशक्त्याः प्राधान्ये 'सदाशिवः' क्रमशः समुदेति।

सदाशिवतत्त्वे 'अहम् इदम्' इत्यस्य भानं भवति तत्रापि 'इदम्' इत्यस्य बहुन्यूनं तदपेक्षया 'अहम्' इत्यस्य प्राधान्येन भानम्। अस्यामवस्थायां पुनः 'इदम्' इत्यंशस्य तथैव 'अस्फुटरूपेण भानं' यथा चित्रनिर्माणपूर्वं चित्रस्य चित्रकतुर्मनसि कल्पनम्। तदुक्तम् -

'तत्र प्रोन्मीलितमात्रचित्रकल्पतया इदमंशस्यास्फुटत्वात् इच्छाप्राधान्यम्'[2]।

प्रत्यभिज्ञाहृदये क्षेमराजेनोक्तं यत् - 'सदाशिवतत्त्वेऽहन्ताच्छादितास्फुटेदन्तामयं विश्वम्'।[3]

**4. ईश्वरः**

परमशिवस्य ज्ञानशक्त्याः प्राधान्ये सति 'ईश्वरतत्त्वोल्लासः'। सदाशिवतत्त्वे 'इदम्' अंशस्य स्वल्पमात्रं यत्तत्त्वं प्रोन्मीलितं तस्य ईश्वरतत्त्वे किञ्चिदधिकतरं भानमस्ति। अर्थात् सदाशिवतत्त्वे 'अहम् इदम्' इति विमर्शः तथात्र ईश्वरतत्त्वे 'इदम् अहम्' इति विमर्शः।

**5. शुद्धविद्या / शुद्ध अध्वा**

परमशिवस्य क्रियाशक्त्याः प्राधान्ये सति शुद्धविद्यातत्त्वोल्लासः। अनयैव शुद्धविद्यया पूर्ववर्तिनः शिव-शक्ति-सदाशिवेश्वराः स्वसंवेदनं कुर्वन्ति। अस्यामवस्थायां पदार्थानां पृथक्तया तथा स्वस्य च पृथक्तया ज्ञानं भवति, अर्थात् 'अहम्' इत्यस्य अङ्गीतया 'इदम्' इत्यस्य पुनः अङ्गतया पृथक्-पृथक् ज्ञानं भवति।

---

1 षट्त्रिंशत्तत्त्वसंदोहः 1/1

2 महार्थमञ्जरी

3 ष. त्रि. त. सं. वि. सदाशिववर्णनप्रसङ्गे

शुद्धविद्यापर्यन्तं शिव-शक्ति-सदाशिव-ईश्वरादीनां स्वस्य शुद्धं ज्ञानं भवति 'नाहं शरीरादि' इति। अर्थात् स्वस्वरूपस्य विपरीताध्यासः तेषां नास्ति तथा शुद्धविद्यापर्यन्तं परमेश्वरस्य स्वरूपस्य गोपनं न भवति।

**6. माया**

या स्वरूपाभिन्ने परमेश्वरे भेदमुत्पाद्य पुरुषस्य (जीवस्य) परमेश्वरतो भेदं करोति सा 'माया' वर्तते। अस्याः प्रभावेण 'परमेश्वराभिन्नोऽहं' इति ज्ञानं नोत्पद्यते पुरुषस्य।

तत्र शुद्धविद्या शुद्ध अध्वा वा पर्यन्तं शिव-शक्ति-सदाशिव-ईश्वर-शुद्धविद्यानां स्रष्टा साक्षात् परमशिवः, ततश्च परमेश्वरस्वरूपस्य न तेषु गोपनम्। मायातो क्षितिपर्यन्तानां तत्त्वानां सृष्टा भगवान् अनन्तनाथः, न तु परमशिवः साक्षात्। इत्थं भगवान् अनन्तनाथः तेषां सृष्टौ माध्यमत्वेनास्ति मूलं कारणं तु परमेश्वरः परमशिव एव।

भगवान् अनन्तनाथो मायायां क्षोभमुत्पाद्य तां पञ्चकञ्चुकेषु विभक्तां करोति। ते च कला-विद्या-राग-काल-नियतिरूपाः।

**7. कला**

जीवः वस्तुतः परमेश्वराभिन्नत्वात् अनन्तकर्तृकत्वयुक्तः, परं मायायाः कलाकञ्चुकेन तस्य सर्वकर्तृकत्वशक्तेः सङ्कोचो भवति ततश्च सीमितस्सन् सः किञ्चित्कर्तृकत्वयुक्तो जायते। अतः परमेश्वरस्य सर्वकर्तृकत्व-संङ्कोचिनीशक्तिरेव 'कला'।

**8. विद्या**

अशुद्धविद्या पर्यायान्तरं विद्याकञ्चुकस्य। यया शक्त्या परमेश्वरस्य सर्वज्ञत्वं संकुचितं सत् अल्पज्ञत्वेन परिणमति सा परमेश्वरस्य सर्वज्ञत्वसङ्कोचिनी शक्तिरेव 'विद्या'।

**9. रागः**

परमेश्वरस्य पूर्णतृप्तितत्त्वस्य सङ्कोचिनी शक्तिर्नाम 'रागः'। अनेनैव रागेण प्राणीनां भोगासक्तिः तत्साधनेन्द्रियाणां च स्थायित्वकामना च।

**10. कालः**

अयं मायाकञ्चुकः परमेश्वरस्य नित्यत्वस्य सङ्कोचं करोति। अनेनैव

जीवो भूतवर्तमानभविष्याणां क्रमासक्तो भवति। इत्थं कालकृतस्य देशकृतस्य तथैवावस्थाकृतस्य परिच्छिन्नत्वस्य कारणं कालः।

**11. नियतिः**

जीवस्य स्वातन्त्र्यस्य सर्वाधिकापहरणं नियतिकञ्चुकेन भवति, तेन सम्पूर्णेऽस्मिन् ब्रह्माण्डे कार्यकारणसम्बन्धस्य नियमनं भवति। ततश्च विशिष्टकार्यकारणभावसम्बन्धनियामिका शक्तिरेव नियतिः।

मायासहिताः पञ्चकञ्चुकाः (पूर्वोक्ताः) परमेश्वरस्य स्वरूपस्य गोपनं कुर्वन्ति।

**12. पुरुषः**

परमेश्वरो यदा पूर्वोक्तैः कञ्चुकैः संकुचितो भवति तदा पुरुषसंज्ञां लभते। इत्थं संकुचितस्य 'अहम्' इत्यस्य नाम पुरुषः।

**13. प्रकृतिः**

पुरुषस्य 'इदम्' रूपेण यस्य भानं भवति सैव प्रकृतिः। प्रत्येकस्य पुरुषस्य स्वा स्वा पृथक् प्रकृतिर्न तु सांख्यानुसारमत्र प्रकृतिः।

**14. बुद्धिः**

त्रिगुणसाम्यावस्थायां प्रकृतौ यदा गुणानां वैषम्यं तदा प्रथमतया बुद्धितत्त्वाख्यस्य प्रथमान्तःकरणस्योत्पत्तिः।

**15. अहङ्कारः**

द्वितीयान्तःकरणं यत्र 'अहमस्मि' इत्यभिमानो भवति तदहङ्कारः। अत्र य 'अहम्' सः कृत्रिमः, वस्तुतः 'पूर्णाहम्' इत्येव वास्तविकः।

**16. मनः**

नामरूपात्मकस्य वस्तुजातस्य मननशक्तिरेव मनः।

**17-26. इन्द्रियः**

अहङ्कारस्य सत्त्वांशेन ज्ञानेन्द्रियाणां (श्रोत्रत्वक्चक्षुरसनघ्राणानाम्) रजसंशेन कर्मेन्द्रियाणां (वाक्-पाणि-पाद-पायु-उपस्थानाम्) समुत्पत्तिः।

**27-31. पञ्चतन्मात्राणि**

अहङ्कारस्य तामसंशेन शब्द-स्पर्श-रूप-रस-गन्धानां पञ्चतन्मात्राणां समुत्पत्तिः।

**32-36. पञ्चमहाभूतः**

पञ्चतन्मात्राभिः क्रमेण आकाश-वायु-तेजो-जल-पृथिवीनां पञ्चमहाभूतानां समुत्पत्तिः।

एतेषांषट्त्रिंशत्तत्त्वानां पुनः त्रिधा विभागोऽस्ति -

1. आत्मतत्त्वानि - मायातः पृथिवीं यावत्।

2. विद्यातत्त्वानि - सदाशिवतः शुद्धविद्यां यावत्। (सदाशिवः, ईश्वरः, शुद्धविद्या)।

3. शिवतत्त्वानि - शक्तिशिवौ।

**बन्धनम्**

शैवदर्शनानुसारेण सर्वं शिवमयमस्ति। विद्याविद्याद्वैताद्वैतबन्धमोक्षाणां कल्पना च व्यावहारिकी। सर्वं शिवस्य स्वातन्त्र्यस्य विलासमात्रम्। तस्य विलासस्य भागद्वयं, पूर्वोत्तरपक्षरूपम्। द्वन्द्वस्तस्य पूर्वपक्षः फलतो बन्धनं पूर्वपक्षः। मोक्षस्तस्योत्तरपक्षः तदुक्तम् -

**पूर्वपक्षतया येन विश्वमाभास्य भेदतः।**
**अभेदोत्तरपक्षान्तर्नीयते तं स्तुमः शिवम्॥**[1]

अज्ञानमेव बन्धः शैवदर्शनानुसारम्। ज्ञानविरोधि नास्त्यत्र 'अज्ञानम्' प्रत्युत ज्ञानसङ्कोच एव तदज्ञानम्।

**मोक्षः**

काश्मीरशैवदर्शनानुसारेण स्वस्वरूपस्य ज्ञानमेव मोक्षः तदुक्तं तन्त्रालोके-

**'मोक्षो हि नाम नैवान्यः स्वरूपप्रथनं हि तत्'।**[2]

शुद्धो यदा 'अहं विमर्शः' समुदेति (सर्वं शिवमयमितिरूपम्) तदा मोक्षः। अस्य दर्शनशास्त्रस्याधिकारी सर्वलोको यस्य मनसि वास्तविकी श्रद्धा तदुक्तमभिनवगुप्तपादाचार्येण 'यस्य कस्य जन्तोरिति नात्र जात्याद्यपेक्षा काचित्'।[3]

---

1 प्र. हृदये क्षेमराजः

2 ई. प्र. वि. 1/2/1

3 तन्त्रालोकः 1

तन्त्रालोके स्वयं शिवेनोक्तम् –

**न मे प्रियश्चतुर्वेदो मद्भक्तः श्वपचोऽपि वा।**
**तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम्।।**[1]

सम्प्रति संक्षेपेण शैवदर्शनस्य तात्पर्यं सिद्धान्तो वा प्रतिपाद्यते। सम्पूर्णेषु पदार्थेषु शिवतत्त्वस्य भावोऽस्ति शिवतत्त्वं हि सर्वत्र स्फुरदस्ति तदुक्तम्–

**आत्मैव सर्वभावेषु स्फुरन् निर्वृतचिद्विभुः।**
**अनिरुद्धेच्छाप्रसरः प्रसरद्दृक्क्रियः शिवः।।**[2]

यत्र तस्य शक्तित्रयं (इच्छा–ज्ञान–क्रियारूपं) समरसावस्थायां वर्तते, सोऽस्य निर्विभागा, परा, विश्वोत्तीर्णरूपा वावस्था।

**स यदास्ते चिदाह्लादमात्रानुभवतल्लयः।**
**तदिच्छा तावती तावज्ज्ञानं तावत्क्रिया हि सा।।**
**सुसूक्ष्मशक्तित्रितयसामरस्येन वर्तते।**
**चिद्रूपाह्लादपरमो निर्विभागः परस्तदा।।**[3]

क्रीडावशात् कदाचित् सः स्वस्वरूपप्रच्छादनात्मिकां मायां समवलम्ब्यषट्त्रिंशत्तत्त्वानि समुल्लासयति। तदुक्तम्–

**आत्मप्रच्छादनक्रीडां कुर्वतो वा कथञ्चन।**
**मायारूपमितीत्यादिषट्त्रिंशत्तत्त्वरूपताम्।।**[4]

किमर्थं परमेश्वरो जगदादिं समुद्भावयति किमस्य प्रयोजनं तदा वक्ति सोमानन्दः शिवदृष्टिग्रन्थे यत् क्रीडार्थं परमेश्वरः सर्वमुल्लासयति यथा सर्वैश्वर्यसम्पन्नः कश्चन नृपः स्वानन्देन कदाचित् गजतुरङ्गादिं त्यक्त्वा पादाभ्यामेव विहारार्थं गच्छति तथैव सर्वसमर्थोऽयं परमेश्वरः स्वानन्दातिरेकेण क्रीडार्थं सर्वं वस्तुजातं सर्जयति तदुक्तम् –

1 ई. प्र. वि. 4/1/18
2 तन्त्रालोकः
3 श्लो. 2 शिवदृष्टिः प्रथमाह्निकम्
4 श्लो. 3–4 शिवदृष्टिः प्रथमाह्निकम्

**क्रीडया दुःखवेद्यानि कर्मकारीणि तत्फलैः।**
**संभत्स्यमानानि तथा नरकार्णवगह्वरे॥**[1]
**निवासीनि शरीराणि गृह्णाति परमेश्वरः।**
**यथा नृपः सार्वभौमः प्रभावामोदभावितः॥**
**क्रीडन् करोति पादातधर्मांस्तद्धर्मधर्मतः।**
**तथा प्रभुः प्रमोदात्मा क्रीडत्येवं तथा तथा॥**
**इत्थं शिवो बोधमयः स एव परनिर्वृतिः।**
**सैव चोन्मुखतां याति सेच्छाज्ञानक्रियात्मनाम्॥**
**सैव शाक्तशरीरादिनारकान्तं हि भूतता।**
**प्रसूयते स्वचिद्रूपप्रमुखं पार्थिवान्तकम्॥**
**पदार्थत्वेन भगवान् सर्वत्रैव तदात्मता।**
**स्वशिवत्वमिवाजानन् पश्वात्मव्यपदेशतः॥**[2]

यथा योगिनामिच्छयैव बहुविधस्य गृहभोजनादिवस्तुजातस्योत्पत्तिः तथैव परमेश्वरस्यापि मृदादिं विनैव निजेच्छयैव जगदाद्युत्पत्तिः, तदुक्तम्–

**योगिनामिच्छया यद्वन्नानारूपोपपत्तिता।**
**न चास्ति साधनं किञ्चिन्मृदादीच्छां विना प्रभोः॥**[3]

तथा सर्वेषु पदार्थेषु शिवसत्तास्त्येव भेदस्तु जीवस्य (पुरुषस्य) स्वबुद्ध्यारोपितः। वस्तुतः सर्वं शिवमयमस्ति सर्वत्र समानरूपेण शिवत्वमस्ति। तदुक्तम्–

**एवं सर्वपदार्थानां समैव शिवता स्थिता।**
**परापरादिभेदोऽत्र श्रद्धानैरूदाहृतः॥**[4]

शैवदर्शनानुसारं जगत् जडं नास्ति कारणं परमेश्वरस्येच्छारूपं हि तदस्ति तथा समुद्रस्य तस्य वीचिभिर्यथा भेदाभावस्तथा शिवस्य वस्तुजातेनापि। जलं यदा वीचिरूपं तिष्ठति तदा वीचिरेव कथ्यते परं तत्रापि वीचिषु जलं

1 तत्रैव श्लो. 32
2 तत्रैव श्लो. 36
3 श्लो. 37-41 शिवदृष्टिः प्रथमाह्निकम्
4 तत्रैव श्लो. 44

न व्यभिचरति। अर्थात् जलं तु वर्तते परं चञ्चलरूपं वीचिषु चलरूपञ्च समुद्रे तथैव स्थिरावस्थायां विश्वोत्तीर्णावस्थायां वा स्थिररूपेण 'परमशिव' इति कथ्यते तथा यदा विश्वमयावस्थायां पृथ्व्यादिभेदेन परमेश्वर तिष्ठति तदा तत्तन्नामभाक् सो भवति तथा विश्वमये रूपेऽपि पशुपक्षिमृगादिष्वपि शिवत्वमस्त्येव। तदुक्तम्–

**भावैर्नास्ति विभेदित्वमथवाम्बुधिवीचिवत्।**
**तत्र वीचित्वमापन्नं न जलं जलमुच्यते॥**
**न च तत्राम्बुरूपस्य वीचिकाले विनाशिता।**
**निश्चलत्वेऽपि हि जलं वीचित्वे जलमेव तत्॥**
**वीचिभिस्तद् विशिष्टं चेत्तन्नैश्चल्यविशिष्टकम्।**
**अत एव परेच्छातो न जडत्वमवस्थितम्॥**[1]

व्यवहारस्य कृते परापरादिभेदव्यवस्था वस्तुत एकैव हि सः। तदुक्तम् –

**न स्वरूपविभागोऽत्र स्वरूपे तत्स्वरूपता।**
**परापरादिभेदोऽत्र व्यवहाराय कल्पितम्॥**[2]

शिवस्वरूपस्य ज्ञानं किमर्थमावश्यकं किम्वा स्वस्वरूपज्ञानेन तर्हि समादधाति सोमानन्दः शिवदृष्ट्यां यत् चिन्तामणिः यस्मिन् काले चिन्तामणित्वेन ज्ञातो नास्ति तथापि चिन्तामणिरेव सः, परं यदा तस्य स्वरूपस्य तच्छक्त्याश्च ज्ञानं तदानीमेव स्वप्रभावं दर्शितुं स अलं नान्यथा तथैव परमेश्वरोऽपि ज्ञातः सन् पुरुषस्या द्वितीयं स्वरूपाभिन्नमानन्दं जनयति। तदुक्तम्–

**चिन्तामणिरविज्ञातो भवेच्चिन्तामणिः स्फुटम्।**
**तथापि कार्यभोगार्थं स ज्ञातः केन वार्यते॥**[3]

तथा च–

**एकवारं प्रमाणेन शास्त्राद्वा गुरुवाक्यतः।**

---

1 श्लो. 48 शिवदृष्टिः प्रथमाह्निकम्
2 तत्रैव तृतीयाह्निकम् श्लो. 37-39
3 तत्रैव श्लो. 47

**ज्ञाते शिवत्वे सर्वस्थे प्रतिपत्त्या दृढात्मना।**
**करणेन नास्ति कृत्यं क्वापि भावनयाऽपि वा।।**[1]

अत्र सोमानन्देनोक्तं यत् 'पूर्वमज्ञातचिन्तामणिस्तु ज्ञातस्सन् कार्यभोगार्थं कल्पते परं पूर्वमज्ञातं शिवत्वं गुरोरूपदेशेन शास्त्रात् वा पश्चात् ज्ञातं सत् कस्मैचिदपि कार्याय न कल्पते कारणं स्वरूपज्ञानानन्तरं किमपि कृत्यं नावशिष्टं भवति।' तथापि विशेषतो यदा ज्ञातं भवति सा काचिदन्यैवावस्था।

तेन तस्य ज्ञानार्थं साधनं विशेषतो वक्तव्यं कारणं वह्निः तत्प्रकाशश्च विज्ञात एव जनानां तथापि युक्त्या यदा दीपे द्वीपद्वारा वा वह्निर्योज्यते तदानीमेव नितरां प्रकाशः न तथा वह्निराशिना। तदुक्तम् –

**तस्माच्छिवेऽप्यविज्ञाते ज्ञाते वा शिव एव ते।**
**सर्वमेवात एवैतद्भावनाकरणाच्च्युतम्।।**
**विज्ञातं जायते पुंसां यद्यप्येवमवस्थितम्।**
**तथापि चित्रकर्मार्थमुपायो वाच्य आदरात्।।**
**तज्ज्ञानस्फुटताहेतोः चिन्तारत्नसुवर्णवत्।**
**वह्निर्यद्यपि विज्ञातः प्रकाशादि करोत्यसौ।।**
**तथापि योजितो युक्त्या प्रकाशमधिकं गृहे।**
**दीपेनान्यतमेनापि न तथा वह्निराशिना।।**[2]

तदित्थं संक्षेपेणात्र काश्मीरशैवदर्शनस्य किञ्चित्परिचयो ध्वनिस्थापने नितरामपेक्षितत्त्वात् प्रस्तुतः।

सम्प्रति ध्वनिस्थापने काश्मीरशैवदर्शनस्य कथमवदानमिति प्रस्तूयते। ध्वनिकारेण हि तृतीयोद्योते व्यञ्जनायाः स्थापनावसरे वाच्यव्यङ्ग्ययोर्घट-प्रदीपन्यायः स्वीकृतः। अर्थात् यथा प्रदीपः स्वयं प्रकाशयन् घटादिकं प्रकाशयति तथैव वाच्यार्थोऽपि स्वयं प्रकाशयन् व्यङ्ग्यार्थं प्रकाशयति तथा घटप्रकाशकाले यथा प्रदीपप्रकाशो न निवर्तते तथैव व्यङ्ग्यप्रतीत्यवसरेऽपि वाच्यार्थो दूरं न भवति। वाच्यव्यङ्ग्ययोः प्रतीतिरविनाभावेन भवति। तदुक्तं ध्वनिकृता–

1 श्लो. 4 शिवदृष्टिः सप्तमाह्निकम्
2 तत्रैव श्लो. 6

"तस्माद् घटप्रदीपन्यायस्तयोः। यथैव हि प्रदीपद्वारेण घटप्रतीतावुत्पन्नायां न प्रदीपप्रकाशो निवर्तते तद्वद्व्यङ्ग्यप्रतीतौ वाच्यावभासः।"[1]

तथा च –

"न हि व्यङ्ग्ये प्रतीयमाने वाच्यबुद्धिर्दूरी भवति, वाच्यावभासा-विनाभावेन तस्य प्रकाशनात्।"[2]

शैवदर्शन एव प्रकृतस्य घटप्रदीपन्यायस्य रहस्यं बीजं वा निहितं कारणं शैवदर्शनेऽपि परमशिवः स्वयं प्रकाशयन् षट्त्रिंशत्पदार्थान् प्रकाशयति, तदुक्तम्–

**आत्मैव सर्वभावेषु स्फुरन् निर्वृतचिद्विभुः।**
**अनिरुद्धेच्छाप्रसरः प्रसरद्दृक्क्रियः शिवः॥**[3]

स्वस्वातन्त्र्यवशात् परमशिवानन्दातिरेकात् सर्वं नरकब्रह्माण्डादि-वस्तुजातं क्रीडया समुद्भावयति तन्निवासिनश्च स्वात्मतया धारयन् स तिष्ठति यथा सर्वैश्वर्यसम्पन्नोऽपि कश्चन नृपो गजतुरगादिं त्यक्त्या स्वानन्दे कदाचिद् भ्रमणार्थं पादाभ्यां गच्छति तथैव सर्वसमर्थोऽप्यसौ परमेश्वरः स्वक्रीडार्थं वस्तुजातमुद्भाव्य स्वयञ्च तत्र प्रकाशते। तदुक्तं शिवदृष्ट्याम्–

**क्रीडया दुःखवेद्यानि कर्मकारीणि तत्फलैः।**
**सम्भत्स्यमानानि तथा नरकार्णवगह्वरे॥**
**निवासीनि शरीराणि गृह्णाति परमेश्वरः।**
**यथा नृपः सार्वभौमः प्रभावामोदभावितः॥**[4]
**क्रीडन् करोति पादातधर्मांस्तद्धर्मधर्मतः।**
**तथा प्रभुः प्रमोदात्मा क्रीडत्येवं तथा तथा॥**[5]

परमेश्वरः विश्वोत्तीर्णरूपं परित्यज्य यदा विश्वमयरूपे स्वमायाम-वलम्ब्य वस्तुजातं समुल्लासयति तदा क्षितिपर्यन्तेषु षट्त्रिंशत्पदार्थेषु स्वयमपि प्रकाशते तदुक्तम् –

1 श्लो. 8-11 शिवदृष्टिः सप्तमाह्निकम्
2 का. 33 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः
3 का. 33 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः
4 श्लो. 2 शिवदृष्टिः प्रथमाह्निकम्
5 38-39 श्लो. शिवदृष्टिः प्रथमाह्निकम्

**इत्थं शिवो बोधमयः स एव परनिर्वृतिः।**
**सैव चोन्मुखतां याति सेच्छाज्ञानक्रियात्मताम्॥**
**सैव शाक्तशरीरादिनारकान्तं हि भूतता।**
**प्रसूयते स्वचिद्रूपप्रमुखं पार्थिवान्तकम्॥**[1]

तथा सर्वपदार्थेषु समानरूपेण शिवतास्ति भेदादिस्तु जीवबुद्ध्यारोपितः। तदुक्तम्–

**एवं सर्वपदार्थानां समैव शिवता स्थिता।**
**परापरादिभेदोऽत्र श्रद्धधानैरुदाहृतः॥**[2]

तदित्थं साक्षात् काश्मीरशैवदर्शनसिद्धान्तानां प्रभावो वाच्यव्यङ्ग्योः सम्बन्धनिर्णयावसरे दृश्यते। घटप्रदीपन्यायस्य मूलं ध्वनिकारेण काश्मीरशैवदर्शने प्राप्तं यतो हि सोऽपि महान् शैवाचार्यः शैवदार्शनिको वा बभूव तथा तस्मिन् काल एव काश्मीरशैवदर्शनं स्वस्य प्रौढावस्थायामासीत्। तस्य प्रभावोऽपि तेषां ध्वनिकारादीनां कृतिषु नितरां परिलक्ष्यते। यथा ध्वन्यालोके प्रथमोद्योते 'प्रत्यभिज्ञा' इति पदस्य, तदुपरि लोचनव्याख्यानञ्च संक्षेपेण सम्पूर्णस्य शैवसिद्धान्तस्य सारं निवेदयति। तद्यथा ध्वनिकृतोक्तं यत् 'स व्यङ्ग्यार्थ अस्ति तस्य बोधकश्च सामर्थ्ययोगी कश्चन शब्दविशेषो न तु शब्दमात्रं (यथा कुत्सितार्थप्रतीतौ 'कपालीशब्दः' वीरतायां तु 'पिनाकीशब्दः') ततश्च तस्य व्यङ्ग्यार्थस्य तद्बोधकविशेषस्य च 'प्रत्यभिज्ञा' करणीया। तदुक्तम् –

**सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।**
**यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः॥**[3]

अत्र प्रत्यभिज्ञापदस्य 'तत्तेदन्तावगाहिनी प्रतीतिः प्रत्यभिज्ञा' इत्येवार्थो नास्ति कारणं प्रत्यभिज्ञापदस्य बहुविशिष्टः प्रयोगः शैवदर्शने तथा प्रत्यभिज्ञा-पदमवलम्ब्य बहूनि शैवशास्त्राणि प्रणितानि यथा –

ईश्वरप्रत्यभिज्ञा (उत्पलाचार्यस्य, अभिनवगुप्तस्य गुरुः) ईश्वरप्रत्य-भिज्ञाविवृतिविमर्शिनी, (अभिनवगुप्तस्य) प्रत्यभिज्ञाहृदयम् (क्षेमराजस्य, अभिनवगुप्तस्य शिष्यः)।

---

1 श्लो. 40 शिवदृष्टिः प्रथमाह्निकम्

2 तत्रैव श्लोकः 39–40

3 तत्रैव श्लोकः 48

'ज्ञातस्यापि विशेषतो निरूपणमनुसन्धानात्मकमत्र प्रत्यभिज्ञानं न तु तदेवेदमित्येतावन्मात्रम्'।[1] इति लोचने।

शैवाचार्याः कथयन्ति 'ज्ञातस्यापि विशेषज्ञानमेव प्रत्यभिज्ञानम्' यथा चिन्तामणिरविज्ञातोऽपि चिन्तामणिरेव भवति, न रूपान्तरं तस्य न वा काचिद् हानिरपि तथापि सः चमत्कर्तुं नालं तदा, परं यदा तस्य चिन्तामणित्वेन ज्ञानं तदा तु सः सर्वथा चमत्कर्तुं प्रभवति तदुक्तम् –

**चिन्तामणिरविज्ञातो भवेच्चिन्तामणिः स्फुटम्।**
**तथापि कार्यभोगार्थं स ज्ञातः केन वार्यते।।**[2]

तथैव परमेश्वरोऽपि यावत् ज्ञातो न भवति तावत् न कापि हानिस्तस्य परं पुरुषस्य यस्मिन् काले स्वस्वरूपाभिन्नस्य परमेश्वरस्य ज्ञानं तस्याः खल्ववस्थायाः किं वक्तव्यं विलक्षणैव काप्यवस्था सा। ततश्च तत्स्वरूपं प्रमाणेन गुरुवाक्यतः शास्त्राद्वा वक्तव्यमेव कारणं वह्नेः तत्प्रकाशस्य च ज्ञानं सर्वेषां भवत्येव तथापि युक्तिपूर्वकं प्रदीपेन यदा वह्नियोजनं क्रियते तदानीमेवाधिकप्रकाशः न तथा वह्निराशिना तदुक्तम् –

**एकवारं प्रमाणेन शास्त्राद्वा गुरुवाक्यतः।**
**ज्ञाते शिवत्वे सर्वस्थे प्रतिपत्त्या दृढात्मना।**
**करणेन नास्ति कृत्यं क्वापि भावनयाऽपि वा।।**[3]

तथा च–

**विज्ञातं जायते पुंसां यद्यप्येवमवस्थितम्।**
**तथापि चित्रकर्मार्थमुपायो वाच्य आदरात्।।**
**तज्ज्ञानस्फुटताहेतोः चिन्तारत्नसुवर्णवत्।**
**वह्निर्यद्यपि विज्ञातः प्रकाशादि करोत्यसौ।।**
**तथापि योजितो युक्त्या प्रकाशमधिकं गृहे।**
**दीपेनान्यतमेनापि न तथा वह्निराशिना।।**[4]

---

1 ध्वन्यालोकः प्रथमोद्योत का. 8

2 का. 8 व्याख्याने लोचने प्रथमोद्योतः ध्वन्यालोकः

3 शिवदृष्टिः सप्तमाह्निकम् श्लो. 4

4 तत्रैव श्लो. 6

लोचनकारश्च तत्र व्याचष्टे यत् 'काव्यं तु जातु जायेत कस्यचित्प्रतिभावतः।'

इति नयेन यद्यपि स्वयमस्यैतत्परिस्फुरति तथापीदमित्थमिति विशेषतो निरूप्यमाणं सहस्रशाखी भवति। यथोक्तमस्मत्परमगुरुभिः श्रीमदुत्पलपादैः–

**तैस्तैरप्युपयाचितैरूपनतस्तन्व्याः स्थितोऽप्यन्तिके**
**कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं यथा।**
**लोकस्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो**
**नैवालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता॥**

तेन ज्ञातस्यापि विशेषतो निरूपणमनुसन्धानात्मकमत्र प्रत्यभिज्ञानं, न तु तदेवेदमित्येतावन्मात्रम्।[1]

मम्मटाचार्यस्य काव्यप्रकाशेऽपि 'परामृशति' 'नियतिकृत-नियमरहिताम्' इत्यादिवचनैः शैवदर्शनसम्बद्धानां सिद्धान्तानां निर्देशो भवति, विस्तरान्नात्र तेषां विवेचनं क्रियते तथापि 'नियति' इति पदस्य तदर्थस्य च प्रतिपादनं पूर्वं मायायाः पञ्चकञ्चुकवर्णनावसरे षट्त्रिंशत्तत्त्वानां संक्षिप्तपरिचयावसरेऽस्मिन्नेवाध्यायारम्भे कृतमेव।

प्रकृतमनुसरामः तदित्थं शैवदर्शनानुप्राणितो घटप्रदीपन्यायस्तावत् तृतीयोद्योते ध्वनिकृता स्वीकृतः। तत्पूर्वं ध्वनिकृता पदार्थवाक्यार्थन्यायवादीनां कुमारिलभट्टादीनां पदार्थवाक्यार्थन्यायः सयुक्तिकं खण्डितः।

संक्षेपेणात्र खण्डनस्य सारो लिख्यते। कुमारिलभट्टेन श्लोकवार्तिकग्रन्थे वाक्याधिकरणे भणितं यत् –

**वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।**
**पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥**

अर्थात् वाक्यार्थज्ञाने तेषां पदानामर्थज्ञानं नान्तरीयकं (अविनाभावान्वित-रामपेक्षितम्) यथा पाके काष्ठानां ज्वालारूपो व्यापारो ज्वालानान्तरीयकः। अत्र कारणं पदज्ञानं तदर्थज्ञानञ्च व्यापारो वाक्यार्थज्ञानञ्च फलम्, करणस्य फलवत्त्वस्य नियमात्। यथा काष्ठं कारणं ज्वाला व्यापारः पाकश्च फलम्। यदा पर्यन्तं काष्ठेषु ज्वालारूपमवान्तरव्यापारो नास्ति न तदानीं यावत्

---
1 श्लो. 9-11 शिवदृष्टिः सप्तमाह्निकम्

पाकः। अतः पाकार्थं ज्वाला नान्तरीयकमुपायमात्रं तथैव पदेष्वपि पदार्थज्ञानमवान्तरव्यापारो वाक्यार्थज्ञानञ्च फलम्। अतः साधनमात्रं पदार्थज्ञानं वाक्यार्थज्ञाने।

तथा 'यत्परः शब्दः स शब्दार्थः' अर्थात् यस्य प्रयोजनस्य कृते शब्दोच्चार्यते स एव शब्दस्यार्थः, तस्य कृते किमर्थं व्यापारान्तरं व्यञ्जनारूपं स्वीकरणीयं, तत्राभिधावृत्तिरेव तात्पर्यविषयीभूतमर्थं बोधयति। तेन यत्र वाच्यव्यतिरिक्तस्यार्थस्य प्रतीतिः तस्य 'वाच्यार्थ' इत्येव व्यपदेशो युक्तः तथा यदा वाच्यव्यतिरिक्तस्यार्थस्य प्राधान्यं तदा न तस्य 'ध्वनित्वेन व्यपदेशः' कारणं तत्परत्वाद् वाक्यस्य, अर्थात् प्रधानरूपेणावस्थितस्य तस्यार्थस्य बोधाय एव शब्दोच्चरितः यावत् पर्यन्तं तात्पर्यविषयीभूतस्यार्थस्य ज्ञानं न भवति तावत् नाभिधा विरमति कारणं तत्परत्वाद् वाक्यस्य प्रधानार्थपरत्वात् तात्पर्यार्थपरत्वाद् वाक्यस्य तथा मध्ये यस्यार्थस्य प्रतीतिः तदुपायमात्रं तस्य वाक्यार्थस्य। अतः वाक्यार्थप्रकाशकस्य वाक्यस्य वाचकत्वमेव (अभिधा एव) व्यापारः किमर्थं व्यञ्जना स्वीकरणीया। तात्पर्यविषयीभूतो योऽर्थः स मुख्यत्वाद् वाच्यः तथा मध्ये यस्यार्थान्तरस्य प्रतीतिः सा तत्प्रतीतेः (मुख्यार्थप्रतीतेः, वाच्यार्थप्रतीतेः) साधनमात्रम्। प्रभाकरश्च 'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिध ाव्यापार' इति मनुते, वैय्याकरणाश्च तदित्थमेव पदार्थवाक्यार्थन्यायं मन्वते।

अन्विताभिधानवादिनः प्रभाकरप्रभृतयो दीर्घ-दीर्घव्यापारे मध्यवर्तिनां पदार्थां निमित्तत्त्वं स्वीकुर्वन्ति तथैव वैय्याकरणाश्च प्रधानभूतं वाक्यस्फोटं स्वीकुर्वन्ति तद् बोधकं वर्णपदादिकं मन्वते, तेषामपि मते पद-पदार्थानां निमित्तत्त्वमात्रं भेदस्त्वयमेव प्रभाकरादीनां निमित्तभावः पारमार्थिकः, वैय्याकरणानां तु न तत्पारमार्थिकः तदुक्तं नागेशेन-

'तत्र वाक्यस्फोटो मुख्यः, तस्यैव लोकेऽर्थबोधकत्वात्तेनैवार्थ-समाप्तेश्चेति। तदाह न्यायभाष्यकारः 'पदसमूहो वाक्यमर्थसमाप्तौ' इति। अस्य समर्थमिति शेषः। तत्र प्रतिवाक्यं सङ्केतग्रहासम्भवाद् वाक्यान्वाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया पदानि प्रविभज्य पदे प्रकृतिप्रत्ययभागान् प्रविभज्य कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं परिकल्पयन्ति स्माचार्याः।'[1]

---
2        का. 8 व्याख्याने लोचने प्र. उ. ध्व. लो.

तथाग्रे वदति 'उपसर्गनिपातधात्वादिविभागोऽपि काल्पनिकः। स्थानिनो लादय आदेशास्तिबादयः कल्पिता एव। तत्र ऋषिभिः स्थानिनां कल्पिता अर्थाः कण्ठरवेणैवोक्ताः। आदेशानां तु स्थान्यर्थाभिधानसमर्थस्यैवादेशतेति भाष्यात्तेऽर्थाः। एवञ्च स्थानिनां वाचकत्वमादेशानां वेति विचारो निष्फल एव। कल्पितवाचकत्वस्योभयत्र सत्त्वात्। मुख्यं वाचकत्वन्तु कल्पनया बोधितसमुदायरूपे पदे वाक्ये वा, लोकानां तत एवार्थबोधात्।

**उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः।**[1]

इत्थं पदार्थवाक्यार्थन्यायवादीनां कुमारिल-प्रभाकर-वैय्याकरणानां मते वाच्यव्यतिरिक्तस्यार्थस्य ज्ञानाय न व्यञ्जनाव्यापारस्य कल्पना करणीया पदार्थवाक्यार्थन्यायेन गतार्थत्वात् तस्य, यथा पाकाय काष्ठेषु ज्वालारूपमवान्तर-व्यापारस्तथा वाक्यार्थे पदेषु पदार्थज्ञानरूपमवान्तरव्यापारः। तथा यत्र वाच्येन सह वाच्यव्यतिरिक्तस्यार्थस्य प्राधान्येनावभासो न तस्य व्यङ्ग्यो ध्वनिर्वा व्यपदेशो युक्तः प्रत्युत तत्परत्वाद् वाक्यस्य तस्य वाच्य एव व्यपदेशः करणीयः कारणं यस्मिन् तात्पर्यं तदेव शब्दार्थः (यत्परः शब्दः स शब्दार्थः) तत्र च तस्यैव कृते शब्दोच्चारितः तथा मध्ये यस्यार्थस्य प्रतीतिः सा तस्य वाच्यव्यतिरिक्तस्यार्थश्च प्रतीतेरूपायमात्रम्। यथा पाकार्थं ज्वालाया उपायमात्रम्।

अयमेव पदार्थवाक्यार्थन्यायवादीनां तात्पर्यं तदुक्तं ध्वन्यालोके लोचने च, क्रमशः तत्प्रदर्श्यते -

ध्वनिकृतोक्तं व्यञ्जनास्थापनावसरे यत् -

(पूर्वपक्षः - कुमारिलप्रभाकरवैय्याकरणादीनाम्)

'प्रागुक्तयुक्तिभिर्वाच्यव्यतिरिक्तस्य वस्तुनः सिद्धि कृता, स त्वर्थो व्यङ्ग्यतयैव कस्माद् व्यपदिश्यते? यत्र च प्राधान्येनावस्थानं तत्र वाच्यतयैवासौ व्यपदेष्टुं युक्तः। तत्परत्वाद् वाक्यस्य। अतश्च तत्प्रकाशिनो वाक्यस्य वाचकत्वमेव व्यापारः किन्तस्य व्यापारान्तरकल्पनया? तस्मात् तात्पर्यविषयो योऽर्थः स तावन्मुख्यतया वाच्यः। या त्वन्तरा तथाविधे विषये वाच्यान्तरप्रतीतिः सा तत्प्रतीतेरूपायमात्रम्, पदार्थप्रतीतिरिव वाक्यार्थप्रतीतेः।'[2]

1 शक्तिनिरूपणे नागेशः परमलघुमञ्जूषायाम्
2 तत्रैव

लोचनकारोऽत्र ध्वनिकारस्य तात्पर्यं सप्रमाणं निवेदयन् ब्रवीति यत्–

'उद्योतारम्भे यदुक्तं व्यञ्जनमुखेन ध्वनेः स्वरूपं प्रतिपाद्यत इति तदिदानीमुपसंहरन् व्यञ्जकभावं प्रथमोद्योते समर्थितमपि शिष्याणामेकप्रघट्टेन हृदि निवेशयितुं पूर्वपक्षमाह कैश्चिदिति – मीमांसकादिः। स त्विति – अस्त्वसौ द्वितीयोऽर्थः तस्य यदि व्यङ्ग्य इति नाम कृतम्, वाच्य इत्यपि कस्मान्न क्रियते? व्यङ्ग्य इति वाच्याभिमतस्यापि कस्मान्न क्रियते? अवगम्यमानत्वेन हि शब्दार्थत्वं तदेव वाचकत्वम्। अभिधा हि यत्पर्यन्ता तत्रैवाभिधायकत्वमुचितम्, तत्पर्यन्तता च प्रधानीभूते तस्मिन्नर्थे इति मूर्धाभिषिक्तं ध्वनेर्यद्रूपं निरूपितं तत्रैवाभिधाव्यापारेण भवितुं युक्तम्। तदात्र यत्र चेति। तत्प्रकाशिता इति। तद्व्यङ्ग्याभिमतं प्रकाशयत्यवश्यं तद्वाक्यं तस्य।

उपायमात्रमित्यनेन साधारण्योक्त्या भाट्टं प्राभाकरं वैयाकरणञ्च पूर्वपक्षं सूचयति। भाट्टमते हि –

**वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।**
**पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥**

इति शब्दावगतैः पदार्थैस्तात्पर्येण योऽर्थ उत्थाप्यते स एव वाक्यार्थः। स एव च वाच्य इति। प्राभाकरदर्शनेऽपि दीर्घदीर्घो व्यापारो निमित्तिनि वाक्यार्थे पदार्थानान्तु निमित्तभावः पारमार्थिक एव। वैयाकरणानान्तु सोऽपारमार्थिक इति विशेषः। एतच्चास्माभिः प्रथमोद्योत एव वितत्य निर्णीतमिति न पुनरायस्यते ग्रन्थयोजनैव तु क्रियते। तदेतन्मतत्रयं पूर्वपक्षे योज्यम्।'[1]

अस्य पदार्थवाक्यार्थन्यायस्य खण्डनात् पूर्वं ध्वनिकारः सुयक्तिकं वाच्यार्थबोधाय 'अभिधायाः' व्यङ्ग्यबोधाय 'व्यञ्जनायाश्च' नितरामावश्यकतां साधयति। ध्वनिकारो ब्रवीति 'यत्र शब्दः स्वार्थं बोधयन् (वाच्यार्थं) अर्थान्तरं (व्यङ्ग्यं) बोधयति न तत्र पदार्थवाक्यार्थन्यायः कारणं तत्र तयोर्वाच्यव्यङ्ग्ययोः पृथक् पृथक् शक्तिः वाच्यार्थबोधे 'अभिधा' व्यङ्ग्यार्थ-बोधे च 'व्यञ्जना'। तथा तयोः शक्त्योर्विषयभेदः स्वरूपभेदश्च वर्तते।

1 का. 33 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः

विषयभेदो यतो वाच्यविषयिणी तावदभिधा व्यङ्ग्यविषयिणी च व्यञ्जना। यथा 'गङ्गायां घोषः' इत्यत्र गङ्गापदस्य जलप्रवाहरूपो योऽर्थः स तावद-भिधाया विषयः तथा शैत्यपावनत्वरूपार्थो व्यञ्जनायाः। इत्थं तयोः शक्त्योर्विषयभेदः। स्वरूपभेदश्चास्ति तयोः कारणं याभिधाशक्तिः सैव व्यञ्जना नास्ति। अर्थात् वाच्यार्थस्थले भवत्यभिधा परं यत्र वाच्यार्थोऽपि नास्ति 'गीतादिषु' तत्रापि रसरूपव्यङ्ग्यार्थो भवत्येव किञ्च यत्र शब्दोऽपि नास्ति तत्रापि 'व्रीडायोगान्नतवदनया'[1] इत्यादिश्लोके चेष्टामात्रेणापि रसादिरूपव्यङ्ग्यार्थस्य दर्शनात् व्यञ्जनायाः स्वरूपभेदोऽभिधातोऽस्ति।

इत्थं भिन्नविषयत्वात् भिन्नरूपत्वाच्च तयोः शक्त्योर्नात्र पदार्थवाक्यार्थ-न्यायः। तदुक्तम् -

'तौ द्वौ व्यापारौ भिन्नविषयौ भिन्नरूपौ च प्रतीयेते एव। तथाहि वाचकत्वलक्षणो व्यापारः शब्दस्य स्वार्थविषयः गमकत्वलक्षणन्तु अर्थान्तरविषयः। .... तस्मात् विषयभेदस्तावत् तयोर्व्यापारयोः सुप्रसिद्धः।[2] तथा -

'रूपभेदोऽपि प्रसिद्ध एव। न हि यैवाभिधानशक्तिः सैवागमनशक्तिः। अवाचकस्यापि गीतशब्दादे रसादिलक्षणार्थावगमदर्शनात्। अशब्दस्यापि चेष्टादेरर्थविशेषप्रकाशनप्रसिद्धेः। तथाहि 'व्रीडायोगान्नतवदनया' इत्यादि श्लोके चेष्टाविशेषः सुकविनार्थप्रकाशनहेतुः प्रदर्शित एव। तस्माद् भिन्नविषयत्वाद् भिन्नरूपत्वाच्च स्वार्थाभिधायित्वमर्थान्तरावगमहेतुत्वञ्च शब्दस्य यत् तयोः स्पष्ट एव भेदः।[3]

पदार्थवाक्यार्थन्यायवादीनां मुखमुद्रणाय वाच्यव्यङ्ग्यार्थयोर्बोधाय 'भिन्नविषयत्वात्' 'भिन्नरूपत्वाच्च' अभिधाव्यञ्जने स्वीकर्तव्ये, सामान्यरूपेणै-तदुक्त्वा सम्प्रति विशेषतः तत्खण्डनाय (पदार्थवाक्यार्थन्यायखण्डनाय)

1 का. 33 व्याख्याने लोचने ध्वन्यालोकः तृतीयोद्योते

2 वीडायोगान्नतवदनया सन्निधाने गुरूणां बद्धोत्कम्पं कुचकलशयोर्मन्युमन्तर्निगृह्य तिष्ठेत्युक्तं किमिव न तया यत् समुत्सृज्य बाष्पं मप्यासक्तः चकितहरिणीहारिनेत्रत्रिभागः। का. 4 वृत्तौ ध्वन्यालोक तृतीयोद्योतः

3 का. 33 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः

ध्वनिकारो ब्रवीति 'वाच्यव्यङ्ग्ययोः पदार्थवाक्यार्थन्यायो नोपपद्यते कारणं सर्वेषां दार्शनिकानां मतेऽयं पदार्थवाक्यार्थन्यायो न सम्भवति। तत्र वैय्याकरणाः पदस्य तदर्थस्य च प्रतीतिमसत्यां मन्वते। अर्थात् वाक्यस्य तदर्थस्य च नित्यता तैः स्वीकृता न तु पद तदर्थयोः तदुक्तं भर्तृहरिणा –

**पदे न वर्णा विद्यन्ते वर्णेष्वयवा न च।**
**वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन॥**[1]

ये खलु पदार्थवाक्यार्थन्यायं मन्यन्ते तेषां मते पदार्थवाक्यार्थयोः कार्यकारणभावो भविष्यति। अर्थात् पदार्थज्ञानं कारणं वाक्यार्थज्ञानञ्च कार्यं तथा कार्यकारणभावश्चात्र तेषां मते 'घटतदुपादानकारणभावन्यारूपः', अर्थात् समवायिकारणरूप यथा मृत्तिका घटस्य उपादानकारणं तथैव पदार्थोऽपि वाक्यार्थस्य समवायिकारणं तथा समवायिकारणस्थले कार्यात् पूर्वं कारणस्य सत्ता भवति यथा घटरूपकार्यस्य पूर्वं मृत्तिकारूपस्य कारणस्य सत्ता तथैवात्रापि वाक्यार्थरूपकार्यस्य पूर्वं पदार्थरूपकारणस्य सत्ता, समवायिकारणस्थले कार्योत्पत्त्यनन्तरं कारणस्य पृथग्ज्ञानं न भवति यथा घटोत्पत्त्यनन्तरं मृदः पृथक्तया न भानं तथैव वाक्यार्थोत्पत्त्यनन्तरं (ज्ञानानन्तरं) पदार्थो न पृथक्तया भासते। यदि पृथक्तया भासते तर्हि वाक्यार्थज्ञानमेव हि तत्र न भवति कारणं यत्रैकस्यैवार्थस्य ज्ञानं तदेव वाक्यं तदुक्तम् –

**'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्'।**[2]

अर्थात् यदि विभागे कृते पदं परस्परसाकाङ्क्षं तथाविभागे विशिष्टैकार्थबोधकत्वं तदेव वाक्यम्।

तथा ये पदार्थवाक्यार्थयोर्घटमृत्तिकावत् समवायिकारणं मन्वते, ते यदि पदार्थस्य वाक्यार्थस्य च पृथगुपस्थितिं वदन्ति तर्हि वाक्यमेव तत्र भविष्यति, द्व्यर्थस्य तत्र भानात् न द्व्यर्थे वाक्यलक्षणं संघटते, वाक्यार्थस्य विशिष्टैकार्थबोधकत्वात्।

यदि विशिष्टैकार्थज्ञानं स्वीकुर्वन्ति तर्हि समवायिकारणता तयोः पदार्थवाक्यार्थयोर्न भविष्यति कारणं यथा घटोत्पत्तिकाले न मृदः पृथग् ज्ञानं

---

1 का. 33 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः

2 वाक्यपदीयम्, ब्रह्मकाण्डम् श्लो. 73

तथा वाक्यार्थोत्पत्तिकाले न पृथग् पदार्थज्ञानं कारणं व्यङ्ग्यप्रतीतिकाले वाच्यप्रतीतिर्दूरी न भवति। अर्थात् वाच्यव्यङ्ग्यप्रतीत्योरविनाभावेन सर्वत्र ग्रहणं भवति। तदुक्तं ध्वनिकृता –

'न च पदार्थवाक्यार्थन्यायो वाच्यव्यङ्ग्ययोः। यतः पदार्थप्रतीतिरसत्यैवेति कैश्चिद् विद्वद्भिरास्थितम्। यैरप्यसत्यत्वमस्या नाभ्युपेयते तैर्वाक्यार्थपदार्थयो-र्घटतदुपादानकारणन्यायोऽभ्युपगन्तव्यः। यथा हि घटे निष्पन्ने तदुपादानकारणानां न पृथगुपलम्भस्तथैव वाक्ये तदर्थे वा प्रतीते पदतदर्थानाम्। तेषां तथा विभक्ततयोपलम्भे वाक्यार्थबुद्धिरेव दूरी भवेत्। न त्वेष वाच्यव्यङ्ग्ययोर्न्यायः। न हि व्यङ्ग्ये प्रतीयमाने वाच्यबुद्धिर्दूरी भवति। वाच्यावभासाविनाभावेन तस्य प्रकाशनात्।'

'पदार्थवाक्यार्थन्यायं' समवलम्ब्य हि पूर्वपक्षेण व्यञ्जनानिरासस्य प्रयासो विहितः परं ध्वनिकृता 'पदार्थवाक्यार्थन्याय' एव समूलं खण्डितः। अर्थात् –

**वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।**
**पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥**

इति कुमारिलभट्टकारिकानुगुणं तात्पर्यवृत्त्यैव व्यङ्ग्यार्थो गतार्थः पूर्वपक्षेण। तस्याभिप्रायोऽयं 'यत्परः शब्दः स शब्दार्थः' 'यस्यार्थस्य बोधाय शब्दोच्चारितः तदेव वाच्यार्थः यथा 'गङ्गायां घोषः' इत्यत्र शैत्यादिबोधने प्रयुक्तो गङ्गापदं तद्बोधयति तस्मात् तदेव शैत्यादिवाच्यः तथा यस्यार्थस्य जलप्रवाहरूपस्य तटरूपस्य वा मध्ये प्रतीतिः सा मुख्यार्थस्य प्रतीतेरूपायमात्रम् तथा पर्यन्ते मुख्यार्थस्यैव प्रतीतिर्न तु मध्यवर्तिनः प्रवाहरूपस्य तटरूपस्य वा। कारणं तयोः प्रतीत्योः कार्यकारणभावः तत्र पदार्थप्रतीतिकारणं वाक्यार्थप्रतीतिश्च कार्यं तथा वाक्यार्थसमाप्तौ यथा न पृथक्तया पदार्थप्रतीतिः तथैवात्रापि शैत्यप्रतीतौ न प्रवाहस्य तटस्य वा प्रतीतिः। किञ्च मध्ये यस्यार्थस्य (प्रवाहस्य तटस्य च) प्रतीतिः सा मुख्यार्थप्रतीतेरूपायमात्रम्। इत्थं पदार्थवाक्यन्यायेन व्यञ्जनानिरासः पूर्वपक्षेण कृतः।

परं ध्वनिकृता 'पदार्थवाक्यार्थन्यायः' सयुक्तिकं खण्डितः। खण्डनस्य सारोऽयं 'प्रथमं तु पदार्थवाक्यार्थन्यायः' सर्वे न स्वीकुर्वन्ति, वैय्याकरणास्तु

पदपदार्थयोः सत्तां न स्वीकुर्वन्ति। अर्थात् वाक्यात्मकः स्फोट एव नित्यः तेषां मते, तेन व्याकरणमते भवत्येव न पदार्थवाक्यार्थन्यायः।

ये खलु मीमांसकाः कुमारिलप्रभृतयः पदार्थवाक्यार्थन्यायं स्वीकुर्वन्ति तेषां मते पदार्थवाक्यार्थयोः कार्यकारणभावः समवायिकारणरूपो भविष्यति कारणं तत्र समवायिकारणस्थले कारणं पूर्वं तदनु कार्यं भवति, यथा मृत्तिकापूर्वं घटश्च तदनन्तरं समुत्पद्यते तथैव पदार्थोऽपि पूर्वं वाक्यार्थश्च तदनन्तरं समुत्पद्यते तथा समवायिकारणस्थले कार्योत्पत्तिकाले कारणस्य पृथग् ज्ञानं न भवति यथा घटोत्पत्तिकाले तदुपादानकारणस्य कपालस्य तथैव वाक्यार्थोत्पत्तिकाले पदार्थस्य पृथक्तया भानं नास्ति।

अस्ति चेत् पदार्थवाक्यार्थयोः पृथग् ज्ञानं तर्हि वाक्यमेव तन्नास्ति कारणं 'विशिष्टैकार्थबोधकत्वमेव वाक्यलक्षणम् (अर्थैकत्वादेकं वाक्यम्) तेन मीमांसकानां मते पदार्थवाक्यार्थन्यायो वाच्यव्यङ्ग्ययोः सम्भवति।

ध्वनिकारस्य मते यत्र व्यङ्ग्यार्थस्य प्रतीतिस्तत्र वाच्यार्थस्यापि प्रतीतिर्भवति, घटप्रदीपवत्। अर्थात् प्रदीपः स्वयं प्रकाशयन् परान् घटादीन् प्रकाशयति तथैव वाच्यार्थोऽपि स्वयं प्रकाशयन् व्यङ्ग्यार्थं प्रकाशयति। तेन व्यङ्ग्येन सह वाच्योऽपि सर्वत्र सहैवावभासते, पदार्थस्तु न पृथगवभासते वाक्यार्थे तेन पदार्थवाक्यार्थन्यायो न जातु वाच्यव्यङ्ग्ययोः। प्रश्नो भवति प्रथमोद्योते तु 'यथा पदार्थेन वाक्यार्थः तथैव वाच्येन व्यङ्ग्यार्थः प्रकाशते' इति यदुक्तं तेनात्र विरोधः क्रियते यत् नास्ति तयोः पदार्थवाक्यार्थन्यायः कथं तह्यत्र समन्वयः। तदा वक्ति ध्वनिकारः प्रथमोद्योते मया यदुक्तम् -

**यथा पदार्थद्वारेण वाक्यार्थः सम्प्रतीयते।**
**वाच्यार्थपूर्विका तद्वत् प्रतिपत्तस्य वस्तुनः॥**[1]

उपायत्वसाम्येनैतदुक्तं यत् यथा पदार्थो वाक्यार्थज्ञाने साधनं (उपायं) तथैव वाच्यार्थोऽपि व्यङ्ग्यप्रतीतौ साधनम्। तदुक्तं तृतीयोद्योते स्वयं तेनैव-

'यत्तु प्रथमोद्योते 'यथा पदार्थद्वारेण' इत्याद्युक्तं तदुपायत्वमात्रात् साम्यविवक्षया।'[2]

---

1 जैमिनिसूत्रम्

2 का. 10 प्रथमोद्योतः ध्वन्यालोकः

प्रश्नोत्पद्यते 'घटप्रदीपन्याये' वाच्यव्यङ्ग्ययोश्च सहैव भानं भवतीति यदुक्तं तेनार्थद्वयस्यैकस्मिन् काले श्लोके वा प्रकाशनाद् वाक्यलक्षणमेवात्र न घटते। 'एकार्थबोधकमेव वाक्यलक्षणम्। तर्हि स्वमेव समादधाति ध्वनिकारो यत् 'नैष दोषः कारणं प्रधानाप्रधानभावेन तयोः श्लोके व्यवस्थापनात्। तत्र व्यङ्ग्यस्य प्राधान्ये ध्वनिः वाच्यस्य प्राधान्ये गुणीभूतव्यङ्ग्यः तेनाङ्गाङ्गीरूपेण तयोर्व्यवस्थाकरणान्नात्र दोषः। तदुक्तम् –

'नैष दोषः गुणप्रधानभावेन तयोर्व्यवस्थानात्। व्यङ्ग्यस्य हि क्वचित् प्राधान्यं वाच्यस्योपसर्जनीभावः क्वचिद्वाच्यस्य प्राधान्यमपरस्य गुणभावः। तत्र व्यङ्ग्यप्राधान्ये ध्वनिरित्युक्तमेव। वाच्यप्राधान्ये तु प्रकारान्तरं निर्देक्ष्यते।'[1]

वाच्यव्यङ्ग्ययोर्यत् 'घटप्रदीपन्यायो' ध्वनिकारेणाभ्युपगतः तस्य मूलं काश्मीरशैवदर्शनमेव कारणं ध्वनिकारो महान् शैवाचार्यस्तथा शैवदार्शनिकोऽस्ति शैवदर्शने हि परमशिवस्यैव पारमार्थिकी सत्ता व्यवहारदर्शायां परमशिवः स्वयं प्रकाशयन् क्षित्यन्तानि षट्त्रिंशत्तत्त्वानि प्रकाशयति। ध्वनिकृतापि 'स्वयं प्रकाशयन् परावभासको व्यञ्जक इत्युक्त' इति तृतीयोद्योते व्यञ्जनस्थापनावसरे सविस्तरं सयुक्तिकं व्यञ्जकस्वरूपः साधितः। अस्माभिरपि सप्रमाणं पूर्वमस्मिन्नेवाध्याये शैवदर्शनपरिचयपुरस्सरं सयुक्तिकं 'शैवदर्शनानुप्राणितत्वं घटप्रदीपन्यायस्येति' सविस्तरं साधितमेव।

एतदतिरिक्तमपि ध्वन्यालोके लोचने च बहूनां शैवदर्शनसम्बद्धानां सिद्धान्तानां दर्शनं भवति, यथा प्रत्यभिज्ञासिद्धान्तस्यास्यां कारिकायाम् –

**सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।**
**यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः॥**[2]

'तत्तेदन्तावगाहिनी प्रतीतिः प्रत्यभिज्ञा' इत्येवार्थो नास्ति, प्रत्यभिज्ञापदस्य प्रत्युत ज्ञातस्यापि विशेषतो निरूपणं प्रत्यभिज्ञानम्। शैवदर्शने 'प्रत्यभिज्ञापद-मवलम्ब्य' बहूनि शास्त्राणि प्रणितानि येषां समुल्लेखो विस्तारेण पूर्वमस्मिन्नध्याये कृतः तथाप्यत्र संक्षेपेण सारः प्रस्तूयते। शैवाचार्या मुक्तिविषये वदन्ति स्वस्वरूपज्ञानमेव हि सा, तदुक्तं तन्त्रालोके श्रीअभिनवपादैः –

1 का. 33 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः
2 का. 33 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः

**'मोक्षो हि नाम नैवान्यः स्वरूपप्रथनं हि तत्'।**[1]

लोचनेऽप्युक्तं तत्रैव -

यथोक्तमस्मत्परमगुरुभिः श्रीमदुत्पलपादैः

**तैस्तैरप्युपयाचितैरूपनतस्तन्व्याः स्थितोऽप्यन्तिके**
**कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं यथा।**
**लोकस्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो**
**नैवालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता॥**[2]

तेन ज्ञातस्यापि विशेषतो निरूपणमनुसन्धानात्मकमत्र प्रत्यभिज्ञानं न तु तदेवेदमित्येतावन्मात्रम्।[3]

एतदतिरिक्तमपि बहुत्र शैवदर्शनं विद्यते ध्वन्यालोकलोचनयोः परमत्र ध्वनिस्थापने साक्षादप्रयोजकत्वान्न प्रदर्श्यते।

ध्वनिस्थापने यो घटप्रदीपन्यायो ध्वनिकृता सप्रपञ्चं स्वीकृतः तस्योपजीव्यं शैवदर्शनमेव। तच्च सविस्तरं सयुक्तिकञ्चास्मिन्नध्याये प्रस्तुतम्।

**यदुन्मीलनशक्त्यैव विश्वमुन्मीलति क्षणात्।**
**स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम्॥**

◈ ◈ ◈

1 का. 8 ध्वन्यालोकः प्रथमोद्योतः

2 तन्त्रालोकः

3 का. 8 व्याख्याने लोचने

# चतुर्थोऽध्यायः

**ध्वनिस्थापने सांख्ययोगदर्शनयोरवदानम्**

संस्कृतवाङ्मयेऽस्मिन् शास्त्रान्तर्खण्डनमण्डनपुरःसराणि तत्तद्विषयकानि शास्त्राणि तत्तत्प्रणेतृभिः प्रणितानि। तत्रापि साहित्यशास्त्रे विशेषतः शास्त्रान्तराणां स्वस्य च सिद्धान्तस्य बहुशो वर्णनात् 'सकलशास्त्रसारं साहित्यशास्त्रम्' इति विदुषां भणितिं निशम्य स्वप्रवृत्त्यनुकूलानि तत्त्वानि चोपलभ्य 'ध्वनिस्थापने व्याकरणदर्शनशास्त्रयोरवदानम्' इति शीर्षकमनुसृत्य शोधकार्येऽस्मिन् मे प्रवृत्तिः।

व्याकरणस्फोटसिद्धान्तस्तु साक्षादुपजीव्यं ध्वनिसिद्धान्तस्य, तदुक्तं साक्षादानन्दवर्धनाचार्येण 'प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः।'[1]

तच्च द्वितीयाध्याये शोधप्रबन्धेऽस्मिन् विविच्य प्रदर्शितम्। तथा व्यञ्जनास्थापनावसरे वाच्यव्यङ्ग्ययोर्घटप्रदीपन्यायः स्वीकृतः कारणं यथा प्रदीपः स्वयं प्रकाशयन् स्वसन्निहितान् घटादीन् प्रकाशयति तथैव वाच्यार्थोऽपि स्वयं प्रकाशयन् व्यङ्ग्यार्थं प्रकाशयति, तदुक्तं व्यञ्जनास्थापनावसरे ध्वनिकृता- 'तस्माद् घटप्रदीपन्यायस्तयोः, यथैव हि प्रदीपद्वारेण घटप्रतीतावुत्पन्नायां न प्रदीपप्रकाशो निवर्तते तद्वद् व्यङ्ग्यप्रतीतौ वाच्यावभासः।'[2]

शैवदर्शनेऽपि परमशिवः स्वयं प्रकाशयन् क्षित्यन्तानि षट्त्रिंशत्तत्त्वानि प्रकाशयति, तदुक्तम् -

---

1 का. 13 वृत्तौ ध्वन्यालोकः प्रथमोद्योतः

2 का. 33 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः

**आत्मैव सर्वभावेषु स्फुरन् निर्वृतचिद्विभुः।**
**अनिरूद्धेच्छाप्रसरः प्रसरद्दृक्क्रियः शिवः॥**[1]

आनन्दवर्धनाचार्यश्च परमशैवदार्शनिको बभूव, तेन कारणेन वाच्य-व्यङ्ग्ययोर्घटप्रदीपन्यायकल्पने नूनं शैवदर्शनस्य 'स्वयं प्रकाशयन् परावभासकश्च' इत्ययं सिद्धान्तो निहितः। तस्य सोपपत्तिकं व्याख्यानं तृतीयाध्याये शोधप्रबन्धेऽस्मिन् विहितम्।

सम्प्रति व्याकरणशैवदर्शनातिक्तदर्शनानां ध्वनिस्थापने कथमवदानमिति सयुक्तिकं सप्रमाणं भगवत्याः प्रसादेन प्रदर्श्यते। यद्यपि केनापि ध्वनिवादिना साहित्यमर्मज्ञेन ध्वनिस्थाने दर्शनानामवदानं मुक्तकण्ठेन नाभ्युपगतं तथापि बहूनां दर्शनतत्त्वानां योगो ध्वनिस्थापनेऽस्त्येव, तथाहि 'रसो वै सः'[2] इत्यादिश्रुत्यनुसारं साहित्यदर्पणकारादिभिः 'ब्रह्मास्वादसहोदरः'[3] प्रभृतिप्रयोगो रसनिरूपणावसरे कृतः तथा वैशद्येन 'ब्रह्मास्वादसहोदरः' इत्यस्य ज्ञाने वेदान्तदर्शनस्य ज्ञानं नितरामावश्यकम्। तथैव व्यङ्ग्यार्थस्य सत्तायां तद्भानमेव प्रमाणत्वेन स्वीकृतं, तदुक्तं ध्वनिकृता -

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥**[4]

लोचनकारेणापि स्पष्टीकृतं यत् -

'यदेवंविधमस्ति तद्भाति। न ह्यत्यन्तासतो भानमुपपन्नं रजताद्यपि नात्यन्तमसद्भाति। अनेन सत्त्वप्रयुक्तं तावद्भानमिति' भानात्सत्त्वमवगम्यते। तेन यद्भाति तदस्ति तथेत्युक्तं भवति।'[5]

सांख्येऽपि सत्कार्यवादे प्रतिपादितं यत् 'असदकरणात्'[6] अर्थात् न जातुचित् 'असतः सत्ता' भवति श्रीमद्भगवद्गीतायामपि भणितम् -

---

1 श्लो. 2 शिवदृष्टिः, प्रथमाह्निकम्

2 तैत्तिरीयोपनिषद्

3 सा. द. का. 2 तृतीयः परिच्छेदः

4 का. 4 ध्वन्यालोकः प्रथमोद्योतः

5 तत्रैव का. 4 व्याख्याने लोचने

6 असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्॥ का. 9 सांख्यकारिका

**नासतो विद्यते भावो नाभावो विद्यते सतः।**
**उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥**[1]

इत्थं सांख्यदर्शनस्य विशेषतो ज्ञानमपेक्षितं व्यङ्ग्यार्थसत्तानिरूपणावसरे। तथा वस्त्वलङ्काररसभेदेन त्रिविधेऽपि ध्वनौ रस एव वस्तुतः काव्यस्यात्मा तथा सूक्ष्मदृष्ट्या पश्यामः तर्हि ज्ञायते रसो हि नाम नैवान्य पदार्थः कश्चित् प्रत्युत चित्तवृत्तिरूपो हि सः। चित्तवृत्तीनाञ्च सम्बन्धो योगदर्शनेन सह वर्तते। तदुक्तं पतञ्जलिना –

**'योगश्चित्तवृत्तिनिरोधः'**[2]

तदित्थं प्रायशः सर्वेषां दर्शनानामवदानं ध्वनिस्थापने परम्परया वर्तते, यद्यपि व्याकरणस्यावदानं साक्षात् ध्वनिवादिभिराचार्यैः स्वीकृतं न तु दर्शनादिशास्त्रान्तरस्य तथापि पूर्वोक्तानां दर्शनानां ज्ञानं ध्वनिस्थापने नितरां करणीयं, तेन ध्वनिस्थापना नितरामवबुध्यते। ततश्च सम्प्रति क्रमेण यथामति तेषां दर्शनानां संक्षिप्तपरिचयपुरस्सरं ध्वनिस्थापने तदवदानं प्रस्तूयते।

### साङ्ख्यदर्शनम्

षट्सु आस्तिकदर्शनेषु सांख्यदर्शनं तावदाद्यं, यस्य खलु प्रवर्तकः स्वयं भगवदंशः[3] कपिलो मुनिः। दर्शनेऽस्मिन् 'सत्कार्यवादः' प्राधान्येन प्रतिष्ठापितः। तस्य च सत्कार्यवादस्य सिद्धान्तो ध्वनिस्थापने स्वयं ध्वनिकृता (सङ्केतेन 'विभाति लावण्यमिवाङ्गनासु' इत्यत्र) लोचनकृता च (न ह्यत्यन्तासतो भानमुपपद्यते... भानात्सत्त्वमवगम्यते इत्यत्र) स्वीकृतः। ततश्च सम्प्रति यावदपेक्षितमेव सांख्यपरिचयो दीयते।

'अध्यात्मविद्या विद्यानाम्'[4] इति निर्दिशन् श्रीमद्भगवद्गीतायां परमकारुणिको भगवान् तासु विद्यासु बह्वीसु सतीसु कतमोपादेया प्रश्ने सति वक्ति 'सिद्धानां कपिलो मुनिः'[5] अर्थात् 'अहं वासुदेवः सिद्धानां

1 श्रीमद्भगवद्गीता 2/16
2 सूत्र 2 योगदर्शनम् प्रथमपादः
3 अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः॥ श्रीमद्भगवद्गीता 10/26
4 श्रीमद्भगवद्गीता 10/32
5 तत्रैव श्लो. 26

मुनीनां मध्ये कपिलमुनिरस्मि'। स च कपिलमुनिः सांख्यशास्त्रस्य प्रणेतृत्वेन विराजते, सांख्यप्रवचनसूत्राणि च तेन प्रणितानि, इति श्रूयते न तु तदुपलभ्यते तथापि निश्चितमिदं यत् सांख्यदर्शनप्रवर्तकः कपिलमुनिरेव।

समुपलब्धेषु सांख्यदर्शनग्रन्थेषु 'सांख्यकारिका' (ईश्वरकृष्णप्रणिता) प्राचीनतमास्ति। तदनुसारमेवात्र संक्षेपेण सत्कार्यवादविषये प्रतिपाद्यते। प्राणिमात्रस्य दुःखहानाय प्रीत्यवाप्तये चाभिनिवेशो दृश्यते, मनीषिणस्तु सांसारिकसुखस्यापि दुःखसम्मिश्रणत्वाद् हेयतां वर्णयन्ति, तथा यदा पर्यन्तं दुःखज्ञानं नास्ति न तावत् तद्हानिः। तदुक्तं कालिदासेन शाकुन्तले-

**'विकारं खलु परमार्थतोऽज्ञात्वानारम्भः प्रतीकारस्य'।**[1]

तेन कारणेन त्रिविधस्य दुःखस्य कल्पना तत्रेश्वरकृष्णेन विहिता (आधिदैविक-आधिभौतिक-आध्यात्मिकञ्चेति) तथा बोधितं यत् न तु दृष्टोपायेन न वा वैदिकेनोपायेन तन्निवृत्तिः। तदुक्तम्-

**दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।**
**दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात्।।**[2]
**दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः।**
**तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्।।**[3]

व्यक्तस्याव्यक्तानां (चतुर्विंशतितत्त्वानां) ज्ञस्य (पुरुषस्य) विशेषज्ञानात् तन्निवृत्तिः। पुनश्च तान् पञ्चविंशतिपदार्थान् विशेषतया बोधयति यत् मूलप्रकृतिस्तु न केनचिदुत्पाद्यते तेन सा मूलप्रकृतिः, महदहङ्कारतन्मात्राणि प्रकृतिविकृतयः कारणं केनचिदुत्पाद्यन्ते स्वयं कञ्चिदुत्पादयन्ति च। एकादशेन्द्रियाणि पञ्चमहाभूतानि तु विकृतयो विकारा एव तथा पुरुषस्तु न प्रकृतिर्न वा विकृतिः।[4] एतेषां ज्ञानेनैव दुःखानामत्यन्तत एकान्ततश्च निवृत्तिः। एतानि तत्त्वानि प्रमेयानि तथा विना प्रमाणं न प्रमेयसिद्धिः तेन च दृष्टानुमानाप्तवचनानि प्रमाणानि स्वीकर्तव्यानि तदुक्तम्-

1 अभिज्ञानशाकुन्तलम्, अङ्कः 3

2 सांख्यकारिक 1

3 तत्रैव 2

4 मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।। सांख्यकारिका 3

**दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्।**
**त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धिः।।**[1]

प्रमाणानां स्वरूपञ्च निरूप्य सामान्यतो दृष्टादनुमानात् प्रधानपुरुषादीनां सत्ता स्वीकृता, तदुक्तं सांख्यतत्त्वकौमुद्यां वाचस्पतिमिश्रेण –

**'सामान्यतो दृष्टादनुमानादतीन्द्रियाणां प्रधानपुरुषादीनां प्रतीतिः।'**[2]

प्रधानादीनां सूक्ष्मत्वात् प्रतीतिर्न भवति, कारणं विद्यमानस्याप्य-नुपलब्धौ तदेते हेतवः

**अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्।**
**सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च।।**[3]

यद्यपि सौक्ष्म्यान्न तेषामुपलब्धिस्तथापि महादिकार्यात् तेषां सत्ताया अनुमानं भवति। अर्थात् कार्येण कारणस्यानुमानं सुशक्यं तदुक्तम् –

**सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धेः।**
**महदादि तच्च कार्यं प्रकृतिसरूपं विरूपञ्च।।**[4]

महदादिकार्येण तत्कारणप्रधानादीनामनुमानं भवति, अर्थात् विना कारणं न कार्यं जातूत्पद्यते। अयमेव सांख्यानां 'सत्कार्यवादः'। सतः सज्जायते ततश्च कार्येण तत्कारणस्य सत्ताया अनुमानं भवति तथा यद्वस्तु 'असदस्ति तस्योत्पत्तिश्च न जातुचित्' सम्भवति। तदुक्तम् –

**असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।**
**शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।।**[5]

ध्वनिस्थापने सत्कार्यवादस्य प्राधानतया प्रयोगेण संक्षेपेणात्र सत्कार्यवादं किञ्चिद् निरूपयामि।

**सत्कार्यवादः**

कार्यकारणप्रसङ्गे सांख्याचार्यैः सतः सज्जायते इत्येवंरूपः सत्कार्यवादः

---

1 तत्रैव 4
2 का. 6 व्याख्याने
3 सांख्यकारिका 7
4 तत्रैव 8
5 तत्रैव 9

स्वीकृत:। कार्यं स्वकारणे पूर्वं सूक्ष्मरूपेणाव्यक्तावस्थायां प्रलीनं तिष्ठति, कारणव्यापारेण पुन: स्वाव्यक्तावस्थां परित्यजत् स्थूलरूपेण व्यवहारायोपपद्यते। तद्यथा घट: पूर्वं स्वोपादानकारणे मृत्तिकायामव्यक्तावस्थायां तिष्ठति परं न तदानीं जलाहरणादिव्यापाराय व्यवहाराय च शक्यते, कारणव्यापारेण पुन: स्वाव्यक्तदशां त्यजत् स्थूलरूपेणागत्य सद् बहुविधेषु व्यवहारेषु शक्तो दृश्यते। यदि कारणव्यापारात्पूर्वं घट: स्वकारणे सन्न स्यात् अर्थात् स्वकारणे असद्रूपेण स्यात्तर्हि तदुत्पत्तिरपि नैव स्यात्। परं मृत्तिकात: तदुत्पत्तिर्दृश्यते तेन सिद्ध्यते यत् कारणव्यापारपूर्वमपि सद्रूपेण कार्यं स्वकारणे भवत्येव।

तथा महदादिकार्येण तत्कारणप्रधानादीनामपि सत्ताया अनुमानं भवति। अयमेव 'सत्कार्यवाद:'।

सम्प्रति ध्वनिस्थापने सत्कार्यवादस्यावदानं प्रदर्श्यते। व्यङ्ग्यस्वरूपं बोधयन् ध्वनिकारो ब्रवीति यत्-

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।**[1]

लावण्यमिव प्रतीयमानं बोधयता ध्वनिकृता तस्य सत्तायां तद्भानमेव प्रमाणत्वेन स्वीकृतम्। तद्यथा -

यथा लावण्यं कामिनीषु भवति तथैव व्यङ्ग्यार्थोऽपि प्रतीयमानानुप्राणितकाव्यनिर्माणनिपुणप्रतिभावत्सु[2] महाकविषु तद्वाणीषु च भवति। तथा प्रसिद्धाननादिभिरङ्गै: समुल्लसद् लावण्यं यथा तेभ्यो व्यतिरिक्तमेव तथैव काव्यसारभूतं तत्प्रतीयमानं प्रसिद्धेन (सर्ववादिभि: स्वीकृतेन) वाच्येनाभिव्यक्तं सद् तद्भिन्नमेव।

अत्र ध्वनिकृता प्रतीयमानस्यार्थस्य सत्तायां तद्भानमेव 'विभाति' इत्यनेन पदेनाभ्युपगतम्। अर्थात् व्यङ्ग्यार्थस्य सत्तायां तत्प्रतीतिरेव कारणं वर्तते। स्वचित्तमेव रामायणादिषु कुत्रापि साक्षात् शब्देनाबोधितस्य 'रामादिवत्प्रवर्तितव्यं न रावणादिवत्' इत्यादिरूपस्यार्थस्य सत्तायां प्रमाणं तथैव दोषादिस्थलेष्वपि, यत्र व्यङ्ग्यतया जुगुप्साश्लीलादीनां प्रतीतिस्तत्रापि।

1 का. 4 ध्वन्यालोक: प्रथमोद्योत:

2 प्रतीयमानानुप्राणितकाव्यनिर्माणनिपुणप्रतिभाभाजनत्वेनैव महाकविव्यपदेशो भवति। का. 4 व्याख्याने लोचने प्रथमोद्योत:

यथा 'दृप्तारिविजये राजन् साधनं सुमहत्तव',[1] 'जैमिनीयमलं धत्ते रसनायामयं द्विजः'[2] इत्यादौ स्वानुभवैकगोचरमेव व्यङ्ग्यदोषादिभानम्। करुणरसादावपि यत्राश्रुपातादिपुरस्सरं विलक्षणमानन्दं सचेतसां गोचरं तत्रापि स्वानुभवैकप्रमाणम्। तदुक्तं विश्वनाथेन –

**करुणादावपि रसे जायते यत्परं सुखम्।**
**सचेतसामनुभवः प्रमाणं तत्र केवलम्॥**[3]
**किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः।**
**तथा रामायणादीनां भविता दुःखहेतुता॥**[4]

नानार्थकशब्दस्थले शब्दशक्तिमूलध्वनिनिरूपणावसरे मतत्रय–मीमांसावसरे पण्डितराजजगन्नाथेनापि तदर्थप्रतीतौ (व्यङ्ग्यार्थप्रतीतौ) तद्भानं प्रमाणत्वेन निरूपयतोक्तं यत् धर्मिग्राहकमानेनाप्राकरणिकोपस्थापकतयैव तादृशव्यक्तेरुल्लासात्तदजन्योपस्थितिं प्रत्येव प्रकरणादिज्ञानस्य प्रतिबन्ध कत्वकल्पनात्।[5]

तथा च –

व्यक्तेस्तु बाधितार्थबोधकत्वं धर्मिग्राहकमानसिद्धमिति व्यक्तिवादिनामदोष।[6]

अनेन ज्ञायते यत् ध्वनिवादिनः तस्य भानमेव (व्यङ्ग्यार्थस्य) तस्य सत्तायां प्रमाणत्वेनाभ्युपगच्छन्ति।

लोचनकारस्तु 'विभाति लावण्यमिवाङ्गनासु' इत्यंशं विशेषतो स्फोरयन् वक्ति यत् –

यदेवंविधमस्ति तद्भाति, न ह्यत्यन्तासतो भानमुपपन्नम् रजताद्यपि नात्यन्तमसद्भाति। अनेन सत्त्वप्रयुक्तं तावद्भानमिति भानात्सत्त्वमवगम्यते। तेन यद्भाति तदस्ति तथेत्युक्तं भवति।'[7]

---

1 का. 2 वृत्तौ सा. द. सप्तमः परिच्छेदः
2 संलक्ष्यक्रमध्वनिनिरूपणे रसगङ्गाधरः द्वितीयमाननम्
3 का. 4 सा. द. तृ. परिच्छेदः
4 का. 5 सा. द. तृ. परिच्छेदः
5 संलक्ष्यक्रमध्वनिनिरूपणे रसगङ्गाधरः द्वितीयमाननम्
6 तत्रैव रसगङ्गाधरे
7 का. 4 व्याख्याने लोचने प्रथमोद्योतः

लोचनकारस्य तात्पर्यमिदं यत् तादृशं यत्प्रतीयमानमस्ति तस्य भानमपि भवति तथा यद्वस्तु नितरामसद् तद्भानमपि न जातु जायते, यथा वन्ध्यापुत्रादयः। शुक्तिकायां यदा रजतत्वस्य भ्रमो जायते तदा नास्ति तस्यां रजतत्वं तथापि रजतत्वं यत्र वर्तते तत्र रजते तिष्ठत्येव तेन शुक्तिकायां रजतत्वं नात्यन्तासत् सद्भाति। तेन ज्ञायते भानं सत्त्वप्रयुक्तमेव। काव्येषु च बहुषु तस्य व्यङ्ग्यार्थस्य भानं भवति तेनैव भानेन तस्य सत्ता सिद्ध्यति। फलितार्थं यत् 'भानात् सत्त्वं (सत्ता) अवगम्यते। सांख्यदर्शनेऽपि सत्कार्यवादनिरूपणे 'कार्यं सत्' इत्यस्य सिद्धये युक्तयः प्रतिपादिता यत् 'असतो भानमेव न, यद् भाति तदस्ति'। तदुक्तम्–

**असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।**
**शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्॥**[1]

श्रीमद्भगवद्गीतायामपि सांख्यतत्त्वबोधनावसरे भगवतोक्तं यत् –

**नासतो विद्यते भावो नाभावो विद्यते सतः।**
**उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥**[2]

तस्य सत्तायां तद्भानमेव प्रमाणमिति प्रतिपाद्य ध्वनिकृता तस्य वाच्यतो भेदं दर्शयतोक्तं यत् –

स हि कदाचिद्वाच्ये विधिरूपे प्रतिषेधरूपः। यथा भ्रम धार्मिक विस्रब्धः स शुनकोऽद्य मारितस्तेन। गोदावरीनदीकूललतागहनवासिना दृप्तसिंहेन।[3]

अत्र वाच्यार्थस्तु विधिरूपो यत् 'त्वं भ्रम' व्यङ्ग्यार्थस्तु 'मा भ्रम' इति निषेधरूपः। भवत्यत्र प्रकरणज्ञानेन व्यङ्ग्यनिषेधार्थस्य प्रतीतिः, तत्प्रतीतिरेव च तत्सत्तायां प्रमाणम्।

एतदतिरिक्तं निदर्शनचतुष्टयं ध्वनिकृता व्यङ्ग्यस्य वाच्यतो भिन्नतायां प्रदर्शितम्। पण्डितराजजगन्नाथेनाप्युक्तं यत् –

'शृङ्गारप्रधानकाव्येभ्य इव करुणप्रधानकाव्येभ्योऽपि यदि केवलाह्लाद

---

1 का. 9 सांख्यकारिका

2 श्रीमद्भगवद्गीता 2/16

3 का. 4 वृत्तौ ध्वन्यालोकः प्रथमोद्योतः

एव सहृदयहृदयप्रमाणकः तदा कार्यानुरोधेन कारणस्य कल्पनीयत्वाल्लोकोत्तर-व्यापारस्यैवाह्लादप्रयोजकत्वमिव दुःखप्रतिबन्धकत्वमपि कल्पनीयम्।'[1] तथाग्रे वदति पण्डितराजो यत् –

'अश्रुपातादयोऽपि तत्तदानन्दानुभवस्वाभाव्यात् न तु दुःखात्। अत एव भगवद्भक्तानां भगवद्वर्णनाकर्णनादश्रुपातादय उपपद्यन्ते। न हि तत्र जात्वपि दुःखानुभवोऽस्ति।'[2]

पर्यायोक्तनिरूपणावसरे पण्डितराजः सयुक्तिकं प्रतिपादयति यत्–

'अपरश्च सर्वोऽपि व्यङ्ग्यप्रपञ्चः पर्यायोक्तकुक्षौ निक्षिप्तः। न ह्यनुभव- सिद्धोऽर्थो बलेनाप्यपह्नोतुं शक्यते।'[3]

तदित्थं सर्वत्र ध्वनिलक्षणग्रन्थेषु व्यङ्ग्यार्थस्य सत्तायां तद्भानमेव प्रमाणत्वेनाभ्युपगतम्। वयमपि स्वबुद्ध्या पर्यालोचयामस्तर्हि नितरां महाकवीनां प्रबन्धेषु वाच्यव्यतिरिक्तस्यार्थस्य प्रतीतिर्भवत्येव। न च रामायणादिषु साक्षाच्छब्देन कुत्रापि निवेदितं यत् 'रामादिवत्प्रवर्तितव्यं न रावणादिवत्' तथापि सम्पूर्णस्य प्रबन्धस्य पर्यालोचनात् व्यङ्ग्यतया पूर्वोक्तस्योपदेशस्य भानं तथा आप्रबन्धं वर्तमानस्य करुणरसस्यास्वादनञ्च भवति। शोकस्थायिभावस्योद्दीपनाधिक्यादेव करुणोऽत्राङ्गीरसः, प्रारम्भत एव क्रौञ्च-वधादारभ्य सीताया अत्यन्तवियोगपर्यन्तं (पुनः प्राप्त्याशाभावे निरपेक्षत्वात्) करुणरसोऽत्र निर्व्यूढो महाकविवाल्मीकिना तदुक्तम् –

'प्रबन्धे चाङ्गी रस एक एवोपनिबध्यमानोऽर्थविशेषलाभं छायातिशयं च पुष्णाति। यथा रामायणे यथा वा महाभारते। रामायणे हि करुणो रसः स्वयमादिकविनासूत्रितः 'शोकः श्लोकत्वमागतः' इत्येवंवादिना। निर्व्यूढश्च स एव सीतात्यन्तवियोगपर्यन्तमेव स्वप्रबन्धमुपरचयता।[4]

महाभारते च शान्तरसस्याङ्गीतया भानं व्यञ्जनया भवति। प्रश्नोऽयं समुदेति महाभारते यावान् विवक्षाविषयः स सर्वोऽनुक्रमण्यां प्रदर्शितः तथा नात्र कुत्रापि शान्तरसस्य निर्देशः। तर्हि समादधाति ध्वनिकारो यत् सत्यं

1 नव्यरसमतनिरूपणे, रासगङ्गाधरः प्रथमाननम्

2 तत्रैव

3 पर्यायोक्तनिरूपणे रसगङ्गाधरे द्वितीयमाननम्

4 का. 5 वृत्तौ ध्वन्यालोकः चतुर्थोद्योतः

शान्तरसस्याङ्गीत्वं महाभारते न स्वशब्दाभिधेयत्वेनानुक्रमण्यां दर्शितं, परं व्यङ्ग्यत्वेन तु दर्शितमेव। यथा –

**यथा यथा विपर्येति लोकतन्त्रमसारवत्।**
**तथा तथा विरागोऽत्र जायते नात्र संशयः॥**[1]

यथा वा –

**भगवान् वासुदेवश्च कीर्त्यतेऽत्र सनातनः।**[2]

तथानुक्रमण्यां यावान् विवक्षाविषयः स सर्वोऽपि पूर्वपक्षत्वेनोपस्थापितः। अर्थात् तादृशानां बलैश्वर्यवतां पाण्डवानां पर्यन्ते वैमनस्यदायिनी दशा पूर्वपक्षत्वेनोपनिबद्धा वाच्यमुखेन, व्यङ्ग्यमुखेन पुनः शान्तरसो मोक्षपुरुषार्थश्च प्रकाशितः तथा सूचितं यत् 'तस्मिन्नेव परमेश्वरे वासुदेवे भक्त्या भाव्यं न तु विभूतिषु'। अयं गूढार्थो व्यङ्ग्यतया सूचितः कारणं यद्वस्तु सारभूतं तन्न जातु वाच्यतया बोध्यते, व्यङ्ग्यतयैव प्रकाश्यते तत्। यदा व्यङ्ग्यतया सारभूतोऽर्थो निवेद्यते तदानीं तस्मिन् रमणीयता सुतरामागच्छति। तदुक्तं ध्वनिकृता–

'अत्यन्तसारभूतत्वाच्चायमर्थो व्यङ्ग्यत्वेनैव दर्शितो, न तु वाच्यत्वेन। सारभूतो ह्यर्थः स्वशब्दानभिधेयत्वेन प्रकाशितः सुतरामेव शोभामावहति। प्रसिद्धिश्चेयमस्त्येव विदग्धविद्वत्परिपत्सु यदभिमततरं वस्तु व्यङ्ग्यत्वेन प्रकाश्यते न साक्षाच्छब्दवाच्यत्वेनैव।'[3]

तदित्थं वाच्यव्यतिरिक्तस्यार्थस्य भानं रामायणमहाभारतादौ प्रबन्धे भवत्येव, सचेतसामनुभवस्तत्र प्रमाणं, स च व्यङ्ग्यार्थः पूर्वत आसीदेव, स्वयं ध्वनिकृतोक्तम्–

'तस्य हि ध्वनेः स्वरूपं सकलसत्कविकाव्योपनिषद्भूतम् अतिरमणीयम्, अणीयसीभिरपि चिरन्तनकाव्यलक्षणविधायिनां बुद्धिभिरनुन्मी–लितपूर्वम्। अथ च रामायणमहाभारतप्रभृतिनि लक्ष्ये सर्वत्र प्रसिद्धव्यवहारं लक्षयतां सहृदयानाम् आनन्दो मनसि लभतां प्रतिष्ठामिति प्रकाश्यते।'[4]

---

1 का. 5 वृत्तौ ध्वन्यालोकः चतुर्थोद्योतः

2 का. 5 वृत्तौ ध्वन्यालोकः चतुर्थोद्योतः

3 तत्रैव

4 का. 1 वृत्तौ ध्व. लो. प्रथमोद्योतः

'समाम्नातपूर्वः'[1] तथा 'तस्य भेदावुभौ स्मृतौ'[2] इत्यादिभिर्वचनेन तस्य सत्ता पूर्वतो विद्यत एवेति सूचितः।

लोचनकृतापि विशदीकृतं यत् –

समाम्नातपूर्व इति, पूर्वग्रहणेनेदम्प्रथमता नात्र सम्भाव्यते।[3]

भाक्तवादव्याख्याने पुनर्लोचनकृतोक्तं यत् 'सोऽर्थ आसीद् विद्वद्भिस्तस्यांशतोल्लेखोऽपि कृतः परं यथालिखितपाठकैः तस्य स्वरूपविवेको न कृतः प्रत्युत लक्षणया तदर्थबोधोऽभ्युपगतः। तदुक्तम् –

'भामहेनोक्तं 'शब्दाश्छन्दोऽभिधानार्थाः' इति अभिधानस्य शब्दाद् भेदं व्याख्यातुं भट्टोद्भटो बभाषे 'शब्दानामभिधानमभिधाव्यापारो मुख्यो गुणवृत्तिश्च' इति वामनोऽपि 'सादृश्याल्लक्षणा वक्रोक्तिः' इति। मनाक्स्पृष्ट इति तैस्तावद् ध्वनिदिगुन्मीलिता, यथालिखितपाठकैस्तु स्वरूपविवेकं कर्तुमशक्नुवद्भिस्ततस्वरूपविवेको न कृतः, प्रत्युतोपालभ्यते, अभग्ननारिकेलवद् यथाश्रुततद्ग्रन्थोद्ग्रहणमात्रेणेति। अत एवाह – परिकल्प्यैवमुक्तमिति'।[4]

तदित्थं ध्वनिकृतः पूर्वं न केनापि तल्लक्षणं कृतम्। ध्वनिकृता च तत्स्वरूपं निरूपयता तत्सत्तायां तद्भानमेव प्रमाणत्वेनाभ्युपगतं 'विभाति लावण्यमिवाङ्गनासु' इत्यत्र। लोचनकृता तु ततोऽपि विशदीकृतं यत् 'यदेवंविध मस्ति तद्भाति, न ह्यत्यन्तासतो भानमुपपन्नम्। रजताद्यपि नात्यन्तमसद्भाति। अनेन सत्त्वप्रयुक्तं तावद्भानमिति भानात् सत्त्वमवगम्यते। तेन यद्भाति तदस्ति तथेत्युक्तं भवति। सांख्यदर्शने च 'असतः सत्ता न स्वीकृता'।[5]

यद्यपि ध्वनिकृता मुक्तकण्ठेन व्याकरणमिव[6] सांख्यदर्शनस्यावदानं

---

1 का. 1 काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः।

2 का. 2 प्रथमोद्योतः

3 का. 1 व्याख्याने लोचने प्रथमोद्योतः

4 भाक्तवादव्याख्याने लोचने प्रथमोद्योतः

5 असदकरणात् का. सं. 9 सांख्यकारिका। तथा 'नासतो विद्यते भावो नाभावो विद्यते सतः। श्लो. 16, द्वितीयोऽध्यायः, श्रीमद्भगवद्गीता

6 प्रथमे हि विद्वांसो वैयाकरणाः ... तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभि-र्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः। का. 13 वृत्तौ ध्वन्यालोकः प्रथमोद्योतः

नाभ्युपगतं तथापि सांख्यदर्शनस्य सत्कार्यवादस्य ज्ञानपुरस्सरं व्यङ्ग्यार्थस्य सत्ता नितरां ज्ञाता भवत्येव, ततश्चाध्यायेऽस्मिन् तदर्थसत्तायां सांख्यदर्शनस्यावदानं सयुक्तिकं प्रदर्शितम्।

**योगदर्शनम्**

सांख्यदर्शनानन्तरं योगदर्शनं प्राचीनतमं, यस्य प्रवर्तको भगवान् 'हिरण्यगर्भः'[1]। सांख्यदर्शनं सिद्धान्तप्रचुरं न तत्र क्रियापक्षः किञ्चित्, योगदर्शने तु सिद्धान्तपक्षेण सह क्रियापक्षोऽपि प्राधान्येन वर्णितः। योगस्तु समस्तसम्प्रदायसम्मतो नात्र दर्शनान्तराणामिव मतान्तराणां खण्डनं तेन सार्वभौमोऽयं धर्मः। प्राचीनकालादेव योगस्य सत्ता वर्तते, पतञ्जलिना तु तस्य व्यवस्थापनमात्रं विहितं, सम्प्रति पतञ्जलियोगसूत्रमेव सर्वत्र पाठ्यते पठ्यते च। अध्यायचतुष्टये विभक्तं योगसूत्रम्। प्रथमे समाधिपादे चित्तभूमिचित्तनिरोधसमाधिप्रभृतीनां वर्णनम्। द्वितीये साधनपादे क्रियायोगाष्टाङ्ग-योगादीनां निरूपणम्। विभूतिपादे विभूतिप्रभृतीनां, चतुर्थे कैवल्यपादे कैवल्यतदङ्गस्य (उपायस्य) च वर्णनम्। सूत्राणामुपरि भगवान् वेदव्यासव्यतिरिक्तस्य व्यासस्य भाष्यं समुपलभ्यते, येन सूत्राणां गूढार्थस्य तात्पर्यं सरलतया ज्ञातं भवति।

**योगः**

चित्तवृत्तीनां निरोध एव योगो वर्तते,[2] अयञ्च योगो समाधिरपि कथ्यते, कारणं युज-समाधौ धातोः 'योजनं योगः' इति विग्रहे 'भावे' इति सूत्रेण भावार्थे घञ् कृते निष्पन्नोऽयं शब्दः असम्प्रज्ञातसमाधेर्वाचकः। स चासम्प्रज्ञातसमाधिरेव प्रधानं, तदङ्गं तु सम्प्रज्ञातसमाधिः तेन असम्प्रज्ञातसमाधिस्तु 'अङ्गी' सम्प्रज्ञातसमधिश्च तदङ्गम्। सर्वस्यापि साधकस्यादौ सम्प्रज्ञात एव प्रवृत्तिः कारणं ध्यातृध्येयध्यानत्रितस्यात्र योगः। अर्थात् सम्प्रज्ञात-समाधौ चित्तस्यैकालम्बनं भवति तत्रैव तस्य चित्तमेकाग्रं भवति, यदा पुनः पुनः साधकः चित्तैकाग्रं करोति तर्हि कालान्तरेण 'अभ्यासप्रचयेन[3] ध्येयाकारस्य चित्तवृत्तेरपि शनैः शनैः तस्मिन् चित्ते लीनता भवति। यदा ध्येयाकारचित्त-

1 हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः। शान्तिपर्वः महाभारतम् 349/65

2 योगश्चित्तवृत्तिनिरोधः, सू. सं. 2 योगसूत्रम् प्रथमपादः

3 अभ्यासवैराग्याभ्यां तन्निरोधः। सू. सं. 12 प्रथमपादः

वृत्तिरपि पूर्णरूपेण लीना भवति सावस्था एव असम्प्रज्ञातसमाधिः कथ्यते। असम्प्रज्ञातसमाधौ साधकस्य चित्तवृत्तिर्निरूढा तिष्ठति, परं तस्य कृते पूर्वं सम्प्रज्ञातसमाधेनितरामभ्यास अपेक्षत एव। तेन सम्प्रज्ञातसमाधिः तस्याङ्गं तेन युज्यतेऽनेनेति विग्रहे 'युजिर् योगे' धातोः 'करणाधिकरणयोश्च' इति सूत्रेण करणार्थे घञ् प्रत्यये कृते निष्पन्नोऽयं योगशब्दः सम्प्रज्ञातसमाधेश्च वाचकः।

**चित्तभूमयः**

चित्तस्य स्वाभाविका अवस्था एव चित्तभूमयः, ताश्च पञ्चधा, तदुक्तं व्यासभाष्ये 'क्षिप्तं मूढं विक्षिप्तम् एकाग्रं निरूद्धमिति चित्तभूमयः'।[1]

**1. क्षिप्तम्**

रजोगुणस्याधिक्येन सांसारिकविषयेषु सततं समासक्तं चित्तं क्षिप्तं वर्तते। स्वस्वरूपचिन्तनस्य यावती स्थिरता बौद्धिकशक्तिश्चापेक्षते न तावती चित्तेऽस्मिन्। एषा चित्तभूमिर्द्रव्यमदासक्तानां भवति।

**2. मूढम्**

कर्तव्याकर्तव्यशून्यं शास्त्रविरुद्धाचरणे संलग्नं तमोगुणबहुलं चित्तं मूढं भवति। एषा चित्तभूमिः दानवानां मदिरापानकर्तृणां भवति। क्षिप्तचित्ते या नितरामस्थिरता तस्याः काचिन्न्यूनतात्र।

**3. विक्षिप्तम्**

सत्त्वगुणस्याधिक्येन कदाचित् स्थिरं चित्तं विक्षितं कथ्यते। एषा चित्तभूमिः प्रारम्भिकयोगिनां सुराणाञ्च भवति।

**4. एकाग्रम्**

यस्य चित्तस्य आलम्बनमेकमेव तत् 'एकाग्रम्'। यदा बाह्यवृत्तीनां निरोधो भवति तदा चित्तमेकाग्रं कथ्यते। सूत्रकारेण प्रतिपादितं यत् –

**'शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः।'**[2]

अर्थात् यस्मिन् चित्ते सजातीया वृत्तयो भवन्ति, एकस्याः चित्तवृत्तेः शान्तौ द्वितीयापि तादृशी चित्तवृत्तिः समुदेति तस्याश्च समाप्तौ तृतीयापि

---

1 सूत्र 2 व्याख्याने व्यासभाष्ये प्रथमपादः

2 सूत्र 12 तृतीयपादः

तादृशी चित्तवृत्तिरूदेति तथैवाग्रे भवति, तच्चित्तस्य एकाग्रतापरिणामः। तच्चित्तमेकाग्रं कथ्यते। एकाग्रभूमिवशादेव सम्प्रज्ञातसमाधिः सिद्धो भवति।

**5. निरुद्धम्**

यस्मिन् संस्कारमात्रशेषं भवति, सर्ववृत्तीनां निरोधश्च भवति तच्चित्तं निरूद्धं कथ्यते। अस्मिन्नेव असम्प्रज्ञातसमाधिः। सम्प्रज्ञातसमाधौ या ध्येयाकारसात्त्विकवृत्तिः तिष्ठति तस्याः सात्त्विकवृत्तेर्निरोधः तदस्यां भूमौ पूर्णनिरोधो भवति। इयमवस्था 'असम्प्रज्ञातसमाधिः' कथ्यते।

सर्वासां वृत्तीनां निरोधे पुरुषस्य स्वस्वरूपेऽवस्थानं भवति तदुक्तम्–

**तदा द्रष्टुः स्वरूपेऽवस्थानम्।**[1]

निरोधाभावे व्यवहारकाले व्युत्थानकाले वा पुरुषः चित्तस्य वृत्तीन् स्वस्येव भ्रमेण मनुते[2] यदहं सुखी दुःखी वा। तदुक्तं व्यासभाष्ये –

**'व्युत्थाने याश्चित्तवृत्तयस्तदविशिष्टवृत्तिः पुरुषः।'**[3]

यद्यपि बह्वयः चित्तवृत्तयस्तथापि तासां सर्वासां पञ्चसु चित्तवृत्तिषु अन्तर्भावो क्रियते, अन्यथा बहुत्वे सति तासां ज्ञानेनैव जन्मसमाप्तिर्भविष्यति, कथं वा निरोधोऽपि बहुत्वे शक्यस्तथा प्रकृतशास्त्रस्य निरर्थका भविष्यति। तेन पञ्चभिः सर्वासां वृत्तीनां ग्रहणं तदुक्तं भाष्ये –

ताः पुनर्निरोद्धव्या बहुत्वे सति चित्तस्येत्याह –

**'वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः'**[4]

सर्वासां चित्तवृत्तीनां पञ्चभिर्ग्रहणं ताश्च यथा प्रमाण–विपर्यय–विकल्प–निद्रा–स्मृतयः।

**अभ्यासवैरागाभ्यां तासां निरोधो भवति।**[5]

तेन च स्वस्वरूपोपलब्धिश्च भवति, तदुक्तं 'तदा द्रष्टुः स्वरूपेऽवस्थानम्। अयमेव योगशास्त्रस्योद्देश्यः।

---

1 सू. 3 प्रथमपादः

2 वृत्तिसारूप्यमितरत्र, सू. 4 प्रथमपादः

3 सू. 4 व्याख्याने व्यासभाष्ये

4 सू. 5 तत्रैव

5 अभ्यासवैराग्याभ्यां तन्निरोधः सूत्र 12

सम्प्रति ध्वनिस्थापने योगदर्शनस्यावदानं प्रदर्श्यते। व्यङ्ग्यार्थो हि त्रिविधो वस्त्वलङ्काररसरूपः, तेष्वपि रस एव वस्तुतः काव्यस्यात्मा, तदुक्तं ध्वनिकारेण–

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥**[1]

लोचनकृता स्पष्टीकृतमत्र यत् –

'स एवेति प्रतीयमानमात्रेऽपि प्रक्रान्ते तृतीय एव रसध्वनिरिति मन्तव्यम्। तेन रस एव वस्तुतः आत्मा, वस्त्वलङ्कारध्वनी तु सर्वथा रसं प्रति पर्यवस्येते इति वाच्यादुत्कृष्टौ तावित्यभिप्रायेण 'ध्वनिः काव्यस्यात्मेति सामान्येनोक्तम्'।[2]

रसस्य च निष्पत्तिर्विभावानुभावव्यभिचारिसंयोगाद् भवति। ते विभावादयः सर्वेऽपि चित्तवृत्तिरूपाः। तत्र रसस्य चित्तवृत्तिरूपता रसगङ्गाधरे पण्डितराज– जगन्नाथेन अभिनवगुप्तस्य रससिद्धान्तं निरूपयतोक्तं यत् –

'विभावादिचर्वणामहिम्ना सहृदयस्य निजसहृदयतावशोन्मिषितेन तत्तस्थाभ्युपहितस्वस्वरूपानन्दाकारा समाधाविव योगिनः चित्तवृत्तिरूपजायते, तन्मयीभवनमिति यावत्।'[3]

स्वयं लोचनकारेण रस–भाव–तदाभास–प्रशमादीनां निरूपणे सर्वेषां तेषां चित्तवृत्तिरूपता स्वीकृता। तदुक्तम् –

'औचित्येन प्रवृत्तौ चित्तवृत्तेरास्वाद्यत्वे स्थायिन्या रसो, व्यभिचारिण्या भावः। अनौचित्येन तदाभासः, रावणस्येव सीतायां रतेः।'[4]

कथनस्याभिप्रायो यत् काव्यस्यात्मा ध्वनिरस्ति, यद्यपि वस्त्वलङ्काररसरूपो त्रिविधो ध्वनिस्तथापि काव्यस्यात्मा रसध्वनिरेव। तेन काव्यस्यात्मा रसोऽस्ति स च चित्तवृत्तिरूपः। तथाहि जनानां हृदयेषु बहूनां जन्मनां संस्कारास्सन्ति, ते च संस्काराः स्वोद्बोधकं प्राप्य स्मृतिं जनयन्ति, तदुक्तं रसगङ्गाधरे –

1 का. 5 ध्वन्यालोकः प्रथमोद्योतः
2 का. 5 व्याख्याने लोचने ध्वन्यालोकः प्रथमोद्योतः
3 प्रथमरसमतनिरूपणे, रसगङ्गाधरः, प्रथमाननम्
4 का. 4 व्याख्याने लोचने प्रथमोद्योतः

'संस्कारतदुद्बोधकयोः सत्त्वे स्मृतेः प्रतिबन्धस्य क्वाप्यदृष्टत्वात्।'[1]

संस्कारोद्बोधकाभ्यां स्मृति भवत्येवेति सिद्धान्तः। काव्यक्षेत्रे तेषां जन्मान्तरसंस्काराणां कृते 'स्थायिभाव' इति शब्दस्य प्रयोगो भवति। ते च नव सन्ति, तदुक्तम् –

**रतिर्हासश्च शोकश्च क्रोधोत्साहो भयं तथा।**
**जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च॥**[2]

ते च स्वानुगुणं विभावानुभावौ सम्प्राप्य रसरूपेण परिणिता भवन्ति। तदुक्तं लोचनकृता –

'यस्तु स्वप्नेऽपि न स्वशब्दवाच्यो न लौकिकव्यवहारपतितः, किन्तु शब्दसमर्प्यमाणहृदयसंवादसुन्दरविभावानुभावसमुचितप्राग्विनिविष्टरत्यादि-वासनानुरागसुकुमारस्वसंविदानन्दचर्वणाव्यापाररसनीयरूपो रसः, स काव्यव्यापारैकगोचरो रसध्वनिरिति, स च ध्वनिरेवेति स एव मुख्यतयात्मेति।'[3]

अयञ्च रसः मधुराम्लादिवन्नास्ति प्रत्युतचित्तवृत्तिरूपोऽयं वर्तते, काव्ये नाट्ये च शब्दैर्बोध्यैर्विभावादिभिः सचेतसां हृदयेषु विद्यमानानां प्राग्जन्मसंस्काररूपाणां रत्यादिस्थायिभावानां समुद्बोधनेन चित्तवृत्तिरूपोऽयं रसः प्रकाशितो भवति। यदा विभावादिभिः स्थायिभावानां न समुद्बोधो न तदा तदभिव्यक्तिः।

योगदर्शनानुसारं चित्तवृत्तीनां बहुत्वं किञ्च बहुत्वे च सति तासां ज्ञान एव सम्पूर्णं जीवनं गमिष्यति, तेन न तासां निरोधो भविष्यति, तस्मात् सूत्रकारेण तासां निरोधार्थं पञ्चसु वृत्तिषु तासामन्तर्भावः कृतः। यदि नैवं क्रियते तर्हि सम्पूर्णमपि शास्त्रं निरर्थकं भविष्यति। अर्थात् 'अथ योगानुशासनम्'[4] इति प्रथमं सूत्रं प्रकृतविषयञ्च सूचयित्वा द्वितीयेऽस्मिन् सूत्रे 'योगश्चित्तवृत्तिनिरोधः'[5] इत्थं योगस्य स्वरूपं प्रतिपादितं यत् चित्तवृत्तिनिरोध एव योगः परं चित्तवृत्तीनान्तु बहुत्वं तेन कथं तासां

1 संलक्ष्यक्रमध्वनिनिरूपणे द्वितीयमाननम्
2 का. 175 सा. द. तृतीयपरिच्छेदः
3 का. 4 व्याख्याने लोचने प्रथमोद्योतः
4 सू. 1 प्रथमपादः
5 सू. 3 तत्रैव

निरोधः तर्हि स्वयं सूत्रकारेण पञ्चसु 'प्रमाणविपर्ययविकल्पनिद्रास्मृतिषु तासां सर्वासामपि गतार्थत्वमङ्गीकृतं, तदुक्तम् -

**'वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः'**[1]

ताश्च क्लिष्टाक्लिष्टाश्च पञ्चधा वृत्तयः -

**प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः।**[2]

इत्थं योगसूत्रकारस्य वचनमेव प्रमाणं यत् चित्तवृत्तीनां बहुत्वम्। संस्काराश्च द्विविधाः - क्लेशरूपाः सुखरूपाश्च, तेषामेव समुल्लेखः चित्तवृत्तिनिरूपणसूत्रे 'क्लिष्टाक्लिष्टपदाभ्यां कृतः।' योगभाष्यकारेण तयोः स्वरूपं तत्र निरूपितं यत् -

**क्लेशहेतुकाः कर्माशयप्रचयक्षेत्रीभूताः क्लिष्टाः।**
**ख्यातिविषया गुणाधिकारविरोधिन्योऽक्लिष्टाः।।**[3]

अत्र सुखरूपाः (अक्लिष्टा) संस्कारा बहवः तेषु रति-र्हास-शोक-क्रोधोत्साह-भय-जुगुप्सा-विस्मय-शमाः काव्यात्माभूतस्य रसस्योपादान-कारणरूपाः स्थायिभावेति शब्देनोच्यन्ते। ते च स्वानुगुणं विभावादिकं सम्प्राप्य रसरूपेण परिणमन्ति।

ध्वनिकारेण यद्यपि चित्तवृत्तिरूपेण रसस्य व्यपदेशो न कृतस्तथापि लोचनकारेण काव्यप्रकाशकारेण साहित्यदर्पणकारेण पण्डितराजजगन्नाथेन तु कृतः। ध्वनिकारस्य लक्ष्यन्तु काव्यात्मतत्त्वस्य ध्वनेः स्थापना, न तु रसादीनां गुणालङ्काराणां च निरूपणं स्वयं तेनैव ग्रन्थारम्भे प्रतिज्ञा कृता यत् 'सहृदयमनः प्रीतये तत्स्वरूपं ब्रूमः'।[4]

ग्रन्थान्ते सा प्रतिज्ञा निर्वाहिता सूचिता च-

**काव्याख्येऽखिलसौख्यधाम्नि विबुधोद्याने ध्वनिर्दर्शितः।**
**सोऽयं कल्पतरूपमानमहिमा भोग्योऽस्तु भव्यात्मनाम्।।**[5]

---

1 सू. 5 तत्रैव
2 सू. 6 तत्रैव
3 सू. 5 व्याख्याने व्यासभाष्ये
4 का. 1 ध्वल्यालोकः प्रथमोद्योतः
5 ध्वन्यालोकसमाप्तौ चतुर्थोद्योतः

अभिनवगुप्तस्य लोचनटीका ध्वन्यालोकस्य गूढं तात्पर्यं समुन्मीलयति, तत्र रसस्वरूपवर्णने रसस्य चित्तवृत्तिरूपता लोचनकृता स्वीकृता तथा बोधि तं यत् यदा औचित्यपूर्वकं रत्यादिस्थायिभावं समास्वाद्यते तदा औचित्येन रत्यादिस्थायिचित्तवृत्तेः प्रवृत्तौ रसः। यदा पुनः तत्र अनौचित्यं तर्हि स रसाभासः। भावस्यापि औचित्येन प्रवृत्तौ भावध्वनिः, अनौचित्ये तु भावाभासः। तदुक्तम् –

'औचित्येन प्रवृत्तौ चित्तवृत्तेरास्वाद्यत्वे स्थायिन्या रसो, व्यभिचारिण्या भावः, अनौचित्येन तदाभासः, रावणस्येव सीतायां रतेः।'[1]

भावप्रशमस्य विषये लोचनकारो वदति यत् 'यदा चित्तवृत्तिः प्रशमावस्थायां तत्परा भवति तदा विशेषतया हृदयमाकर्षति, ततश्च चित्तवृत्तेः प्रशमपरत्वे भावप्रशमध्वनिः। तदुक्तम् –

'चित्तवृत्तेः प्रशम एव प्रकान्ताया हृदयमाह्लादयति यतो विशेषेण, तत एव तत्संग्रहीतोऽपि पृथग्गणितोऽसौ। यथा –

**एकस्मिन् शयने पराङ्मुखतया वीतोत्तरं ताम्यतो**
**रन्योन्यस्य हृदि स्थितेऽप्यनुनये संरक्षतोर्गौरवम्।**
**दम्पत्योः शनकैरपाङ्गवलनामिश्रीभवच्चक्षुषो**
**र्भग्नो मानकलिः सहासरभसव्यावृत्तकण्ठग्रहम्।।**
**इत्यत्रेर्ष्यारोषात्मनो मानस्य प्रशमः।।**[2]

अग्रेऽपि लोचनकृतोक्तं यत् –

'शोके हि स्थायिभावे ये विभावानुभावास्तत्समुचिता चित्तवृत्तिश्चर्व्यमाणात्मा रस इत्यौचित्यात्स्थायिनो रसतापत्तिरित्युच्यते।'[3]

पण्डितराजजगन्नाथेन रसगङ्गाधरे रसनिरूपणे रसस्य चित्तवृत्तिरूपता स्वीकृता, तदुक्तम् –

'विभावादिचर्वणामहिम्ना सहृदयस्य निजसहृदयतावशोन्मिषितेन तत्तस्थाय्युपहितस्वस्वरूपानन्दाकारा समाधाविव योगिनश्चित्तवृत्तिरूपजायते, तन्मयीभवनमिति यावत्।'[4]

---

1 का. 4 व्याख्याने लोचने प्रथमोद्योतः

2 तत्रैव लोचने

3 का. 5 व्याख्याने लोचने प्रथमोद्योतः

4 रसनिरूपणप्रसङ्गे रसगङ्गाधरः प्रथमाननम्

पण्डितराजेन मुक्तकण्ठेन स्थायिभावानां चित्तवृत्तिरूपताङ्गीकृता, तदुक्तम्–

**रतिः** – स्त्रीपुंसयोरन्योन्यालम्बनः प्रेमाख्यश्चित्तवृत्तिविशेषो रतिः स्थायिभावः।

**शोकः** – पुत्रादिवियोगमरणादिजन्मा वैक्लव्याख्यश्चित्तवृत्ति-विशेषः शोकः।

**जुगुप्सा** – कदर्थवस्तुविलोकनजन्मा विचिकित्साख्यश्चित्तवृत्ति-विशेषो जुगुप्सा।[1]

तत्र संयोगवियोगशृङ्गारयोः सूक्ष्मभेदं सूचयता पण्डितराजेन तयोः संयोगवियोगयोः चित्तवृत्तिरूपता स्वीकृता, यत्र 'संयुक्तोऽस्मि' इत्येषा चित्तवृत्तिरुदेति सः संयोगशृङ्गारः, यत्र पुनः 'वियुक्तोऽस्मि' इत्येषा चित्तवृत्तिरुदेति सो विप्रयोगः। देशकृतः संयोगो वियोगो वा न सम्भवति कारणं समानाधि करणेऽपि शय्यादौ रोषादिसत्त्वे कविभिर्विप्रलम्भो वर्णितो यथा 'एकस्मिन् शयने पराङ्मुखतया वीतोत्तरं ताम्यतो... इत्यादिपद्ये। व्यधिकरणे च संयोगः कविभिर्वर्णितः। तेन 'संयुक्तोऽस्मि' 'वियुक्तोऽस्मि' इत्येषा चित्तवृत्तिरेव संयोगो विप्रयोगो वा शृङ्गारः, तदुक्तम् –

'संयोगो न दम्पत्त्योः समानाधिकरण्यम्, एकशयनेऽपीर्ष्यादिसद्भावे विप्रलम्भस्यैव वर्णनात्। एवं वियोगोऽपि न वैयधिकरण्यम् दोषस्योक्तत्वात्। तस्माद् द्वाविमौ संयोगोवियोगाख्यावन्तः करणवृत्तिविशेषौ यत् संयुक्तो वियुक्तश्चास्मीति धीः।'[2]

व्यभिचारिभावानामपि चित्तवृत्तिरूपता पण्डितराजेन मुक्तकण्ठेन प्रतिपादिता, तद्यथा –

**व्रीडा** – 'स्त्रीणां पुरुषमुखावलोकनादेः, पुंसां च प्रतिज्ञाभङ्गपराभवादेरूत्पन्नो वैवर्ण्याधोमुखत्वादिकारणीभूतश्चित्तवृत्तिविशेषो ब्रीडा।

**मोहः** – भयवियोगादिप्रयोज्या वस्तुतत्त्वानवधारिणी चित्तवृत्तिर्मोहः।

**धृतिः**– लोभशोकभयादिजनितोपप्लवनिवारणकरणीभूतश्चित्तवृत्तिविशेषो धृतिः।

---

1 तत्रैव

2 रसनिरूपणप्रसङ्गे रसगङ्गाधरः प्रथमाननम्

**शङ्का** – किमनिष्टं मम भविष्यतीत्याकारश्चित्तवृत्तिविशेषः शङ्का।

**दैन्यम्** – दुःखदारिद्र्यापराधादिजनितः स्वापकर्षभाषणादिहेतुश्चित्तवृत्तिविशेषो दैन्यम्।

**चिन्ता**– इष्टाप्राप्त्यनिष्टप्राप्त्यादिजनितो ध्यानापरपर्यायो वैवर्ण्यभूलेखनाधोमुखत्वादिहेतुश्चित्तवृत्तिविशेषश्चिन्ता।[1]

तथैव शेषाणां सर्वेषां व्यभिचारिभावानां चित्तवृत्तिरूपता पण्डितराजेन प्रतिपादिता। तदतिरिक्ता अपि व्यभिचारिभावाः सम्भवन्ति, अर्थात् भरतादिभिः त्रयस्त्रिंशत् सञ्चारिभावानां प्रतिपादनं कृतं, तदतिरिक्ता अपि सञ्चारिणाः स्युः 'मात्सर्योद्वेगदम्भेर्ष्याविवेकनिर्णयक्षमाप्रभृतयः' तथापि पूर्वोक्तेषु सञ्चारिभावेषु तेषामन्तर्भावः, यदि सूक्ष्मभेदे सत्यपि नूतनाः केऽपि भावाः कल्प्यन्ते तर्हि नियमोल्लंघनदोषो भविष्यति। अर्थात् भरतादयः प्राचीनाचार्या एव अस्माकं प्रमाणं, तैः यावती संख्या (त्रयस्त्रिंशत्) गणिता, तदतिक्रमणे वचनानुपालनाभावप्रसङ्गः उच्छृङ्खलता च भविष्यति। तदुक्तं पण्डितराजेन–

अथ कथमस्य संख्यानियमः, मात्सर्योद्वेगदम्भेर्ष्याविवेकनिर्णयक्लैब्यक्षमाकुतुकोत्कण्ठाविनयसंशयधाष्ट्र्यादीनामपि तत्र तत्र लक्ष्ये दर्शनादिति चेत्? न उक्तेष्वेवैषामन्तर्भावेण संख्यान्तरानुपपत्तेः।

असूयातो मात्सर्यस्य त्रासादुद्वेगस्य, अवहित्थाख्याद्भावाद् दम्भस्य, अमर्षादीर्ष्यायाः, मतेर्विवेकनिर्णययोः, दैन्यात् क्लैब्यस्य, धृतेः क्षमायाः, औत्सुक्यात् कुतुकोत्कण्ठयोः, लज्जाया विनयस्य, तर्कात् संशयस्य, चापलाद्धाष्ट्र्यस्य च वस्तुतः सूक्ष्मे भेदेऽपि नान्तरीयकतया तदनतिरिक्तस्यैवाध्यवसायात्।

मुनिवचनानुपालनस्य सम्भव उच्छृङ्खलताया अनौचित्यात्।[2] इत्थं ध्वनिकारादारभ्य पण्डितराजं यावत् सर्वेऽपि ध्वनिवादिनः चित्तवृत्तिरूपतां रसस्याभ्युपगच्छन्ति, विश्वनाथेन तु स्पष्टं भणितं यत्–

**'पुण्यवन्तः प्रमिण्वन्ति योगिवद् रससन्ततिम्।**[3]

1 व्यभिचारिभावनिरूपणे रसगङ्गाधरे प्रथमाननम्

2 व्यभिचारिभावनिरूपणे रसगङ्गाधरे प्रथमाननम्

3 साहित्यदर्पणः, तृतीयपरिच्छेदः

अर्थात् योगिनो यथा स्वाकाराभिन्नरूपेण परमात्मानं (परब्रह्म) जानन्ति तथैव पुण्यभाजः प्राक्तनपुण्यशालिनो स्वाकारावदभिन्नत्वेन रसपरम्परामनुभवन्ति, तदुक्तं तत्रैव रसस्वरूपनिरूपणे तेनैव –

**लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः।**
**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥**[1]

भट्टनायकस्तु योगिनामपेक्षया सचेतसां गौरवातिशयं वर्णयन्नाह –

**वाग्धेनुर्दुग्ध एतं हि रसं यद्बालतृष्णया।**
**तेन नास्य समः स स्याद् दुह्यते योगिभिर्हि यः॥**[2]

रूपकालङ्कारानुप्राणिते पद्येऽस्मिन् योगिनामपेक्षया सचेतसां गौरवातिशयं द्योतयन् भट्टनायको ब्रवीति यत् 'वागेव धेनुः तद्दुग्ध एव रसः स च रसः सहृदयरूपवत्स्यस्य तृष्णया स्वत एव प्रस्रवति, ततश्च यो रसो योगिभिः कष्टपूर्वकं परब्रह्मणि समास्वाद्यते सो रसः काव्यरसस्य समो नास्ति। योगिनां रसस्तु प्रयत्नसाध्यः सचेतसान्तु न तथा।

योगशास्त्रमिव काव्यशास्त्रेऽपि चित्तवृत्तीनां निरोधो दृश्यते। काव्यपठनकाले हि बाह्यमेयान्तरस्याभावो भवति, तदुक्तम्–

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।**
**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥**[3]

प्रमाता यदा रसमनुभवति तदवस्थायां विभावाद्यतिरिक्तज्ञेयान्तरस्य भानं न तस्योत्पद्यते, योगिनश्च यदा ध्यानमग्नाः, तदवस्थायां ध्येयातिरिक्तमेयान्तरस्य भानं न तेषामुपपद्यते। योगिनां यथा जन्मान्तरीया-क्लिष्टसंस्कारा[4] ध्याने सहायमर्पयन्ति तथैव सचेतसां प्राग्विनिविष्टिरत्यादि-वासना रसानुभवाय सहाया भवन्ति, तदुक्तम्–

**सवासनानां सभ्यानां रसस्यास्वादनो भवेत्।**
**निर्वासनास्तु रङ्गान्तः काष्ठकुड्यास्मसन्निभाः॥**

1 का. 3 तृतीयपरिच्छेदः साहित्यदर्पणः
2 का. 6 व्याख्याने लोचने प्रथमोद्योतः
3 का. 2 तृतीयपरिच्छेदः साहित्यदर्पणः
4 तथाजातीयकाः संस्कारा वृत्तिभिरेव क्रियन्ते संस्कारैश्च वृत्तयः। एवं वृत्तिसंस्कार च क्रमशिमावर्तते। सूत्रम् 5 व्याख्याने व्यासभाष्ये (योगशास्त्रम्)

योगिनो यथा वैराग्याभ्यासाभ्यां[1] चित्तवृत्तीनां निरोधं कुर्वन्ति, सचेतसस्तथा भूयो भूयः काव्यानुशीलनेन रसस्य साक्षात्करणस्य योग्यतां सम्प्राप्य रसमनुभवन्ति, तदुक्तम्–

येषां काव्यानुशीलनाभ्यासवशाद्विशदीभूते मनोमुकुरे वर्णनीयतन्मयी–भवनयोग्यता ते स्वहृदयसंवादभाजः सहृदयाः।[2]

अभ्यासेन यथा चित्तवृत्तिनिरोधस्तथा काव्यानुशीलनाभ्यासेन वाच्यव्यतिरिक्तस्य चमत्कारिणोऽर्थस्य (रसस्य) बोधः।

योगशास्त्रे यथा बौद्धार्थस्य सत्ता 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः'[3] इत्यादिसूत्रेऽभ्युपगता तथैव काव्यशास्त्रे बौद्धार्थस्य सत्ता प्रायशः सर्वत्र स्वीकृता, विशेषतः कविप्रौढोक्तिसिद्धः कविनिबद्धवक्तृप्रौढोक्तिसिद्धश्च न जातुचिल्लोके। काव्यक्षेत्रे यदि बौद्धार्थो न स्वीक्रियते तर्हि प्रायशः सर्वेषामलङ्काराणां नैरर्थक्यापत्तिः प्रसज्येत। पण्डितराजेन विशेषतो बौद्धार्थस्य निरूपणं कृतं, बोधितं च यद्वस्तु लोके न सम्भवति तथापि काव्ये कवि तस्यार्थस्य कल्पनं करोति तर्हि न कापि क्षतिः। उपमानिरूपणे पण्डितराजो बौद्धार्थविषये वक्ति यत्–

'ननु त्वयि कोपो ममाभाति सुधांशाविव पावकः' इत्यादावुपमानस्या–त्यन्तमसम्भावितत्वात्सादृश्यमेव न तावत्प्रतिपत्तुं शक्यम्। चमत्कारस्तु पुनः केन स्यादिति चेत्, कविना हि खण्डशः पदार्थोपस्थितिमता स्वेच्छया सम्भावितत्वेनाकारेण चन्द्राधिकरणकमनलं प्रकल्प्य तेन सह साम्यस्यापि कल्पने बाधकाभावात्। अत एव –

**स्तनाभोगे पतन्भाति कपोलात्कुटिलोऽलकः।**
**शशाङ्कबिम्बतो मेरौ लम्बमान इवोरगः।।**

इत्यादावपि नानुपपत्तिः।[4]

तदित्थं योगिनां सचेतसाञ्च तुल्यता, तथाहि चित्तवृत्तिनिरोधो योगिनां सुप्रसिद्ध एव, सचेतसामपि रसास्वादनकाले चित्तवृत्तिर्विभावादिविषयैव

1 अभ्यासवैरागाभ्यां तन्निरोधः, योगसूत्रम् 12 प्रथमपादः
2 का. 1 व्याख्याने लोचने प्रथमोद्योतः
3 योगसूत्रम् 9 प्रथमपादः
4 उपमानिरूपणे रसगङ्गाधरे द्वितीयमाननम्

भवति, न बाह्यमेयानां रसप्रतीतिकाले प्रादुर्भावः। ध्येयाकारिणी चित्तवृत्तिर्योगिनां (सम्प्रज्ञातयोगिनाम्) समाधौ समुदेति, विभावादिसमूहालम्बना चित्तवृत्तिः सचेतसां रसप्रतीतौ जागर्ति। रसविषयिणी चित्तवृत्तिः प्राग्विनिविष्टरत्यादि-वासनाद्वारेण सचेतसां जागर्ति, योगिनाञ्च ध्येयाकारा चित्तवृत्तिर्जन्मान्तरीया-क्लिष्टसंस्कारैः समुदेति, तदुक्तं योगभाष्यकारैः श्रीव्यासचरणैः –

'तथाजातीयकाः संस्कारा वृत्तिभिरेव क्रियन्ते संस्कारैश्च वृत्तयः। एवञ्च वृत्तिसंस्कारचक्रमनिशमावर्तते।'[1]

तथैव संस्काराणां विषये विश्वनाथेनाप्युक्तम् – न जायते तदास्वादो विना रत्यादिवासनाम्। वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः, तत्र यद्याद्या न स्यात्तदा श्रोत्रियजरन्मीमांसकादीनामपि स स्यात्। यदि द्वितीया न स्यात्तदा यद्रागिणामपि केषाञ्चिद्रसोद्बोधो न दृश्यते तन्न स्यात्।[2] योगिनो यथा वैराग्याभ्यासाभ्यां चित्तवृत्तीनां निरोधं कुर्वन्ति, सचेतसस्तथा काव्यानुशीलनाभ्यासेन व्यङ्ग्यार्थबोधनयोग्यतामर्जयन्ति। ध्वनिकारोऽपि ब्रवीति यत् सोऽर्थः (व्यङ्ग्यार्थः) अस्ति तत्प्रकाशकश्च कश्चन शब्दविशेष एव, न तु शब्दमात्रं ततश्च महाकवेः तौ शब्दार्थौ प्रत्यभिज्ञेयौ।[3]

सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।

यथा बहवः शब्दाः शिववाचकाः तथापि कालिदासो यदा वटुमुखेन शिवनिन्दां कारयति तदा शिवे दैन्यार्थस्य व्यञ्जनायै 'कपाली' इति शब्दं प्रयुङ्क्ते। पार्वतीमुखेन यदा शिवोत्कर्षं प्रकटयति तदा प्रभावातिशय-व्यञ्जनायै 'पिनाकी' इति शब्दं प्रयुङ्क्ते। तेन ज्ञायते यद्यपि नैकाः शब्दा लोके तथैवार्थाश्च तथापि विवक्षितैकार्थवाचकस्य व्यञ्जकस्य प्रसङ्गानुकूलस्यार्थस्य च ज्ञानाय सहृदयैः प्रयासो विशेषतः करणीयः। इत्थं सहृदयानाङ्कृतेऽपि अभ्यासो निर्दिष्टस्तथैव योगिनामपि कृतेऽभ्यासो निर्दिष्टः, तदुक्तं पतञ्जलिना 'अभ्यासवैराग्याभ्यां तन्निरोधः।[4] अभ्यासस्य स्वरूपं च

1 सूत्र 5 व्याख्याने योगव्यासभाष्ये

2 का. 8 वृत्तौ तृतीयपरिच्छेदः साहित्यदर्पणः

3 यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः।। का. 8 ध्वन्यालोकः प्रथमोद्योतः

4 योगसूत्रम् 12 प्रथमपादः

तत्र बोधितं यत् 'तत्र स्थितौ यत्नोऽभ्यासः'।[1] भाष्यकारेणात्र विशेषतोऽभ्यासनिरूपणं विहितं यत्–

'चित्तस्य अवृत्तिकस्य प्रशान्तवाहिता स्थितिः। तदर्थः प्रयत्नो वीर्यमुत्साहः तत्सम्पिपादयिषया तत्साधनानुष्ठानमभ्यासः।[2]

इत्थं योगिनां सचेतसाञ्च सादृश्यं दृश्यते। यद्यपि ध्वनिकारेण रसादीनां स्वरूपं न कुत्रापि निरूपितं, कारणं सः तु स्वप्रतिज्ञैकनिर्वहणे रतः। ध्वनिकारस्योद्देश्यः काव्यात्मतत्त्वस्य व्यङ्ग्यार्थस्य ध्वनेर्वा स्थापना, स चोद्देश्यः सम्यक् तेन सप्रमाणं पूर्णीकृतः। वाच्यव्यतिरिक्तस्यार्थस्य व्यञ्जनायाश्च स्थापनैव तस्य लक्ष्यमासीत्। परं लोचनकारस्तु सम्यक्तया ध्वनिकारस्य गहनगिरामभिप्रायं पदे पदे स्फोरयति। तत्र रसनिरूपणावसरे लोचनकृता रसानां चित्तवृत्तिरूपताङ्गीकृता, व्यभिचारिभावानाञ्च तथैव मुक्तकण्ठेन चित्तवृत्तिरूपता प्रतिपादिता।

साहित्यदर्पणकारस्तु ततोऽप्यधिकं वर्णयन् सचेतसां योगिभिस्सह तुलनां कुर्वन्नाह –

**पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिम्।**[3]

पण्डितराजस्तु वस्तुतः सर्वोत्कृष्टध्वनिमीमांसकः, तेन तु स्थायिभावानां रसानां व्यभिचारिभावानाञ्च लक्षणवाक्यघटकत्वेन शब्दशः चित्तवृत्तिरूपता तेषां मुक्तकण्ठेनोक्ता, यथा –

स्त्रीपुंसयोरन्योन्यालम्बनः प्रेमाख्यचित्तवृत्तिविशेषो रतिः स्थायिभावः।[4]

तथैव सर्वेषां स्थायिभावानां चित्तवृत्तिरूपता प्रतिपादिता, येषां वर्णनं विस्तरेण पूर्वमस्मिन्नेवाध्याये विहितम्। व्यभिचारिणामपि चित्तवृत्तिरूपता प्रतिपादिता, यथा–

भयवियोगादिप्रयोज्या वस्तुतत्त्वानवधारिणी चित्तवृत्तिर्मोहः।[5]

तथैव शेषाणामपि व्यभिचारिणाम्।

1 योगसूत्रम् 13 प्रथमपादः
2 योगसूत्र 12 व्याख्याने व्यासभाष्ये प्रथमपादः
3 का. 3 वृत्तौ साहित्यदर्पणः तृतीयपरिच्छेदः
4 रसनिरूपणे रसगङ्गाधरः प्रथमाननम्
5 व्यभिचारिभावनिरूपणे तत्रैव

रसस्य चित्तवृत्तिता निरूपयता जगन्नाथेन भणितं यत् 'विभावादि-चर्वणामहिम्ना सहृदयस्य निजसहृदयतावशोन्मिषितेन तत्तस्थाय्युपहितस्वस्व-रूपानन्दाकारा समाधाविव योगिनश्चित्तवृत्तिरूपजायते, तन्मयीभवनमिति यावत्।'[1]

बहुवक्तव्येन किं तथापि ब्रूमो यत् 'यथा चित्तवृत्तीनां निरोधो योगिनां[2] तथैव सचेतसामपि रसप्रतीतिकाले वेद्यान्तरशून्यता, तदुक्तम् –

**'वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः'।**[3]

तदित्थं सयुक्तिकं सप्रमाणञ्च योगशास्त्रावदानं ध्वनिस्थापने प्रदर्शितम्। यद्यपि ध्वनिकारादिभिर्न मुक्तकण्ठेन कुत्रापि व्याकरणशास्त्रमिव[4] योगशास्त्रावदानम् अङ्गीकृतं तथापि शोधप्रबन्धस्याध्यायेऽस्मिन् ध्वन्यालोक-लोचन-काव्यप्रकाश-साहित्यदर्पण-रसगङ्गाधराणां सूक्ष्मावलोकनपुरस्सरं योगसूत्रव्यासभाष्ययोश्च पर्यालोचनपुरस्सरं यत्र यत्र योगशास्त्रसिद्धान्तानामनुप्रवेशो ध्वनिवादीनां सिद्धान्तेष्वनुभूतं तेषां स्थलानां निर्देशनपूर्वकं सयुक्तिकं सप्रमाणञ्च योगशास्त्रस्य अवदानं यथामति प्रदर्शितम्।

◈ ◈ ◈

1 रसनिरूपणे तत्रैव

2 योगश्चित्तवृत्तिनिरोधः, योगसूत्रम् 2 प्रथमपादः

3 का. 3 साहित्यदर्पणः तृतीयपरिच्छेदः

4 प्रथमे हि विद्वांसो वैयाकरणा ....... का. 13 वृत्तौ ध्वन्यालोकः प्रथमोद्योतः

# पञ्चमोऽध्यायः

## ध्वनिस्थापने पूर्वोत्तरमीमांसादर्शनयोरवदानम्

सम्प्रति ध्वनिस्थापने पूर्वोत्तरमीमांसादर्शनयोरवदानं प्रदर्श्यते। यद्यपि ध्वनिवादिभिराचार्यैर्न कुत्रापि मुक्तकण्ठेन व्याकरणातिरिक्तस्य[1] कस्यापि शास्त्रान्तरस्यावदानं ध्वनिस्थापने स्वीकृतं तथापि तेषां सिद्धान्तेषु विशेषतो रसनिरूपणावसरेषु दर्शनान्तराणां सिद्धान्तानां बाहुल्येन समवलोकनात् तथा 'सकलशास्त्रसारं साहित्यम्' इति विदुषां भणितिं निशम्य 'ध्वनिस्थापने व्याकरणदर्शनशास्त्रयोरवदानम्' इति शीर्षकं समवलम्ब्य शोधप्रबन्धेऽस्मिन् मे प्रवृत्तिः।

तत्र प्रथमाध्याये ध्वनिकारलोचनकारयोः परिचयपुरस्सरं द्वितीयाध्याये ध्वनिसिद्धान्तोपजीव्यस्य व्याकरणशास्त्रस्यावदानं तावत् प्रदर्शितम्। तृतीयाध्याये काश्मीरशैवदर्शनस्यावदानं सयुक्तिकं सप्रमाणञ्च ध्वनिस्थापने सविस्तरं प्रदर्शितम्। तथाहि ध्वनिस्थापनावसरे वाच्यव्यङ्ग्ययोर्घटप्रदीपन्यायस्तावद् ध्वनिकृता स्वीकृतः, तदुक्तम् –

तस्माद् घटप्रदीपन्यायस्तयोः। यथैव हि प्रदीपद्वारेण घटप्रतीवावुत्पन्नायां न प्रदीपप्रकाशो निवर्तते तद्वद् व्यङ्ग्यप्रतीतौ वाच्यावभासः।[2]

शैवदर्शनेऽपि परमशिवः स्वयं प्रकाशयन् क्षितिपर्यन्तानि षट्त्रिंशत्तत्त्वानि प्रकाशयति,[3] ध्वनिकारश्च 'स्वरूपं प्रकाशयन् परावभासको

1 प्रथमे हि विद्वांसो वैयाकरणा ........ तन्मतानुसारिभिः ........ व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः, का. 13 वृत्तौ प्रथमोद्योतः ध्व. लो.

2 का. 33 वृत्तौ तृतीयोद्योतः ध्वन्यालोकः

3 आत्मैव सर्वभावेषु स्फुरन् निर्वृतचिद्विभुः।
अनिरूद्धेच्छाप्रसरः प्रसरद्दृक्क्रियः शिवः।।
शिवदृष्टिः प्रथमाह्निकम् श्लो. 2

व्यञ्जकः[1] इति व्यञ्जकस्वरूपं ब्रवीति तथा ध्वनिकारः स्वयं महान् शैवदार्शनिको वर्तते, ततश्च घटप्रदीपन्यायस्य मूलं काश्मीरशैवदर्शनमस्ति। लोचनकारश्च ध्वनिकारविषये लोचने लिखति यत् –

'येऽप्यविभक्तं स्फोटं वाक्यं तदर्थं चाहुः, तैरप्यविद्यापदपतितैः सर्वेयमनुसरणीया प्रक्रिया। तदुत्तीर्णत्वे तु सर्वं परमेश्वराद्वयं ब्रह्मेत्यस्मच्छास्त्रकारेण न न विदितं तत्त्वालोकग्रन्थं विरचयतेत्यास्ताम्।[2]

अनेन लोचनकारवचनेनापि सिद्ध्यति यत् ध्वनिकारो महान् शैवदार्शनिकः, ततश्च शैवदर्शनावदानं सयुक्तिकं सप्रमाणञ्च तृतीयाध्याये प्रदर्शितम्। चतुर्थाध्याये पुनः सांख्ययोगदर्शनयोरवदानं ध्वनिस्थापने प्रदर्शितम्। तथा हि व्यङ्ग्यार्थस्य सत्तायां ध्वनिकारेण तद्भानं प्रमाणत्वेनाभ्युपगतं तदुक्तम् –

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥**[3]

अत्र 'विभातीति' पदेन तदर्थस्य सत्ता ध्वनिकृता स्वीकृता, लोचनकारश्च ततोऽप्यधिकं ब्रवीति यत् 'यदेवंविधमस्ति तद्भाति। न ह्यत्यन्तासतो भानमुपपनम्। रजताद्यपि नात्यन्तमसद्भाति। अनेन सत्त्वप्रयुक्तं तावद्भानमिति भानात्सत्त्वमवगम्यते। तेन यद्भाति तदस्ति तथेत्युक्तं भवति।'[4]

सांख्येऽपि सत्कार्यवादे 'असतः सत्ता नाङ्गीकृता' असदकरणा-दित्यादिभिर्वचनैः।[5] तेन हेतुना सांख्यस्यावदानं सविस्तरं प्रदर्शितम्। तत्रैव च योगशास्त्रावदानं चित्तवृत्तिमाध्यमेन प्रस्तुतं, तथाहि सर्वेऽपि रसाः चित्तवृत्तिरूपाः। सचेतसश्च योगिनामिव रसमनुभवन्ति, तदुक्तं विश्वनाथेन-

**पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिम्।**[6]

---

1 तत्रैव तृतीयोद्योते
2 का. 4 व्याख्याने लोचने प्रथमोद्योतः
3 का. 4 ध्वन्यालोकः प्रथमोद्योतः
4 तत्रैव व्याख्याने लोचनकारः
5 असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।। का. 8 सांख्यकारिका
6 का. 3 वृत्तौ साहित्यदर्पणः, तृतीयपरिच्छेदः

तेन योगिनामिव सचेतसामपि वर्णनात् सयुक्तिकं प्रमाणञ्च योगशास्त्रावदानं चतुर्थाध्याये प्रदर्शितम्।

सम्प्रति पूर्वोत्तरमीमांसादर्शनयोरवदानं ध्वनिस्थापने प्रदर्श्यते। तथाहि पूर्वोत्तरभेदेन मीमांसादर्शनं द्विविधं, तत्र पूर्वमीमांसायां प्राधान्येन यागादिनिरूपणं तदङ्गत्वेन वैदिकवाक्यानां ज्ञानाय शब्दव्यापाराणामपि वर्णनम्। शब्दप्रमाणस्य लक्षणमित्थं ते (मीमांसकाः) वदन्ति यत् 'यस्य वाक्यस्य तात्पर्यविषयी–भूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम्।

ते वाक्यज्ञानाय तात्पर्यस्यापि योग्यताकाङ्क्षासत्तिभिः सह कारणतामङ्गीकुर्वन्ति। कुमारिलभट्टानुयायिनश्च तात्पर्यवृत्तिं वाक्यार्थज्ञानाय मन्वते, भट्टलोल्लटधनिकप्रभृतयस्तु तस्याः तात्पर्यवृत्त्या सर्वेषामपि वाच्यलक्ष्यव्यङ्ग्यादीनामर्थानां बोध्यतां स्वीकुर्वन्ति। ध्वनिवादिभिराचार्यैः प्राधान्येन व्यञ्जनायाः स्थापनं तेषां (मीमांसकानां) मतखण्डनपुरस्सरमेव विहितम्। इत्थं व्यञ्जनायाः समुल्लासे तात्पर्यवृत्तिवादीनां 'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः, यत्परः शब्दः स शब्दार्थः 'इत्येवंरूपा युक्तयः स्वयमहमहम्पूर्विकया परापतन्ति। इत्थं निषेधमुखेन व्यङ्ग्यव्यञ्जकभावज्ञानाय पूर्वमीमांसाचार्या ध्वनिस्थापने महद् सहाय्यमर्पयन्तीति ध्वनिस्थापने तेषामवदानं सविस्तरमग्रेऽस्मिन्नेवाध्याये सप्रमाणं दर्शयिष्यते।

'रसो वै सः' इति श्रुतिमनुसृत्य रसगङ्गाधरकारेण विद्याकाननकेसरिणा पण्डितराजजगन्नाथेन वेदान्तानुसारं रसवर्णनं कृतं तथा विश्वनाथेनापि साहित्यदर्पणे ब्रह्मास्वादसहोदरत्वेन रसस्य व्यपदेशो विहितः, तदुक्तम् –

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।**
**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥**
**लोकोत्तरचमत्कारप्राणः कैश्चिद् प्रमातृभिः।**
**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥**[1]

यदा पर्यन्तं ब्रह्मास्वादसहोदरान्तर्वर्ति 'ब्रह्म' इत्यस्य ज्ञानं नास्ति न तावद् काव्यात्मभूतस्य रसस्य ज्ञानम्। 'ब्रह्म' च वेदान्तस्य विषयः, ततश्च रसज्ञानाय वेदान्तस्य ज्ञानं नितरामावश्यकम्। अर्थात् 'काव्यस्यात्मा ध्वनिः'[2]

1 का. 2,3 साहित्यदर्पणः तृतीयपरिच्छेदः
2 का. 1 ध्वन्यालोकः प्रथमोद्योतः

इति प्रतिज्ञाय वस्त्वलङ्काररसरूपस्य त्रिविधस्य ध्वनेर्मध्ये रसध्वनिरेव काव्यात्मत्वेन ध्वनिकृता स्वीकृतः, तदुक्तम् –

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥**[1]

तेन रसध्वनिरेव काव्यस्यात्मा, विश्वनाथपण्डितराजजगन्नाथप्रभृतिभिः तस्य (रसस्य) कृते 'ब्रह्मास्वादसहोदरः' इत्यादिशब्दः प्रयुक्तः। रसव्याख्यानञ्च वेदान्तानुसारं विहितं तेन रसस्य ज्ञानाय वेदान्तज्ञानमावश्यकं, तदित्थं ध्वनिस्थापने वेदान्तावदानमस्ति।

सम्प्रति यावदपेक्षितमेव वेदान्तस्वरूपं परिचयो वा संक्षेपेणात्र प्रस्तूयते।

**उत्तरमीमांसा ( वेदान्तः )**

वैदिकवाक्यविवेचनमेव मीमांसादर्शनस्य प्रयोजनम्। तच्च मीमांसादर्शनं पूर्वोत्तरभेदेन द्विविधं, तत्र पूर्वमीमांसायां वैदिककर्मकाण्डभागस्य विवेचनं 'अथातो धर्मजिज्ञासा'[2] 'चोदनालक्षणो धर्मः'[3] इत्यादिभिः सूत्रैर्जैमिनिमुनिना कृतम्। धर्मस्य प्राधान्येन विचारोऽत्र पूर्वमीमांसायां कृतः।

उत्तरमीमांसायां वैदिकज्ञानकाण्डस्य विवेचनं बादरायणवेदव्यासेन विहितं 'अथातो ब्रह्मजिज्ञासा'[4] इत्यादिभिः ब्रह्मसूत्रैः। शास्त्रस्य गाम्भीर्यं क्रमिकबुद्धिह्रासञ्च जनानां समवलोक्य परमकारुणिकेन बादरायणव्यासेन वेदान्तशास्त्रस्य तात्पर्यनिर्णयार्थं वेदान्तमीमांसारूपेण ब्रह्ममीमांसारूपेण वा ब्रह्मसूत्रं व्यधायि। ब्रह्मसूत्रं समवलम्ब्य श्रीशङ्कराचार्यरामानुजमाध्वादिभिर्नैके वादाः (अद्वैत-विशिष्टाद्वैत-द्वैतादयः) प्रवर्तिताः। सर्वेषां तेषां वादानां तात्पर्यं मोक्षप्राप्तिरेव। सम्प्रति श्रीशङ्कराचार्यस्य ब्रह्माद्वैतवादस्यैव प्रकृतशोधकार्यस्य ध्वनिस्थापने नितरामपेक्षितत्त्वात्तस्य प्रकृतोपयोगिनः प्रमुखसिद्धान्तान् प्रतिपादयामि।

---

1 का. 5 ध्वन्यालोकः प्रथमोद्योतः

2 जैमिनिसूत्रम् प्रथमाध्यायः

3 तत्रैव

4 प्रथमब्रह्मसूत्रम्

**ब्रह्मस्वरूपं साधनञ्च**

अद्वैतवादिनो 'ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः'[1] इत्यमुं सिद्धान्तं मन्वते। देहेन्द्रियादिव्यतिरिक्तस्य जीवस्य स्वस्वरूपज्ञानाय 'तत्त्वमसि' 'अहं ब्रह्मास्मि' इत्याद्युपनिषद्वाक्यानां मीमांसां ते कुर्वन्ति। मायाप्रभृतीनां स्वरूपञ्च बोधयन्ति। तत्र ब्रह्मज्ञानाय विज्ञैः शिष्याणामुपदेशार्थं पूर्वमध्यारोपस्य तदनु अपवादन्यायस्य निरूपणं क्रियते, तदुक्तम् –

**अध्यारोपापवादाभ्यां निष्प्रपञ्च प्रपञ्च्यते।**
**शिष्याणां बोधिसिध्यर्थं तत्त्वज्ञैः कल्पितः क्रमः।।**[2]

अर्थात् साधनचतुष्टयसम्पन्नाधिकारी[3] यदा जननमरणादि-संसारानलसंतप्तो श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति तदा गुरुः परमकृपया अध्यारोपापवादन्यायेनैनमुपदिशति।

असर्पभूतायां रज्जौ यथा सर्पारोपः तथैव सच्चित्सुखात्मकवस्तुनि 'ब्रह्मणि' तदतिरिक्तस्याज्ञानादेरारोप 'अध्यारोपः'। तदुक्तम् –

'असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपोऽध्यारोपः। वस्तु सच्चिदानन्दानन्ताद्वयं ब्रह्म। अज्ञानादिसकलजडसमूहोऽवस्तु।[4]

तथा तस्य मिथ्यासर्पस्यापाकरणेन वास्तविकरज्जुमात्रस्य स्थापनमेव 'अपवादः'। तदुक्तम् –

'अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तु-विवर्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्'।[5]

तथाहि गुरुः पूर्वमध्यारोपन्यायेन शिष्यं बोधयति यत् यथा अवास्तविकेन सर्पेण वस्तुभूतस्य रज्जुरूपस्यापहरणं क्रियते। तथैव मायया (अज्ञानेन) वास्तविकस्य ब्रह्मस्वरूपस्यापहरणं क्रियते। तथाहि – मायायाः

---

1 ब्रह्मसूत्रशाङ्करभाष्ये शङ्कराचार्यः

2 वेदान्तसारभूमिकायां डॉ. शिवसागरत्रिपाठी

3 साधनानि नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरागशमादिषट्क-सम्पत्तिमुमुक्षत्वानि। वेदान्तसारः, अधिकारीनिरूपणम्

4 अज्ञाननिरूपणे वेदान्तसारः

5 तत्रैव

आवरणविक्षेपनामकं शक्तिद्वयं, तत्रावरणशक्तिः ब्रह्मरूपस्य गोपनं करोति तदनु जीवस्य कर्तृत्वभोक्तृत्वादिज्ञानं विक्षेपशक्तिः कारयति। विक्षेपशक्तिस्तु पृथ्व्यादिप्रपञ्चमुद्भावयति तदुक्तम् –

**शक्तिद्वयं हि मायायाः विक्षेपावृत्तिरूपकम्।**
**विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेत्॥**
**अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्पयोः।**
**आवृणोत्यपरा शक्तिः सा संसारस्य कारणम्॥**[1]

**माया**

अद्वैतवादे जगतो मिथ्यात्वं मायामाश्रित्य क्रियते। तथाहि तस्याः शक्तिद्वयं या ब्रह्मस्वरूपमावृणोति सा आवरणशक्तिः तदनु या 'आवृतं ब्रह्मस्वरूपमन्यतया (आकाशादिरूपेण) भासयति सा विक्षेपशक्तिः। अनयैव जगतः व्यवहारिकसत्ता। अर्थात् सत्तात्रयं वेदान्तिनो वदन्ति। प्रथमा तावत् प्रातिभासिकसत्ता यथा रज्जौ सर्पस्य प्रतीतिः, द्वितीया तु व्यवहारिकसत्ता, यथा संसारकाले वस्तुजातस्य, तृतीया तु पारमार्थिकसत्ता, यथा ब्रह्मसत्ता। इयं माया भ्रमकाले रज्ज्वादौ सर्पादीन् दर्शयति, तेन च पलायनादिक्रिया च दृश्यते, तेनेयं सद्रूपा, यदा पुनः प्रकाशकेन सर्पादेरपाकरणं, तेन 'असद्रूपा' च तेन सदसद्रूपेयं (अनिर्वचनीया) माया। तदुक्तं शङ्कराचार्येण –

**अव्यक्तनाम्नी परमेशशक्ति अनाद्यविद्या त्रिगुणात्मिका परा।**
**कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते॥**[2]

अध्यारोपापवादन्यायेन ब्रह्मस्वरूपं निरूप्य 'तत्त्वमसि'[3] इत्युपदेशवाक्येन गुरुः शिष्यं ब्रह्मज्ञानं कारयति। जहदजहल्लक्षणया (वाच्यैकदेशपरित्यागेनैकदेशवृत्तिः) तत्त्वमसीति शक्यान्तर्गतयोः 'तत्त्वम्' इति पदयोः अपरोक्षत्वपरोक्षत्वादिविरुद्धांशयोः त्यागेन अविरुद्धमखण्डचैतन्यमात्रं लक्षयति। यथा 'सोऽयं देवदत्तः' वाक्येऽस्मिन् 'तत्पदेन' तत्कालतद्देशविशिष्टस्य देवदत्तस्य ज्ञानं तथा 'इदम्' इति पदेन एतत्कालैतद्देशविशिष्टस्य देवदत्तस्य

1 तत्रैव

2 मायानिरूपणे शाङ्करभाष्ये

3 छान्दोग्योपनिषत् षष्ठाध्यायः

ज्ञानं तथाप्यत्र तयोः पदयोः ('सोऽयम्' अनयोः) देवदत्तरूपेकस्मिन् चैतन्ये तात्पर्यं तथा तत्र भागलक्षणया (जहदजहल्लक्षणया) विरुद्धांशपरित्यागेन (तत्कालतद्देश-एतत्कालैतद्देश-विशिष्टत्वपरित्यागेन) अविरुद्धांशमादाय (देवदत्तमात्रमादाय) सङ्गतिः क्रियते। तथैव 'तत्त्वमसि' वाक्येऽपि। तदुक्तम्-

'यथा 'सोऽयं देवदत्तः' इति वाक्यं तदर्थो वा तत्कालैतत्काल-विशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धतत्कालैतत्कालं विशिष्टत्वांशं परित्यत्याविरुद्धं देवदत्तांशमात्रं लक्षयति तथा तत्त्वमसीति वाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वांशं परित्यज्याविरुद्धमखण्डचैतन्यमात्रं लक्षयतीति।'[1]

यदा वेदान्तगुरुः 'तत्त्वमसीत्यत्र' 'तत्' 'त्वम्' इति पदार्थौ सम्यक्तयावबोध्य शिष्यं ब्रह्मस्वरूपं बोधयति तदा तद्वाक्यमनुस्मरतः शिष्यस्य 'अहं ब्रह्मास्मि' इत्याकाराखण्डचित्तवृत्तिरूदेति यदहं नित्यशुद्धबुद्धमुक्त-स्वभावब्रह्मास्मीति। तदुक्तम्-

'एवमाचार्येणाध्यारोपापवादपुरःसरं तत्त्वम्पदार्थौ शोधयित्वा वाक्येना-खण्डार्थेऽवबोधितेऽधिकारिणोऽहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावापरमानन्दा-नन्ताद्वयं ब्रह्मास्मीत्यखण्डाकाराकारिता चित्तवृत्तिरूदेति।'[2]

तादृशस्य शिष्यस्य ब्रह्मणः साक्षात्कारपर्यन्तं श्रवणमनन-निदिध्यासनसमाधिरूपस्य साधनस्यापेक्षा।[3] एतेषां साधनानामनुष्ठानेन स्वस्वरूपं ज्ञात्वा सर्वबन्धनरहितस्सन् जीवन्मुक्तो भवति। प्रारब्धवशाद् भुज्यमानानि कर्माणि पश्यन्नपि परमार्थतो न पश्यति, यथा कश्चन ऐन्द्रजालमिति ज्ञानवांस्तदिन्द्रजालं पश्यन्नपि न पश्यति। प्रारब्धफलानि चोपभुज्य ब्रह्मलीनो भवति। अयमेव मोक्षः। तदुक्तं 'विवेकचूडामणिग्रन्थे' -

**वेदान्तसिद्धान्तनिरूक्तिरेषा**
**ब्रह्मैव जीवः सकलं जगच्च।**

1 जहदजहदल्लक्षणानिरूपणे वेदान्तसारः
2 अनुभववाक्यनिरूपणे वेदान्तसारः
3 अनुभववाक्यनिरूपणे वेदान्तसारः

**अखण्डरूपस्थितिरेव मोक्षो**
**ब्रह्माद्वितीये श्रुतयः प्रमाणम्।।**[1]

सम्प्रति ध्वनिस्थापने वेदान्तस्यावदानं प्रदर्श्यते। ध्वनिकारस्य मूलग्रन्थे साक्षाद् यद्यपि वेदान्तसिद्धान्तस्य प्रयोगो नास्ति, परं ध्वनिकृता यदुक्तम् –

**अर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।**
**वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ।।**[2]

इत्यत्र लोचनकृता यद्व्याख्यातं तत्र भूयसा वेदान्तसिद्धान्तानां प्रयोगो दृश्यते। लोचनकारो ब्रवीति यत्–

'शब्दार्थशरीरं काव्यमिति' यदुक्तं, तत्र शरीरग्रहणादेव केनचिदात्मना तदनुप्राणकेन भाव्यमेव। तत्र शब्दस्तावच्छरीरभाग एव सन्निविशते सर्वजन-संवेद्यधर्मत्वात्स्थूलकृशादिवत्। अर्थः पुनः सकलजनसंवेद्यो न भवति। न ह्यर्थमात्रेण काव्यव्यपदेशः, लौकिकवैदिकवाक्येषु तदभावात्। तदाह – सहृदयश्लाघ्य इति। स एक एवार्थो द्विशाखतया विवेकिभिर्विभागबुद्ध्या विभज्यते।

तथाहि तुल्येऽर्थरूपत्वे किमिति कस्मैचिदेव सहृदयाः श्लाघन्ते। तद्भवितव्यं तत्र केनचिद्विशेषेण। यो विशेषः स प्रतीयमानभागो विवेकिभिर्विशेष-हेतुत्वादात्मेति व्यवस्थाप्यते। वाच्यसंवलनाविमोहितसहृदयैस्तु तत्पृथग्भावे विप्रति-पद्यते, चार्वाकैरिवात्मपृथग्भावे। अत एव अर्थ इत्येकतयोपक्रम्य सहृदयश्लाघ्य इति विशेषणद्वारा हेतुमभिधायापोद्धारदृशा तस्य द्वौ भेदावंशावित्युक्तम्, न तु दावप्यात्मानो काव्यस्येति।[3]

लोचनकारस्य व्याख्यानेऽत्र स्फुटतया वेदान्तस्य दर्शनं भवति, तथाहि लोचनकारो ब्रवीति यत् 'भामहेनोक्तं शब्दार्थशरीरं काव्यं, तत्र शरीरग्रहणादेव ज्ञायते कश्चन आत्मा तस्मिन् शब्दार्थशरीररूपे काव्ये तदनुप्राणकत्वेन स्यादेव, शब्दस्तु स्थूलो भवति सर्वजनसंवेद्यश्च तेन न सः काव्यात्मा भवितुमर्हति, आत्मा तु सूक्ष्मरूपः शब्दस्तु न तथा, तर्हि प्रश्नो

1 श्लो. 479 विवेकचूडामणिः
2 का. 2 ध्व. लो. प्रथमोद्योतः
3 का. 2 व्याख्याने लोचने प्रथमोद्योतः

भवति किं तर्हि अर्थः काव्यात्मा स तु शब्दापेक्षया सूक्ष्मो भवति सर्वजनसंवेद्यश्च नास्ति तदा स्वयं खण्डयति यद्यर्थः काव्यस्यात्मा तर्हि पुराणेतिहासवेदादीनामपि काव्यत्वापत्ति स्यात्, कारणं तेष्वपि अर्थः तिष्ठत्येव। पुनरपि जिज्ञासा समुदेति कः तर्हि काव्यस्यात्मा, तर्हि ध्वनिकृतोक्तं 'सहृदयैः श्लाघ्यो योऽर्थः (प्रतीयमानार्थः) स एव वस्तुतः काव्यस्यात्मा।

पुनरपि शङ्का समुदेति यत् अर्थत्वस्य वाच्येऽर्थे प्रतीयमानार्थे च तुल्यत्वात् प्रतीयमानार्थमेव कस्मात् सहृदयाः श्लाघन्ते, तत्र भवितव्यं केनचिद्विशेषेण? तर्हि स्वयं समादधाति यत् 'तत्र यः प्रतीयमानभागः स एव विशेषतया चमत्कारी ततश्च विवेकिभिः तस्य वाच्यार्थतो भेदः क्रियते तथा काव्यात्मत्वेन सो व्यवस्थाप्यते। ये वाच्यार्थस्य वासनया विमोहिता ते तस्य प्रतीयमानार्थस्य वाच्यार्थतो भेदं तथैव न मन्वते यथा चार्वाकाः शरीरातिरिक्तस्यात्मनः सत्तां नाङ्गीकुर्वन्ति। वस्तुतस्तु यथा देहातिरिक्तस्य देहिनः (आत्मनः) सत्ता तथैव वाच्यातिरिक्तस्य प्रतीयमानस्य सत्ता।

वेदान्तदर्शने देहातिरिक्तस्यात्मनः सत्ता स्वीकृता। तत्रापि देहात्मवादीनां चार्वाकादीनां खण्डनं विहितं तदुक्तं वेदान्तसारे –

'चार्वाकस्तु 'स वा एष पुरुषोऽन्नरसमय' इत्यादिश्रुतेः प्रदीप्तगृहात् स्वपुत्रं परित्यज्यापि स्वस्थनिर्गमदर्शनात्तु स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरात्मेति वदति।'[1]

मम्मटाचार्योऽपि रसनिरूपणावसरे वक्ति यत् 'ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी शृङ्गारादिको रसः'।[2]

विश्वनाथोऽपि साहित्यदर्पणे रसनिरूपणावसरे वक्ति यत्–

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।**
**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥**
**लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः।**
**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥**[3]

1 जीवात्मसम्बन्धनिरूपणे वेदान्तसारः
2 रसनिरूपणम्, काव्यप्रकाशः, चतुर्थोल्लासः
3 का. 2,3 साहित्यदर्पणः, तृतीयपरिच्छेदः

रसस्वरूपेऽस्मिन् सर्वस्यापि वेदान्तदर्शनस्य दर्शनं भवति, तथाहि विश्वनाथो वक्ति यत् 'सत्त्वगुणस्याधिक्यात् विभावादिसमूहालम्बनत्वात् अखण्डः स्वतः प्रकाशमानः, सुखमयः, चिन्मयः (ज्ञानस्वरूपः) विभावानुभावव्यभिचारिव्यतिरिक्तज्ञेयान्तरसम्पर्करहितः ब्रह्मसाक्षात्कारसदृशः, लोकोत्तरचमत्कारजीवनरूपः, कैश्चित् प्राक्तनपुण्यशालिभिः प्रमातृभिः निजस्वरूपवत् भेदरहितत्वेन रसोऽयमास्वाद्यते।

वेदान्तदर्शनेऽपि साधनचतुष्टयसम्पन्नः प्रमाता च 'तत्त्वमसि' प्रभृतिगुरूपदेशवाक्येन गुरुपदिष्टेनाध्यारोपापवादन्यायेन च स्वप्रकाशानन्दचिन्मयं बाह्यज्ञेयान्तरस्पर्शशून्यं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं स्वस्वरूपाभिन्नत्वेन ब्रह्मसाक्षात्कारं करोति, तदुक्तम्-

'एवमाचार्येणाध्यारोपापवादपुरःसरं तत्त्वम्पदार्थौ शोधयित्वा वाक्येनाखण्डार्थेऽवबोधितेऽधिकारिणोऽहं नित्यशुद्धबुद्धमुक्तसत्यस्वभाव-परमानन्दानन्ताद्वयं ब्रह्मास्मीत्यखण्डाकाराकारिता चित्तवृत्तिरूदेति।'[1]

तदित्थं वेदान्तदर्शनस्य नितरां साम्यं दृश्यते रसध्वनौ, तथाहि ब्रह्मसाक्षात्कारः परमं प्रयोजनं योगिनां तथैव रसास्वादनं मौलिभूतं प्रयोजनं सचेतसाम्। ब्रह्मसाक्षात्काराय यथा 'काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिक-प्रायश्चित्तोपासनानामनुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधन-चतुष्टयसम्पन्नः प्रमाता[2] 'अधिकारी' भवति, तथैव रसास्वादनाय 'काव्यानुशीलनाभ्यासवशाद्विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवन-योग्यतायुक्ताः स्वहृदयसंवादभाजः सहृदयाः[3] एवाधिकारिणः। सत्त्वं सुखे सञ्जयति[4] इति श्रीमद्भगवद्गीतानुसारेण सत्त्वगुणो ज्ञाने सुखे च प्रवर्तयति तदुक्तं तत्रैव श्रीमद्भगवद्गीतायाम्-

**तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्।**
**सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ।।**[5]

---

1 अनुभववाक्यनिरूपणे वेदान्तसारः
2 अधिकारीनिरूपणे वेदान्तसारः
3 का. 1 व्याख्याने लोचनकारः, प्रथमोद्योतः
4 श्रीमद्भगवद्गीता 8/14
5 श्रीमद्भगवद्गीता 5/14

तथा च –

**सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते।**
**ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत॥**[1]

इति सिद्धान्तानुसारं सत्त्वगुणो यथा योगिनो ब्रह्मसाक्षात्काराय प्रवर्तयति तथैव सहृदयान् रसास्वादनाय कल्पते। ब्रह्मज्ञाने यथा बाह्यजगदादिवेद्यान्तरस्य न भानं तथैव रसास्वादने विभावाद्यतिरिक्तज्ञेयान्तरस्य न भानम्। योगिनां यथा ब्रह्मविषयिणी शुद्धाखण्डाकारकारिणी चित्तवृत्तिरूदेति, सचेतसां तथा रसविषयिणी विभावादिसमूहालम्बनात्मिका चर्वणा समुदेति। यथा सर्वे ब्रह्मसाक्षात्काराय समर्था नैव भवन्ति, तथैव सर्वेऽपि पाठका रसास्वादनाय न प्रभवन्ति, तदुक्तम्–

**पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिम्।**[2]

रत्यादिवासनासम्पन्नानामेव रसोद्बोधः, तदुक्तम्–

**सवासनानां सभ्यानां रसस्यास्वादनं भवेत्।**
**निर्वासनास्तु रङ्गान्तः काष्ठकुड्यास्मसन्निभाः॥**[3]

ब्रह्मानन्दो यथा बुद्धिर्ग्राह्यो यत्र च योगी स्वस्वरूपान्न व्यभिचरति, तदुक्तम्–

**सुखमात्यान्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्।**
**वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः॥**[4]

तथैव रसास्वादनमपि सहृदयहृदयग्राह्यं, तत्रापि सहृदयः स्वानन्दरूपाद्रसान्न विमुखी भवति, तदुक्तम् –

**करुणादावपि रसे जायते यत्परं सुखम्।**
**सचेतसामनुभवः प्रमाणं तत्र केवलम्॥**[5]
**किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः।**
**तथा रामायणादीनां भविता दुःखहेतुता॥**[6]

1 श्रीमद्भगवद्गीता 11/14
2 का. 3 वृत्तौ साहित्यदर्पणः तृतीयपरिच्छेदः
3 तत्रैव तृतीयपरिच्छेदः साहित्यदर्पणः
4 श्रीमद्भगवद्गीता 21/6
5 का. 4 सा. द. तृ. परिच्छेदः
6 का. 5 सा. द. तृ. परिच्छेदः

योगी यथा सर्वत्रैकत्वमनुपश्यति, तदुक्तम् –

**विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।**
**शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥**[1]

सचेतसस्तथा रसास्वादने 'ममैवैते, शत्रोरेवैते, तटस्थस्यैवैते, न ममैवैते, न शत्रोरेवैते, न तटस्थस्यैवैते, इत्थं सम्बन्धविशेषस्य स्वीकारपरिहारौ न कुर्वन्ति, तदुक्तम् –

**परस्य न परस्येति ममेति न ममेति च।**
**तदास्वादे विभावादेः परिच्छेदो न विद्यते॥**[2]

ब्रह्मसाक्षात्कारो यथा 'अलौकिकः' तथा रसास्वादनमपि। तथाहि यत् तत्त्वं लौकिकं तत्स्वरूपं वक्तुं शक्यते, ब्रह्मज्ञानं, रसास्वादनञ्च न जातुचित् शब्देन वर्णयितुं शक्यं, तत्र केवलं स्वानुभवैकप्रमाणं, शब्दव्यापारस्याविषयत्वादुभावपि लोकोत्तरचमत्कारप्राणरूपौ। न कोऽपि ब्रह्मस्वरूपकथने क्षमः, तदुक्तम्–

**'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह।'**[3]
**'न तत्र चक्षुर्गच्छति न वाग् गच्छति न मनो गच्छति'।**[4]
**'यन्मनसा न मनुते'**
**इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।**
**मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥**[5]
**आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः।**
**आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्॥**[6]

इत्थं वेदोपनिषद्वाक्यैः तस्य ब्रह्मस्वरूपस्यालौकिकता वर्णिता, तेन 'अलौकिकचमत्कारप्राणो ब्रह्मस्वरूपः'। रसोऽपि न जातु साक्षात् रसादिपदेन व्यपदेश्यो भवति। प्रत्युत विभावादिभिर्व्यङ्ग्यो भवति, सो न कदाचित्

1 श्रीमद्भगवद्गीता 18/5
2 का. 12 सा. द. तृ. प.
3 तैत्तिरीयोपनिषत्
4 श्वेतातरोपनिषत्
5 श्रीमद्भगवद्गीता 42/3
6 श्रीमद्भगवद्गीता 29/2

निर्विकल्पकज्ञानस्य विषयो, नापि सविकल्पकज्ञानस्य। तत्र 'नामजात्यादि-योजनासहितं ज्ञानं सविकल्पकम्' यथा घटादिज्ञानं, सविकल्पकज्ञानस्य यो विषयः स शब्दव्यवहारस्यापि विषयो भवति, रसानुभूतिस्तु स्वसंवेदनमात्ररूपा भवति, तेन न सा शब्दव्यवहारस्य विषयः। अतः सविकल्पकं ज्ञानं न रसग्राहकं, निर्विकल्पकं ज्ञानमपि तद्ग्राहकं नास्ति, कारणं नामजात्यादि-योजनारहितं बालमूकादिविज्ञानसदृशं निर्विकल्पकं ज्ञानम् भवति, रसे तु विभावादीनां परामर्शः प्राधान्येन भवत्येव, ततश्च न सो (रसः) निर्विकल्पकज्ञानस्यापि विषयः। उभयाभावरूपस्य (सविकल्पकनिर्विकल्प-कत्वमपि) नृसिंहवत् लोकोत्तरतामेव गमयति। अतः सोऽपि (रसः) लोकोत्तरचमत्कारप्राणरूपः, तदुक्तं मम्मटेन –

'तद्ग्राहकञ्च न निर्विकल्पकं विभावादिपरामर्शप्रधानत्वात्। नापि सविकल्पकं चर्व्यमाणस्यालौकिकानन्दमयस्य स्वसंवेदनसिद्धत्वात्। उभयाभाव-स्वरूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोध मिति श्रीमदाचार्याभिनवगुप्तपादाः।'[1]

तदित्थं रसस्य ब्रह्मास्वादसहोदरत्वं सिद्धमेव। सम्पूर्णस्य रसनिरूपणस्योपजीव्यं वेदान्तदर्शनमत्र विश्वनाथेनावलम्बितं तथा 'काव्यस्यात्मा रसध्वनिरेव' रसस्वरूपस्य ज्ञानं वेदान्तदर्शनाधीनं ततश्च ध्वनिस्थापने वेदान्तावदानमस्ति।

विद्याकाननकेसरिणा पण्डितराजजगन्नाथेन तु 'रसो वै सः'[2] इति श्रुतिमनुसृत्य विशेषतो वेदान्तानुसारं रसनिरूपणं विहितम्। रसस्यात्मरूपतां स्वीकृत्य रसलक्षणस्यान्तिमभागे वक्ति यत् –

'प्रमुष्टपरिमितप्रमातृत्वादिनिजधर्मेण प्रमात्रा, स्वप्रकाशतया वास्तवेन, निजस्वरूपानन्देन सह गोचरीक्रियमाणः प्राग्विनिविष्टवासनारूपो रत्यादिरेव रसः।'[3]

अर्थात् 'परस्य न परस्येति ममेति न ममेति च' इत्यादिरूपः परिमितप्रमातृत्वादिनिजधर्मो यस्य विलुप्तः तादृशस्य सहृदयस्य यदा

1 रसनिरूपणे काव्यप्रकाशे चतुर्थोल्लासः

2 तै. उ.

3 रसनिरूपणे रसगङ्गाधरः प्रथमाननम्

रत्यादिस्थायिभावाः स्वप्रकाशरूपेण वास्तविकेन स्वस्वरूपानन्देन सह गोचरीक्रियमाणाः, तदा ते रसरूपतां प्राप्नुवन्ति। अर्थात् निजात्मनः सहाभेदेन 'रसोऽहम्' इति गोचरीक्रियमाणः प्राग्विनिविष्टः, रत्यादिस्थायिभाव एव रसः।

इत्थं 'रसो वै सः' इति श्रुतिमनुसृत्य रसस्यात्मरूपता तेनाङ्गीकृता, अग्रेऽपि वक्ति यत् 'रस आत्मरूपः' स स्वयमपि प्रकाशते स्वसन्निहितान् रत्यादीन् च प्रकाशयति। तदुक्तम् –

'यथा हि शरावादिना पिहितो दीपस्तन्निवृत्तौ सन्निहितान् पदार्थान् प्रकाशयति, स्वयं च प्रकाशते, एवमात्मचैतन्यं विभावादिसंवलितान् रत्यादीन्।'[1]

अग्रे पण्डितराजो वक्ति यत् सविकल्पकसमाधिकाले यथा योगिनां स्वस्वरूपानन्दाकारा चित्तवृत्तिरूदेति, सांसारिकभावानां च भानं न तदवस्थायां भवति तथैव सहृदयानामपि रत्यादिविशिष्टस्वस्वरूपानन्दाकारा चित्तवृत्तिरूदेति वेद्यान्तरस्य भानमपि न तदवस्थायाम्। तदुक्तम् –

'विभावादिचर्वणामहिम्ना सहृदयस्य निजसहृदयतावोन्मिषितेन तत्तस्थाय्यु-पहितस्वस्वरूपानन्दाकारा समाधाविव योगिनश्चित्तवृत्तिरूपजायते, तन्मयीभवनमिति यावत्'।[2]

रसचर्वणातो ब्रह्मसाक्षात्कारस्य साम्यं प्रतिपाद्य तयोर्भेदमपि सूचयन् पण्डितराजो ब्रवीति यत् 'रसचर्वणाया विषयो विभावादिमिश्रितात्मानन्दः, ब्रह्मसाक्षात्कारस्य विषयश्च शुद्धात्मानन्दः, तेन तयोर्विषयभेदः स्पष्टः, कारणभेदोऽप्यस्ति यत् रसचर्वणायाः कारणं व्यञ्जनव्यापारः, ब्रह्मसाक्षात्कारस्य कारणन्तु श्रवणमनननिदिध्यासनसमाधयः। अतो विषयभेदात् कारणभेदाच्च रसचर्वणातो ब्रह्मसाक्षात्कारस्य भेदः, तदुक्तम् –

'इयं च परब्रह्मास्वादात् समाधेर्विलक्षणा, विभावादिविषयसंवलित-चिदानन्दालम्बनत्वात्। भाव्या च काव्यव्यापारमात्रात्।'[3]

साम्यं पुनः स्वप्रकाशानन्दचिन्मयवेद्यान्तरस्पर्शशून्यालौकिक-

---

1 रसनिरूपणे रसगङ्गाधरः प्रथमाननम्

2 तत्रैव

3 रसनिरूपणे रसगङ्गाधरः प्रथमाननम्

चमत्कारादिभिः स्फुटम्। भेदस्तु विषयकारणाभ्यां स्फुटः तथापि भेदाङ्गीकारे 'ब्रह्मैव रसः' 'रसो वै सः' इत्याद्यभेदप्रतिपादकश्रुतिविरोधो नास्ति, तासामपि 'आदित्यो यूपः' इत्यादीनामिव सादृश्य एव तात्पर्यपर्यवसानात्।

अग्रे पण्डितराजो ब्रवीति यत् 'यथा ब्रह्मानन्दे सुखमात्यान्तिकं यत् तद् बुद्धिग्राह्यमतीन्द्रियम्'[1] इत्यादिगीतावचनं प्रमाणं तथैवात्र रसास्वादे 'रसो वै सः' रस ह्येवायं लब्ध्वानन्दी भवति इत्यादिश्रुतिः सचेतसामनुभवश्चेति प्रमाणद्वयं तदुक्तम् –

'सुखमात्यान्तिकं यत् तद्बुद्धिग्राह्यमतीन्द्रियम्' इत्यादि शब्दोऽस्ति तत्र मानमिति चेत्। अस्त्यत्रापि 'रसो वै सः' 'रसह्येवायं लब्ध्वानन्दी भवति' इत्यादिश्रुतिः सकलसहृदयप्रत्यक्षं चेति प्रमाणद्वयम्।[2]

अन्ते पण्डितराजो ब्रवीति यत् 'रसचर्वणा शब्दव्यापारेण (व्यञ्जनाव्यापारेण) अर्थात् शब्दप्रमाणेन जन्यापि प्रत्यक्षविषयीभूतं यत् सुखं तदालम्बनत्वात् प्रत्यक्षात्मिकास्ति। यद्यपि शब्दप्रमाणस्य प्रत्यक्षप्रमाणतो भेदस्तथापि रसचर्वणायां न तयोर्विरोधः, कारणं वेदान्तदर्शनेऽपि 'तत्त्वमसि' प्रभृतिवाक्ये गुरुपदेशाज्जायमाना 'अहं ब्रह्मास्मि' इत्याकारान्तःकरणवृत्तिः शब्दजन्यापि यथा अपरोक्षब्रह्मविषयत्वादपरोक्षा तथैव रसचर्वणायामपि, तदुक्तम्–

'येयं द्वितीयपक्षे तदाकारचित्तवृत्त्यात्मिका रसचर्वणोपन्यस्ता सा शब्दव्यापारभाव्यत्वाच्छाब्दी, अपरोक्षसुखालम्बनत्वाच्चापरोक्षात्मिका। तत्त्वं वाक्यजबुद्धिवत्।'[3]

तदित्थं परमसाहित्यमीमांसकः पण्डितराजो रसचर्वणाया ब्रह्म-साक्षात्कारस्य च 'रसो वै सः' 'रस ह्येवायं लब्ध्वानन्दीभवति' इत्यादिश्रुति-मनुसृत्य वेदान्तदर्शनानुसारं रसस्वरूपं निरूपयति।

रसश्च काव्यस्यात्मा 'काव्यस्यात्मा स एवार्थः तथा चादिकवेः पुरा। क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।' इति स्वयं ध्वनिकृतोक्तम्। तस्य रसस्य स्वरूपं 'ब्रह्मास्वादसहोदरत्वेन'[4] मम्मटविश्वनाथजगन्नाथप्रभृतयश्च

1 वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः। श्रीमद्भगवद्गीता 21/6

2 रसनिरूपणं रसगङ्गाधरे प्रथमाननम्

3 रसनिरूपणं रसगङ्गाधरे प्रथमाननम्

4 का. 1 ध्वन्यालोकः प्रथमोद्योतः

प्रतिपादयन्ति। 'रसो वै सः' 'रस ह्येवायं लब्ध्वानन्दीभवति' श्रुतिमनुसृत्य सप्रमाणं सयुक्तिकं तैराचार्यैः तस्य रसस्य ब्रह्मास्वादसहोदरत्वेन स्वरूपं निरूपितं, ततश्च वेदान्तदर्शनस्यावदानं ध्वनिस्थापने तावदस्ति।

**पूर्वमीमांसा**

विषयस्य भेदेन वेदो द्वेधा, स च कर्मकाण्डत्वेन ब्रह्मकाण्डत्वेन सम्प्रति प्राप्यते। तत्र प्रथमभागस्य (कर्मकाण्डस्य) विवेचनं पूर्वमीमांसाशास्त्रे समुपलभ्यते, द्वितीयभागस्य (ब्रह्मकाण्डस्य) च विवेचनं प्राधान्येन उत्तरमीमांसाशास्त्रे (वेदान्ते) प्राप्यते।

उभयत्र प्रमाणत्वेन वेदमेव स्वीक्रियते, तदुक्तं 'धर्मजिज्ञासमानानां प्रमाणं परमं श्रुतिः'[1] तथा 'ब्रह्मजिज्ञासमानानां प्रमाणं परमं श्रुतिः'।[2] षट्प्रमाणानि भाट्टमते सन्ति, तानि च प्रत्यक्ष-अनुमान-उपमान- शब्द-अर्थापत्ति-अनुपलब्धि -रूपाणि। तत्र शब्दप्रमाणस्य लक्षणमिदं यत् 'यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम्'।[3] इत्थं वाक्यरूपं शब्दप्रमाणं ते स्वीकुर्वन्ति, वाक्यार्थज्ञानाय हेतुचतुष्टयञ्च मन्वते। तच्च आकाङ्क्षा-योग्यता-आसत्ति-तात्पर्यरूपम्। शब्दशक्तिषु प्राधान्येन अभिध ाशक्तिमेवाङ्गीकुर्वन्ति, तदुक्तम्-

**'यच्च यस्मात् प्रतीयते तत्तस्य वाच्यम्, यथा गोशब्दस्य गोत्वम्'।**[4]

वेदस्य परमेश्वरेणोक्तत्वात्[5] तस्य वेदस्य भ्रमसंशयादिव्यतिरिक्तस्य शुद्धस्य तात्पर्यविषयीभूतार्थस्य ज्ञानाय साक्षात्सङ्केतितार्थबोधिनीं शक्तिं (अभिधाम्) तत्पुच्छभूतां लक्षणाञ्च 'सोमेन यजेत' इत्यादौ ते स्वीकुर्वन्ति, तदुक्तम् -

'सोमेन यजेत' इत्यत्र सोमयागयोरप्राप्तत्वात्सोमविशिष्टयागविधानं

---

1 मीमांसान्यायप्रकाशभूमिकायां डॉ. राधेश्यामचतुर्वेदी

2 तत्रैव

3 तत्रैव

4 मीमांसान्यायप्रकाशस्य प्रारम्भे

5 संसारस्यानादित्वादीश्वरस्य च सर्वज्ञत्वात् ईश्वरो गतकल्पीयं वेदमस्मिन् कल्पे स्मृत्वा उपदिशति। मीमांसान्यायप्रकाशस्य प्रारम्भे

'सोमवता यागेनेष्टं भावयेत्' इति। न चोभयविधाने वाक्यभेदः, विशिष्टस्यैकत्वात्। विशिष्टविधौ च मत्वर्थलक्षणा। सोमपदेन मत्वर्थो लक्ष्यते सोमवतेति। न हि मत्वर्थलक्षणां विना सोमस्यान्वयः सम्भवति।[1]

इत्थं मीमांसकाः शक्तिद्वयं (अभिधालक्षणारूपं) स्वीकुर्वन्ति। अतो ध्वनिकृता यदा काव्यात्मरूपेण व्यङ्ग्यार्थः स्वीकृतः तदा तस्य समक्षं मीमांसकानां मतनिराकरणं नितरामावश्यकमासीत्। कुमारिलेन श्लोकवार्तिके वाक्याधिकरणे पदार्थवाक्यार्थन्यायेन सर्वेषामर्थानां वाच्यत्वमङ्गीकृतं, परं न सर्वे वाच्यार्थाः काव्यशास्त्रे, तथाहि कुत्रचिद्वाच्यः, कुत्रचिल्लक्ष्यः, कुत्रचिद्व्यङ्ग्यश्च महाकवीनां वाल्मीकिव्यासकालिदासादीनां प्रबन्धेषु दृश्यते। तेष्वर्थेषु व्यङ्ग्यार्थ एव वस्तुतः काव्यस्यात्मा। अतः व्यङ्ग्यार्थस्य ज्ञानाय व्यञ्जनायाः स्थापना करणीया आसीत्। ध्वनिकारेण तृतीयोद्योते प्राधान्येन व्यञ्जनास्थापनावसरे मीमांसकानां पदार्थ-वाक्यार्थन्यायं खण्डयता बहुभिः तर्कैर्व्यञ्जना प्रतिष्ठिता, तदित्थं व्यञ्जनास्थापने पूर्वपक्षतया मीमांसकानामवदानं वर्तते। सम्प्रति तदेव यथाग्रन्थं प्रदर्श्यते।

पदार्थवाक्यार्थन्यायवादीनां मीमांसकानां मतमनुसृत्य प्रश्नं समुद्भावयति ध्वनिकारो यत् 'वाच्यार्थभिन्नस्य अर्थस्य सिद्धिः कृता परं सोऽर्थो व्यङ्ग्यार्थनाम्ना किमर्थमुच्यते? यत्र सोऽर्थः प्राधान्येन तिष्ठति तत्र वाच्यतयैव सो व्यपदेष्टुं शक्यः कारणं 'यत्परः शब्दः स शब्दार्थः' अर्थात् यस्यार्थस्य बोधनाय वक्ता शब्दमुच्चारयति सैव शब्दार्थः वाक्यार्थो वा। यथा 'निःशेषच्युतचन्दनम्' इत्यादिपद्ये 'तदन्तिकमेव रन्तुं गतासि' इति तात्पर्यार्थबोधनाय वक्त्र्या तत्र 'निःशेषच्युतः' इत्यादिरूपेण शब्दप्रयुक्तः। अतः तदर्थस्य (रन्तुं गतासीत्यस्य) वाच्यत्वमेवोचितं किन्त्वस्य नामान्तरकल्पनया तथा यस्यार्थस्य मध्ये प्रतीतिर्भवति सा प्रतीतिः तत्प्रतीतेः (वाच्यार्थप्रतीतेः) उपायमात्रं, पदार्थप्रतीतिरिव वाक्यार्थ-प्रतीतेः। अर्थात् वाक्यार्थप्रतीतौ यथा पदार्थप्रतीतेर्निमित्तता (उपायता) तथैव 'रन्तुं गतासि' इति तात्पर्यविषयीभूतवाक्यार्थबोधाय 'वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्' इत्येतस्यार्थस्य निमित्तता। विना पदार्थं यथा वाक्यार्थस्य ज्ञानं नोपपद्यते तथैव विना निमित्तार्थं (वापीं स्नातुमितो गतासि) तात्पर्यविषयीभूतावाक्यार्थस्य (रन्तुं गतासि) ज्ञानं न सम्भवति,

1 मी. न्या. प्र. प्रारम्भे

अतः तत्र 'यत्परः शब्दः स शब्दार्थः' इति नयेन तात्पर्यविषयीभूतार्थस्य वाच्यतैव किन्त्वस्य व्यापारान्तर-कल्पनया, मध्ये यस्यार्थस्य प्रतीतिः सा तत्प्रतीतेः (तात्पर्यार्थप्रतीतेः) उपायमात्रं पदार्थप्रतीतिरिव वाक्यार्थप्रतीतेः। तदुक्तम् -

'प्रागुक्तयुक्तिभिर्वाच्यव्यतिरिक्तस्य वस्तुनः सिद्धिः कृता, स त्वर्थो व्यङ्ग्यतयैव कस्मात् व्यपदिश्यते, यत्र च प्राधान्येनावस्थानं तत्र वाच्यतयैवासौ व्यपदेष्टुं युक्तः, तत्परत्वाद्वाक्यस्य। अतश्च तत्प्रकाशिनो वाक्यस्य वाचकत्वमेव व्यापारः, किन्त्वस्य व्यापारान्तरकल्पनया? तस्मात्तात्पर्यविषयो योऽर्थः स तावन्मुख्यतया वाच्यः। या त्वन्तरा तथाविधे विषये वाच्यान्तरप्रतीतिः सा तत्प्रतीतेरूपायमात्रं पदार्थप्रतीतिरिव वाक्यार्थप्रतीतेः।[1]

लोचनकारोऽपि मीमांसकानां योगदानं ध्वनिस्थापनायां स्वीकुर्वन् वक्ति यत् 'बोधितमपि ध्वनिस्वरूपं शिष्याणां सरलतया ज्ञानाय पुन एकेन प्रकरणेन हृदि निवेशयितुं पूर्वपक्षमाह ध्वनिकारः, पूर्वपक्षश्च मीमांसकादीनाम्। तदुक्तं लोचने-

'उद्योतारम्भे यदुक्तं व्यञ्जनमुखेन ध्वनेः स्वरूपं प्रतिपाद्यत इति तदिदानीमुपसंहरन् व्यञ्जकभावं प्रथमोद्योते समर्थितमपि शिष्याणामेकप्रघट्टेन हृदि निवेशयितुं पूर्वपक्षमाह - कश्चिदिति मीमांसकादिः।'[2]

पूर्वपक्षतः कुमारिलभट्टस्य (मीमांसकस्य) पदार्थवाक्यार्थन्यायसमर्थकं पद्यञ्च प्रदर्शयन् ब्रूते लोचनकारो यत् भाट्टमते हि -

**वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।**
**पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥**

इति शब्दावगतैः पदार्थैस्तात्पर्येण योऽर्थ उत्थाप्यते स एव वाक्यार्थः स एव वाच्य इति। प्रभाकरदर्शनेऽपि दीर्घदीर्घो व्यापारो निमित्तिनि वाक्यार्थे, पदार्थानां तु निमित्तभावः पारमार्थिक एव वैयाकरणानां तु सोऽपारमार्थिक इति विशेषः। तदेतन्मतत्रयं पूर्वपक्षे योज्यम्।'[3]

---

1 का. 33 वृत्तौ ध्वन्यालोकः तृतीयोद्योतः
2 का. 33 वृत्तौ लोचने ध्वन्यालोकः तृतीयोद्योतः
3 तत्रैव लोचने

लोचनकृतात्र स्पष्टतया पूर्वपक्षतः कुमारिलभट्टमतं तस्यैव श्लोक-वार्तिकस्थेन पद्येन सूचितं यत् 'यथा पाके काष्ठानां ज्वालारूपमवान्तर-व्यापारस्तथा वाक्यार्थज्ञानाय पदानां पदार्थबोधनभूतमवान्तरव्यापारः। विना ज्वालां यथा न पाकस्तथा विना पदार्थं न वाक्यार्थबोधः। ततश्च 'निःशेषः.....' इत्यादिपद्ये 'रन्तुं गतासि' इति तात्पर्यविषयीभूतार्थज्ञानाय 'वापीं स्नातुमितो गतासि न पुनस्तस्याध-मस्यान्तिकम्' इत्यस्य नान्तरीयकता। प्रभाकरस्य च मतं दीर्घदीर्घव्यापारतया सूचितम्। अर्थात् दीर्घदीर्घतरेण अभिधाव्यापारेणैव सर्वेषामर्थानामवबोधनात् किमर्थं व्यञ्जनोपाया।

तदित्थं मीमांसकानां पूर्वपक्षतया ध्वनिस्थापनायां योगदानमस्त्येव। ध्वनिकारस्य वचनेषु मीमांसकानां सिद्धान्तानां (यत्परः शब्दः स शब्दार्थः, सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः) दर्शनं भवति। लोचनकारस्तु सप्रमाणं कुमारिलस्य प्रभाकरस्य च मतं पूर्वपक्षतो दर्शयति। ततश्च पूर्वमीमांसकानामवदानं ध्वनिस्थापने वर्तते।

मीमांसकानां पूर्वपक्षं खण्डयन् ध्वनिकारो वक्ति यत् 'वाच्यार्थ-व्यङ्ग्यार्थयोर्न पदार्थवाक्यार्थन्यायः' कारणं वाक्यार्थबोधे पदार्थस्य पृथक्तया ज्ञानं न भवति कारणं 'विशिष्टैकार्थबोधकत्वमेव वाक्यलक्षणम्' यदि पृथक्तया वाक्यार्थे पदार्थज्ञानं तर्हि वाक्यमेव न तत्। व्यङ्ग्यस्य प्रतीतिकाले तु विभावादिरूपार्थस्य वाच्यार्थस्यापि प्रतीतिर्भवत्येव तदुक्तम् -

'न हि व्यङ्ग्ये प्रतीयमाने वाच्यबुद्धिर्दूरी भवति, वाच्यावभासाविनाभावेन तस्य प्रकाशनात्।'[1]

व्यङ्ग्यप्रतीतिकाले वाच्यार्थस्यापि भासनात् न पदार्थवाक्यार्थन्यायस्तयोः। प्रत्युत घटप्रदीपन्यायस्तयोः कारणं प्रदीपो यथा स्वयं प्रकाशयन् घटमपि प्रकाशयति तथैव वाच्योऽपि स्वयं प्रकाशयन् व्यङ्ग्यार्थमपि प्रकाशयति। तदुक्तम् -

'तस्माद् घटप्रदीपन्यायस्तयोः, यथैव हि प्रदीपद्वारेण घटप्रतीतावुत्पन्नायां न प्रदीपप्रकाशो निवर्तते तद्वद्व्यङ्ग्यप्रतीतौ वाच्यावभासः।'[2]

---

1 का. 33 वृत्तौ ध्वन्यालोकः

2 का. 33 वृत्तौ ध्वन्यालोकः

तदित्थं व्यञ्जनास्थापनायां घटप्रदीपन्यायः स्वीकृतः परं किमर्थं स्वीकृत इति प्रश्ने सति मीमांसकानामेव पूर्वपक्षस्तावत् परापतति, स च वितत्य पूर्वं सप्रमाणमत्र प्रस्तुतः।

तदित्थं ध्वनिस्थापने पूर्वमीमांसकानाम् अवदानं वर्तते। तच्च सविस्तरं सप्रमाणं प्रकृताध्याये प्रदर्शितम्।

इत्थं पूर्वोत्तरमीमांसादर्शनस्यावदानं ध्वनिस्थापने वर्तते। तच्च यावच्छक्यं सप्रमाणं प्रकृताध्याये प्रदर्शितम्।

◈◈◈

# उपसंहारः

**या स्मर्यमाणा श्रेयांसि सूते ध्वंसयते रूजः।**
**तामभीष्टफलोदारकल्पवल्लीं स्तुवे शिवाम्॥**

सम्प्रति शोधप्रबन्धस्यास्य उपसंहारः प्रदर्श्यते। 'सकलशास्त्रसारं साहित्यशास्त्रम्' इति विदुषां भणितिं निशम्य स्वप्रवृत्त्यनुकूलानि तत्त्वानि चोपलभ्य 'ध्वनिस्थापने व्याकरणदर्शनशास्त्रयोरवदानम्' इति शीर्षकनुसृत्य शोधप्रबन्धेऽस्मिन् मे प्रवृत्तिर्जाता।

ध्वन्यालोकलोचनटीकयोश्च बाहुल्येन ध्वनिनिरूपणे शास्त्रान्तराणामवदानं, येषां ज्ञानं विना ध्वनिकारस्य सूक्ष्मविवेचनस्य नोद्घाटनम्। ततश्च शोध-प्रबन्धेऽस्मिन् यथासम्भवं तत्तच्छास्त्राणां यावदपेक्षितं परिचयपुरस्सरं ध्वनिस्थापने तदवदानं प्रदर्शितम्।

तत्र **प्रथमाध्याये** 'ध्वनिकारस्य व्यक्तित्वकृतित्वयोः परिचयः प्रस्तुतः।' तत्र बाह्याभ्यान्तरप्रमाणाभ्यां तस्य जन्मसमयस्थानादीनां निर्णयः कृतः। तत्र विशेषतया 'एककर्तृकत्वं ध्वन्यालोकस्य' इति सप्रमाणं साधितम्। तथाहि लोचनकारस्य व्याख्याने 'ग्रन्थकृत्' 'मूलग्रन्थकृत्' 'कारिकाकारः' 'वृत्तिकारः' इत्यादिशब्दान् विलोक्य सहृदयेषु भ्रान्तिरजनि यत् कारिकाकारतो वृत्तिकारो भिन्नः, परमार्थतस्तु कारिकांशव्याख्याने कारिकाकारः तथैव वृत्त्यंशस्य व्याख्याने वृत्तिकारः शब्दं प्रयुङ्क्ते लोचनकारः, ततश्च कारिकावृत्त्योश्च कर्ता आनन्दवर्धन एवेति सविस्तरं सप्रमाणं प्रथमाध्याये प्रदर्शितम्। ध्वनिकारस्य कृतीनामपि सारगर्भितः परिचयश्चात्र प्रस्तुतः। तदनु लोचनकारस्यापि व्यक्तित्वकृतित्वयोश्च सरसः परिचयस्तत्र प्रदत्तः।

**द्वितीयाध्याये** व्याकरणशास्त्रस्यावदानं ध्वनिस्थापने प्रदर्शितम्। स्वयं ध्वनिकारो ब्रूते –

'प्रथमे हि विद्वांसो वैय्याकरणाः, व्याकरणमूलत्वात्सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः।'[1]

लोचनकृता चात्र हरिकारिकाः (वाक्यपदीयस्थाः) प्रमाणत्वेनोपन्यस्ताः ततश्च शोधप्रबन्धस्याध्यायेऽस्मिन् स्फोटस्य प्राकृतवैकृतध्वन्योः, परा-पश्यन्ती-मध्यमा-वैखरीणाञ्च सम्यक् परिचयपुरस्सरं ध्वनिस्थापने कथं तेषामवदानमिति सोपपत्तिकं प्रतिपादितम्।

स्फोटातिरिक्तं सुप्तिङ्वचनसम्बन्धप्रकृतिप्रत्ययादीना[2] व्यञ्जनायामपि व्याकरणस्यावदानं प्रस्तुताध्याये प्रदर्शितम्।

**तृतीयाध्याये** शैवदर्शनस्यावदानं ध्वनिस्थापने प्रदर्शितम्। तथा हि तृतीयोद्योते व्यञ्जनायाः स्थापनावसरे ध्वनिकृता वाच्यव्यङ्ग्ययोश्च घटप्रदीपन्यायः स्वीकृतः तदुक्तम् -

'तस्माद् घटप्रदीपन्यायस्तयोः यथैव हि प्रदीपद्वारेण घटप्रतीतावुत्पन्नायां न प्रदीपप्रकाशो निवर्तते तद्वद्व्यङ्ग्यप्रतीतौ वाच्यावभासः।'[3]

अर्थात् यथा प्रदीपः स्वयं प्रकाशयन् स्वसन्निहितं घटादिकं प्रकाशयति तथैव वाच्योऽपि स्वयं प्रकाशयन् व्यङ्ग्यार्थं प्रकाशयति ततश्च घटप्रदीपन्यायस्तयोः। अर्थात् रसादिव्यङ्ग्यानां प्रतीत्यवसरे विभावादिवाच्यस्य ज्ञानं भवतयेव तदुक्तम् -

'न हि व्यङ्ग्ये प्रतीयमाने वाच्यबुद्धिर्दूरी भवति, वाच्यावभासाविनाभावेन तस्य प्रकाशनात्'।[4]

अस्य घटप्रदीपन्यायस्य मूलं काश्मीरशैवदर्शनमेव कारणं ध्वनिकारः स्वयं परमशैवदार्शनिको वर्तते तथा शैवाचार्याः परमशिवस्य रूपद्वयं ब्रुवन्ति। प्रथमं विश्वोत्तीर्णरूपं द्वितीयं विश्वमयरूपम्, तत्र विश्वोत्तीर्णरूपे

1 का. 13 वृत्तौ ध्वनिकारः प्रथमोद्योतः

2 सुप्तिङ्वचनसम्बन्धैस्तथा कारकशक्तिभिः।
कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित्।। का. 16 तृतीयोद्योतः

3 का. 33 वृत्तौ तृतीयोद्योतः

4 तत्रैव

मूयराण्डरसन्यायेन समस्तमपि प्रपञ्चजातं तस्मिन्नेव लीनं परं न तस्य भानं (प्रपञ्चस्य) तस्य (परमेश्वरस्य)। द्वितीये विश्वमयरूपे यदा परमशिवः स्वसत्तां विमृशति तथा तदन्तर्वर्तिनीनां शक्तीनां समुद्रेको यदा भवति तदा क्षितिपर्यन्तानां षट्त्रिंशत्तत्त्वानां समुल्लासो भवति। तेषु षट्त्रिंशत्तत्त्वेषु शिवत्वस्यानपायात् शिवरूपता तेषां सिद्धा, तदुक्तम् –

**एवं सर्वपदार्थानां समैव शिवता स्थिता।**
**परापरादिभेदोऽत्र श्रद्दधानैरूदाहृतः॥**[1]

'परमशिवः स्वयं प्रकाशयन् षट्त्रिंशत्तत्त्वानि प्रकाशयति' इति शैवागम-सिद्धान्तस्यानुप्राणिता वाच्यव्यङ्ग्ययोर्घटप्रदीपन्याये दृश्यते। ततश्च शैवदर्शनस्य षट्त्रिंशत्तत्त्वानां परिचयपुरस्सरं तदवदानं ध्वनिस्थापने प्रदर्शितम्। तदतिरिक्तमपि यत्र-तत्र शैवदर्शनस्य दर्शनं ध्वन्यालोकलोचनयोः तदपि सविस्तरं सयुक्तिकं प्रकृताध्याये प्रदर्शितम्।

यद्यपि मुक्तकण्ठेन ध्वनिकृता लोचनकृता वा शैवदर्शनस्यावदानं न स्वीकृतं तथापि रुह्यकेन तस्य सङ्केतः कृतः, श्रीरामकुमारशर्ममहोदयैश्च पाठनावसरे तत् स्फुटीकृतम्, ततश्च शैवदर्शनस्याद्यं शास्त्रं 'शिवदृष्टिः' इत्यस्य स्वाध्यायं कृत्वा घटप्रदीपन्याये तस्य सङ्गतिञ्च कृत्वा प्रकृताध्याये शैवदर्शनस्यावदानं प्रस्तुतम्। ध्वनिकारश्च स्वयं महान् शैवाचार्यः, तत्त्वालोकग्रन्थे तेन सम्यक् शैवदर्शनं प्रपञ्चितं ततश्च लोचनकारो 'वैय्याकरणवेदान्तिनां मते व्यञ्जना स्वीकरणीया' इति ब्रुवन् ध्वनिकारस्य विषये वदति।

'येऽप्यविभक्तं स्फोटं वाक्यं तदर्थं चाहुः तैरप्यविद्यापदपतितैः सर्वेयमनु-सरणीया प्रक्रिया। तदुत्तीर्णत्वे तु सर्वं परमेश्वराद्वयं ब्रह्मेत्यस्मच्छास्त्रकारेण न न विदितं तत्त्वालोकग्रन्थं विरचयतेत्यास्ताम्।'[2]

तदित्थं सविस्तरं सप्रमाणं सयुक्तिकं शैवदर्शनस्यावदानं तृतीयाध्याये शोधप्रबन्धेऽस्मिन् प्रदर्शितम्।

**चतुर्थाध्याये** सांख्ययोगदर्शनयोरवदानं ध्वनिस्थापने प्रदर्शितम्। तत्र सांख्यदर्शनस्य सत्कार्यवादस्यावदानं ध्वनिस्थापने दृश्यते, तद्यथा – ध्वनिकारो

1 श्लो. 48 शिवदृष्टिः प्रथमाह्निकम्

2 का. 4 व्याख्याने लोचने प्रथमोद्योतः

लावण्यमिव प्रतीयमानस्वरूपं बोधयन् तस्य सत्तायां तद्भानमेव प्रमाणत्वेन स्वीकरोति, तदुक्तं 'विभाति लावण्यमिवाङ्गनासु'। अत्र लोचनकारो ब्रूते 'यदेवंविधमस्ति तद्भाति।' न ह्यत्यन्तासतो भानमुपपन्नम्, रजताद्यपि नात्यन्तम-सद्भाति। अनेन सत्त्वप्रयुक्तं तावद् भानमिति भानात्सत्त्वमवगम्यते। तेन यद्भाति तदस्ति तथेत्युक्तं भवति।[1]

सांख्येऽपि सत्कार्यवादेऽयमेव सिद्धान्तो दृश्यते। तत्रापि असतः सत्ता नाङ्गीकृता 'असदकरणात्'[2] इत्यादिसांख्यकारिकया। श्रीमद्भगवद्-गीतायामपि भगवतोक्तम्-

**नासतो विद्यते भावो नाभावो विद्यते सतः।**
**उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥**[3]

इत्थं सप्रमाणं बहुभिर्तर्कैः सांख्यदर्शनस्यावदानं ध्वनिस्थापने प्रदर्शितम्। तदनु योगदर्शनस्यावदानं ध्वनिस्थापने प्रदर्शितम्। तथाहि सर्वेऽपि ध्वनिवादिनो रसस्य चित्तवृत्तित्वं मन्वते। तत्र लोचनकारो वक्ति -

'औचित्येन प्रवृत्तौ चित्तवृत्तेरास्वाद्यत्वे स्थायिन्या रसो व्यभिचारिण्या भावः, अनौचित्येन तदाभासः'।[4]

विश्वनाथेनापि भणितम् -

**'पुण्यवन्तः प्रमिण्वन्ति योगिवद् रससन्ततिम्।'**[5]

पण्डितराजस्तु व्यभिचारिस्थायिभावानां लक्षणे सर्वत्र चित्तवृत्तिपदस्य प्रयोगपुरस्सरं तेषां लक्षणं भणति।

तदित्थं ध्वनिवादिनो रसादीनां चित्तवृत्तित्वं भणन्ति, चित्तवृत्तेश्च सम्बन्धः प्राधान्येन योगदर्शनेनास्ति तदुक्तं पतञ्जलिना-

**'योगश्चित्तवृत्तिनिरोधः'।**[6]

---

1 का. 4 व्याख्याने लोचने प्रथमोद्योतः
2 का. 9 सांख्यकारिका
3 श्रीमद्भगवद्गीता 2/16
4 का. 4 व्याख्याने लोचने प्रथमोद्योतः
5 का. 3 वृत्तौ सा. द. तृ. परिच्छेदः
6 योगसूत्रम् 1/2

इत्थं योगदर्शनस्यावदानं ध्वनिस्थापने वर्तते। तदित्थं सांख्ययोगदर्शनयोरवदानं ध्वनिस्थापने चतुर्थाध्याये शोधप्रबन्धेऽस्मिन् प्रदर्शितम्।

**पञ्चमाध्याये** पुनः पूर्वोत्तरमीमांसादर्शनस्यावदानं ध्वनिस्थापने प्रदर्शितम्। व्यञ्जनायाः स्थापने तृतीयोद्योते ध्वनिकारो विशेषतया पूर्वपक्षत्वेन तात्पर्यवृत्त्या व्यञ्जनाया अन्तर्भावो दर्शयन् वक्ति –

'प्रागुक्तयुक्तिभिर्वाच्यव्यतिरिक्तस्य वस्तुनः सिद्धिः कृता, स त्वर्थो व्यङ्ग्यतयैव कस्माद् व्यपदिश्यते। यत्र च प्राधान्येनावस्थानं तत्र वाच्यतयैवासौ व्यपदेष्टुं युक्तः। तत्परत्वाद् वाक्यस्य। अतश्च तत्प्रकाशिनो वाक्यस्य वाचकत्वमेव व्यापारः, किन्तस्य व्यापारान्तरकल्पनया? तस्माद् तात्पर्यविषयो योऽर्थः स तावन्मुख्यतया वाच्यः।'[1]

अत्र लोचनकारस्तु कुमारिलभट्टस्य श्लोकवार्तिकस्थं पद्यमेकं मीमांसकानां (पूर्वमीमांसकाना) पूर्वपक्षतो दर्शयन्नाह भाट्टमते हि–

**वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।**
**पाके-ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥**

इति शब्दावगतैः पदार्थैस्तात्पर्येण योऽर्थ उत्थाप्यते स एव वाक्यार्थः स एव च वाच्य इति।[2]

तात्पर्यवृत्त्या व्यङ्ग्यार्थबोधनवादीनां प्रभाकरादीनाञ्च तत्रैव मतं दर्शयन्नग्रे वक्ति लोचनकारो यत् –

'प्राभाकरदर्शनेऽपि दीर्घदीर्घो व्यापारो निमित्तिनि वाक्यार्थे, पदार्थानां तु निमित्तभावः पारमार्थिक एव। वैयाकरणानां तु सोऽपारमार्थिक इति विशेषः। तदेतन्मतत्रयं पूर्वपक्षे योज्यम्।'[3]

इत्थं पूर्वमीमांसकानां मते व्यञ्जनाया नैरर्थक्यं प्रतिपाद्य तत्खण्डनपूर्वकं व्यञ्जनस्थापनं ध्वनिकृता कृतं, ततश्च पूर्वपक्षतया पूर्वमीमंसकानां योगदानं ध्वनिस्थापने वर्तते, तच्च सविस्तरं सप्रमाणं प्रकृताध्याये प्रदर्शितम्।

उत्तरमीमांसादर्शनस्य (वेदान्तस्य) ध्वनिस्थापने योगदानं वर्तते,

1 का. 33 वृत्तौ ध्व. लो. तृ. उ.
2 तत्रैव लोचने
3 तत्रैव लोचने

तथाहि ध्वनिवादिनो मम्मटविश्वनाथपण्डितराजप्रभृतयो वेदान्तानुगुणं रसस्वरूपं मन्वते, तत्र मम्मटो वदति –

**'ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी**
**शृङ्गारादिको रसः'।**[1]

विश्वनाथो वदति –

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।**
**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥**[2]

पण्डितराजजगन्नाथो वक्ति –

'रसो वै सः' 'रस ह्येवायं लब्ध्वाऽऽनन्दी भवति' इत्यादिश्रुतिः सकलसहृदयप्रत्यक्षं चेति प्रमाणद्वयम्।'[3]

इत्थं 'ब्रह्मसहोदरत्वेन रसनिरूपणं ध्वनिवादिनः कुर्वन्ति'। तत्र विना ब्रह्मस्वरूपज्ञानं रसज्ञानं न, विना वेदान्तज्ञानं ब्रह्मज्ञानं न, ततश्च रसस्वरूपस्य ब्रह्मज्ञानाधीनत्वात् ब्रह्मज्ञानस्य च वेदान्तज्ञानाधीनत्वात् परम्परया वेदान्तदर्शनस्य (उत्तरमीमांसायाः) योगदानं ध्वनिस्थापने वर्तते। तच्च वितत्य प्रकृताध्याये प्रदर्शितम्।

इत्थं शोधप्रबन्धेऽस्मिन् पञ्चसु अध्यायेषु सप्रमाणं सविस्तरं व्याकरण–दर्शनशास्त्रयोरवदानं ध्वनिस्थापने प्रदर्शितम्।

**यदुन्मीलनशक्त्यैव विश्वमुन्मीलति क्षणात्।**
**स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम्॥**

◈ ◈ ◈

1 रसनिरूपणं काव्यप्रकाशः चतुर्थोल्लासः

2 का. 2 सा. द. तृ. परिच्छेदः

3 रसनिरूपणम्, रसगङ्गाधरः प्रथममाननम्

# परिशिष्टम्

## सन्दर्भग्रन्थसूची

**क्र.सं. / ग्रन्थनाम / लेखकः / प्रकाशकः / संस्करणम्**


1. ध्वन्यालोकः (आलोकदीपिकाटीका), आनन्दवर्धनः, ज्ञानमण्डल-लिमिटेड, वाराणसी, 2009
2. ध्वन्यालोकः (सलोचनः), आनन्दवर्धनः, चौखम्बाविद्याभवनम्, वाराणसी, 2009
3. ध्वन्यालोकः (दीपशिखाटीका), आनन्दवर्धनः, विश्वविद्यालय-प्रकाशनम्, वाराणसी, 2005
4. ध्वन्यालोकः (तारावतीटीका), आनन्दवर्धनः, मोतीलालबनारसीदास, दिल्ली, सं. 2020, 1963
5. परमलघुमञ्जूषा (तत्त्वप्रकाशिकाटीका), नागेशभट्टः, चौखम्बा-संस्कृतसीरीज, वाराणसी, 1974
6. परमलघुमञ्जूषा (सरलाटीका), नागेशभट्टः, कामेश्वरसिंहदरभङ्गा-संस्कृतविश्वविद्यालयः, दरभङ्गा, 1983
7. व्याकरणमहाभाष्यम् (प्रदीपटीका), पतञ्जलिः, जगदीशसंस्कृत-पुस्तकालयः, जयपुर, 2007
8. वाक्यपदीयम्, भर्तृहरिः, चौखम्बासंस्कृतसीरीज, वाराणसी, 2015
9. काव्यप्रकाशः, मम्मटः, ज्ञानमण्डललिमिटेड, वाराणसी, 2013
10. रसगङ्गाधरः, जगन्नाथः, चौखम्बाविद्याभवनम्, वाराणसी, 2013
11. शिवदृष्टिः, सोमानन्दनाथः, वाराणसेयसंस्कृतसंस्थानम्, वाराणसी, 1986
12. सांख्यतत्त्वकौमुदी, वाचस्पतिमिश्रः, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, 2016

13. योगदर्शनम्, पतञ्जलिः, कृष्णदासअकादमी, वाराणसी, 1999
14. मीमांसान्यायप्रकाशः, आपदेवः, चौखम्बासंस्कृतसीरीज, वाराणसी, 2002
15. वेदान्तसारः, सदानन्दः, जगदीशसंस्कृतपुस्तकालयः, जयपुर, 2010
16. वेदान्तपरिभाषा, धर्मराजाध्वरीन्द्रः, चौखम्बाविद्याभवनम्, वाराणसी, 2015
17. श्रीमद्भगवद्गीता, वेदव्यासः, गीताप्रेस, गोरखपुर, 2016
18. काव्यप्रकाशः (बालबोधिनीटीका), मम्मटः, परिमलपब्लिकेशन, दिल्ली, 2008
19. साहित्यदर्पणः, विश्वनाथः, चौखम्बाविद्याभवनम्, वाराणसी, 2013

**हिन्दीग्रन्थाः**

1. संस्कृत साहित्य का इतिहास, उमाशङ्कर ऋषि, चौखम्बासुरभारती-प्रकाशनम्, वाराणसी, 2010
2. संस्कृत अलङ्कार का समन्वित इतिहास, अनिरुद्ध जोशी, अजन्ता-पब्लिकेशन, दिल्ली, 1984
3. संस्कृत शास्त्रों का इतिहास, आचार्यबलदेवउपाध्यायः, चौखम्बा-विद्याभवनम्, वाराणसी, 2013

**कोशग्रन्थाः**

1. अमरकोषः, अमरसिंहः, जगदीशसंस्कृतपुस्तकालयः, जयपुर, 2005
2. संस्कृत-हिन्दीकोशः, शिवरामआप्टे, मोतीलालबनारसीदास पब्लिशर्स प्राइवेट लिमिटेड, दिल्ली, 2015

शोध-प्रकाशनविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016